प्रापुश्शर्म्मा व्यथित मनसो यस्य भू [मिं] प्रविश्य ॥ [29]

12. नानाविध द्रविण सार समुच्चयेषु
मत्त द्विपेन्द्र मद वासित गोपुरेषु [।]
संगीत वल्गु निनदेषु गृहेषु यस्य
लक्ष्म्यङ्गना धृतिमती सुचिरं च रेमे [॥] [30]
गुप्तादि पार्थिव कुलाम्बुरुह स्थलानि
स्नेहादर पणय सम्भ्रम केसराणि [।]
श्रीमन्त्यनेक नृपपट्पद सेवितानि
यो (s) बोधयद्दुहितृ दीधितिभिर्नृपार्क्कः [॥] [31]

13. यन्दैव सम्पन्नमदीनचेष्टं
शक्तित्रयोपेतमथासनस्थम् [।]
शेषैर्गुणैः पञ्चभिरप्य साद्धया
स्सामन्त चूडामणयः प्रणेमुः ॥ [32]
सग्रिह भगवतो भवस्यादिदेवस्य सिद्धयालये सिद्ध गान्धर्व्व[3] रक्षोगणै-
स्सेविते
विविध नियम होम दीक्षा परैर्ब्रा [ह्म] णै (:) स्नातकै स्तूयमाने
सदा मन्त्र वादैश्शुभैः [।]

14. सुकृतिभिरवणीश्वरैरात्मनिश्श्रेयसं प्रेप्सुभिस्सातकर्ण्यादिभिश्श्रद्धया-
भ्यर्च्चिते[4] ह्रदमुरुमलिलोपयोगाश्रयं भूपति × कारयामास काकुस्थवर्म्मा
तडाकम्म [हत्] [॥] [33]

---

1. Read पालन.
2. Ibid. भूषण
3. Read गन्धर्व्व.
4. Ibid. र्च्चित.

तस्यौरसस्स तनय·[स्य]विशालकीर्त्तेः
[प] ट्ट त्रयाप्पर्ण·विरा [जित] चारुमूर्त्तेः [।]
श्रीशान्तिवर्म्म]नृपतेर्व्वरशासनस्थः
कुब्जस्स्वकाव्यमिदमश्म तले लिलेख ॥ [34]

15. नमो भगवते स्थान कुन्दूर वासिने महादेवाय [।]
नन्दतु सर्व्व समन्तागतो (s) यमधिवासः [।]
स्वस्ति प्रजाभ्य इति [॥]

E. INSCRIPTIONS OF CENTRAL INDIA

30. MANDASOR STONE PILLAR INSCRIPTION OF YAŚODHARMAN ALIAS VIṢṆUVARDHANA.

Prov. : Mandasor, Madhya Pradesh.
Date : M. E. 589 (= 532 A. D.).
Lang. : Sanskrit ; **Scr.** : Northern Brāhmi.
Ref. : Fleet, *Ind Ant.* XV. p. 222 ff. Fleet, *C. I. I.* III p. 58–59.

Text

1. सिद्धम् [॥]
स जयति जगतां पतिः पिनाकी
स्मित रव गीतिषु यस्य दन्त कान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती
तिरयति च स्फुटयत्यदश्च विश्वम् ॥ [1]
स्वयम्भूर्भूतानां स्थिति लय [समु]

2. त्पत्ति विधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शम्भूर्भूयान्सि प्रतिदिशतु भद्राणि भव [ताम्] ॥ [2]
फण मणि गुरुभार [। क्रा]

3. न्ति दूरावनम्रं
स्थगयति रुचमिन्दोर्म्मण्डलं यस्य मूर्ध्नाम् [।]
स शिरसि विनिबध्नन्निम्ननीमस्त्रिमालां

सृजतु भवसृजो[1] वः क्लेश-भङ्गं भुजङ्गः ॥ [3]
षष्टया सहस्रैः सगरात्मजानां[2]
खात [:]

4. खतुल्यां रुचमादधानः ।
अस्योदपानाधिपतेश्चिराय
यशान्सि पायात्पयसां विधाता ॥ [4]
अथ जयति जनेन्द्रः श्री यशोधर्म्म नामा
प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य [।]
व्रण

5. किसलय भङ्गैर्य्यो (s) ङ्गभूषां विधत्ते
तरुण तरु लतावद्वीर कीर्त्ती र्विनाभ्य ॥ [5]
आजौ जिती विजयते जगतीम्पुनश्च
प्रख्यात औलिकर[3] लाञ्छन[4] आ-म

6, वङ्गो[5]
येनोदितोदितपदं गमितो गरीयः ॥ [6]
प्राचोनृपान्सुबृहतश्च बहूनुदीचः
साम्ना युधा च वशगान्प्रविधाय येन [।]
नामापरं जगति कान्तमदो दुरापं
राजाधिराज परमे

7 श्वर इत्युदृढम ॥ [7]
स्निग्ध श्यामाम्बुदाभैः स्थगित दिनकृतो यज्वनामाज्य धूम्रै
रम्भोमेध्यं मघोनावधिषु विदधता गाढ सम्पन्न सस्याः ।
संहर्षाद्वाणिनीनां कर रभस हतो

---

1. भवसृज originally means Brahmā, but here it denotes Śiva. It is due to later Śaivite enthusiasm for investing their special God with power of creation.
2. The reference here is to the sons of king Sagara, who excavated the bed of the ocean in their search for their father's Aśvamedha-horse.
3. The meaning of this term is not clear. Dr. Fleet infers that it may denote either the hot-rayed (sun) or the cool-rayed moon (*C. I. I.* III P. 151 note 4).
4. It is the technical term for the principal emblem impressed by kings on the copper seals attached to their charters. It is quite distinct from the emblem on dhvajas or banners.
5. Read वशो

8. ...ानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुज विजित भुवा भूरयो येन देशाः ॥ [8]
यस्योत्कंतुभिरुन्मद द्विप कर व्याविद्ध लोध्र द्रुमै
रुद्भूतेन वनाध्वनि ध्वनि नदद्विन्ध्याद्रिरन्ध्रैर्ब्बलैः [।] बाले
9. यच्छवि धूसरेण रजसा मन्दाङ्शुसंलक्ष्यते[1]
पर्यावृत्त शिखण्डि चन्द्रक इव श्यामं रवेर्मण्डलम् ॥ [9]
तस्य प्रभोर्व्वङ्शकृतां नृपाणां
पादाश्रयाद्विश्रुत पुण्यकीर्त्तिः ।
भृत्यः स्व नैभृत्य जिता
10. रि षट्क
आसीद्वसीयान्किल षष्ठिदत्तः ॥ [10]
हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः
शशभृत इव रेवा वारि राशिः प्रथीयान् [।]
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदित गरि
11. ...गस्तायते नैगमानाम् ॥ [11]
तस्यानुकूलः कुलजात्कलत्रा
त्सुतः प्रसूतो यशसां प्रसूतिः ।
हरेरिवांङ्शं वशिनं वराहं
वराहदास यमुदाहरन्ति ॥ [12]
सुकृति विषयि तुङ्ग[2] रुढमूलं
12. धरायां
स्थितिमपगतभङ्गां स्थेयसीमादधानम् [।]
गुरु शिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव रविकीर्त्तिः सुप्रकाशं व्यधत्त ॥ [13]
बिभ्रता शुभ्रमभ्रङ्शि स्मार्त्तं वर्त्मोचितं सताम् [।]
म विसंज्ञा
13 दिता येन कलावपि कुलीनता ॥ [14]
धुत धीदीधिति ध्वान्तान्हविर्भुज इवाध्वरान् [।]
भानुगुप्ता[3] ततः साध्वी तनयांक्षीनजीजनत् ॥ [15]

---

1. Read अंशु.
2. सुकृति विषयितुंग 'high like the abode of those who have performed good actions' That heaven is reached by good deeds is a common notion. cf दिवः सुकृतोपार्जितायाः and Raghuvaṁśa XVIII 21, द्यौ सुकृतोपलब्धा; शार्ङ्गधरपद्धति 1072 (See. *Ind Ant* Vol. XX. P. 188).
3. Dr. Fleet suggested that she might be a sister of the Gupta emperor Bhānugupta as the coincidence of name and time favour us to do. Brāhmaṇas could marry a Kshatriya girl.

भगवद्दोष इत्यासीत्प्रथमः कार्य्यवर्म्मसु ।
आल

14. स्खनं बान्धवानामन्धकानामिवोद्भवः ॥ [16]
बहुनय विधि वेधा गह्वरे (s) प्यर्थ मार्ग्गे
विदुर इव विदूरं[1] प्रेक्षया प्रेक्षमाणः ।
वचन रचन बन्धे संस्कृतप्राकृते यः
कविभिरुदि

15. तरागं गीयते गीरभिज्ञः ॥ [17]
प्रणिधि दृगनुगन्त्रा यस्य बौद्धेन चाक्षणा
न निशि तनु दवीयो वास्त्यदृष्टं धरिण्याम् [।]
पदमुदयि दधानो (s) नन्तरं तस्य चाभू
त्स भयमभयदत्तो नाम

16. वि [प्र] म्रजानाम् ॥ [18]
विन्ध्यस्यावन्ध्यकर्म्मा शिखर नट पतत्पाण्डुरेवाम्बुराशे
र्गो लाङ्गूलैः सहेल प्लुति नमित तरोः पारियात्रस्य चाद्रेः ।
आ सिन्धोरन्तराल निज शुचि सचिवाद्भया

17. सितानेक देशं
राजस्थानीय[2] वृत्या सुरगुरुरिव यो वर्णिानां भूतये (s) पात् ॥ [19]
विहित सकल वर्णासङ्कर शान्तडिम्बं
कृत इव कृतमेतद्येन राज्यं निराधि ।
स धुरमयमिदानीं

18. दोषकुम्भस्य सूनु
र्गुरु वहति तदूढां धर्म्मतो धर्म्मदोषः ॥ [20]
स्व सुखमनभिवाञ्छन्दुर्गमे (s) दध्वन्यसङ्गां-
धुरम[3]निगुरुभारां यो दधद्धूर्त्तरथं ।

---

1 विदुर, the younger brother of धृतराष्ट्र and पाण्डु.

2 The meaning of this word in Ksemendra's लोकप्रकाश IV, as given by Dr. Bühler (*Ind Ant* p. 207) is प्रजापालनार्थं उद्वहति स्म इति 'he who carries out the object of protecting subjects and shelters them' i e viceroy But according to Dr Fleet (*C. I I* III p 157 note 1) in denotes an ordinary official in the inscriptions i e line 1 of Māliya grant of महाराज धरसेन II (*C. I. I.* III p 164); line 9 of Deo-Barnark inscription of Jivitagupta (Fleet, *C. I I* III P 213) and line 33 of Bhagalpur grant of Nārāyaṇapāla (*Ind Ant* Vol XV P 380).

3 असङ्गापुर Kielhorn takes it as equivalent to अप्रतिबंधा 'meeting with no obstruction' (Cf Mallinātth on Raghuvamśa III 63).

वहति नृपति वेषं केवलं लक्ष्म मात्रं
19. वलिनमिव विलम्बं कम्बलं बाहुलेयः[1] ॥ [21]
उपहित हित रक्षामण्डनो[2] जाति[3] रत्नै-
र्भुज इव पृथुलांसस्तस्य दक्षः कनीयान् [।]
महदिदमुदपानं खानयामास विभ्र
20. च्छ्रुति हृदय नितान्तानन्दि निर्दोष नामा ॥ [22]
सुखाश्रेय च्छायं परिणति हित स्वादु फलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना ।
पितृभ्यं प्रोद्दिश्य प्रियमभयदत्तं पृ-
21. थु धिया
प्रथीयस्तेनेदं कुशलमिह कर्म्मोपरचितं ॥ [23]
पञ्चसु शतेषु शरदां यातेष्वेकाशवति सहितेषु ।
मालव गण स्थिति[4] वशात्काल ज्ञानाय लिखितेषु ॥ [24]
य
22. स्मिन्काले कल मृदु गिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मर शर निभाः प्रोषितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवन भार मन्द्रश्च यस्मि
न्नाधूतज्यं धनुरिव नदच्छूयते पुष्प
23. केतोः ॥ [25]
प्रियतम कुपितानां कम्पयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनां [।]
उपनयति नभस्वान्मानभङ्गाय यस्मि
न्कुसुम समय मासे तत्र निर्म्मापितो (s) यम् ॥ [26]
24. यावत्तुङ्गैरुदन्वान्किरण समुदयं सङ्ग कान्तं तरङ्गै
रालिङ्गन्निन्दु बिम्ब गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् [।]
बिभ्रत्सौधान्त लेखा वलय परिगतिं मुण्डमालामिवायं
सत्कूपस्तावदा

---

1 बाहुलेय· a bull

2 रक्षामण्डन or रक्षाभूषण is an ornament or armlet worn for protection against evil spirits etc.

3. Kielhorn suggested जातिरत्नैः.

4 Fleet takes the word स्थिति to mean स्थापना and renders the expression as by (the reckoning from) the tribal constitution of the Mālavas. Dr Bhandarkar (*Bhand. Com.* Vol. P. 191) takes it as 'usage' and the expression must be translated as according to the usage of the Mālava tribe'.

25. स्तामृत सम रस स्वच्छ विष्यन्दिताम्बुः ॥ [27]
धीमां दक्षो दक्षिणः सत्यसन्धो
ह्रीमांश्छूरो वृद्धसेवी कृतज्ञः ।
बद्धोत्साहः स्वामि कार्य्येष्वरवेदी
निर्द्दोषो (ऽ) यं पातु धर्म्मं चिराय ॥ [28]
उत्कीर्णा गोविन्देन ॥

31. MANDSOR STONE PILLAR INSCRIPTION OF YAŚODHARMADEVA.

Prov. : Mandsor, Madhy Pradesh.
Date : C. 525–35 A. D.
Lang. : Sanskrit ; **Scr.** : Northern Brāhmī
Ref. : Fleet, *Ind Ant.* Vol. XV. p. 253 ff. *C. I. I.* III. p. 142–148, Kielhorn : *Ind. Ant.* XVIII. p. 29 ff.

Text

1. वेपन्ते यस्य भीम स्तनित भय समुद्भ्रान्तदैत्या दिगन्ता.
शृङ्गघातैः सुमेरोर्व्विघटित दृषदः कन्दरा यः करोति [।]
उद्दाणं तं दधानः क्षितिधर तनया दत्त [पञ्चाङ्गुला] ङ्कं
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजाङ्सि[1] केतुः [॥] [1]
2. आविर्भूतावलेपैरविनयपटुभिर्ल्लङ्घिताचार [मा] र्गै
र्म्मोहादेदं युगीनैरपशुभरतिभिः पीड्यमाना नरेन्द्रैः ।
यस्य क्षमा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिरणा [ङ्क] ग्रकोष्ठ [ं]
बाहुं लोकोपकार व्रत सफल परिस्पन्द्[2] धीरं प्रपन्ना [॥] [2]
3. निन्द्याचारेषु यो (ऽ) स्मिन्विनय मुषि युगे कल्पना माद्य वृत्या
राजस्वन्येषु पाङ्सुष्विव कुसुम बलिर्ग्रावभासे प्रयुक्तः [।]
स श्रेयो धाम्नि सम्राडिति[3] मनु भरतालर्क [मान्धा] तृ कल्पे
कल्याणो हेम्नि भास्वान्मणिरिव सुतरां भ्राजते यत्र शब्दः [॥] [3]

---

1 Read तेजांसि. 2 The original appears to be परिस्पन्दि.

3. सम्राट् is the sovereign who rules over kings and has performed the राजसूय sacrifice, a religious ceremony performed at the coronation of a supreme sovereign by the monarch himself and the tributary princes

4. ये भुक्ता गुप्तनाथैर्ब्बल सकल वसुधाक्रान्तिरक्षप्रतापै
र्ज्ञाज्ञा हूणाधिपाना [ं] क्षितिपतिमुकुटाङ्घ्रयासिनी यान्प्रविष्टा
देशांस्तान्धन्व-शैल-द्रुम-गहन सरिद्वीरबाहूपगूढा-
न्वीर्य्यावस्कन्दराज्ञः स्व गृह परिसरावज्ञया यो भुनक्ति [॥] [4]

5. आलौहित्योपकण्ठात्तलवन[1] गह [नो] पत्यकादामहेन्द्रा[2]-
दागङ्गाश्लिष्ट सानोस्तुहिनशिखरिण[3]श्चपश्चिमादापयोधेः [।]
सामन्तैर्यस्य[4] बाहु द्रविण हृत म [दै] : पादयोरानमद्भि
श्चूडारत्नाङ्शु[5] राजि व्यतिकर शबला भूमि भागा क्रियन्ते[6] [॥] [5]

6. स्थाणोरन्यश्च येन प्रणति कृपणतां प्रापितं नोत्तमाङ्गं
यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्ग्ग[7] शब्दाभिमान [म्] [।]
नीचै स्तेनापि यस्य प्रणति भुजबलावर्জ्जन क्लिष्ट मूर्द्धा
[चू]डा पुष्पोपहारैर्म्मिहिरकुल नृपेणार्च्चित [ं] पाद युग्मं [॥] [6]

7. [गा] मेवोन्मातुमूर्द्ध्वं विगणयितुमिव ज्योतिषां चक्रवालं
निर्देष्टुं मार्ग्गमुच्चैर्हिव इव [सु] कृतोपार्ज्जितायाः स्व कीर्त्तेः ।
तेनाकल्पान्त कालावधिरवनिभुजा श्री यशोधर्म्मणायं

---

1. It is another Sanskrit name for modern Brahmaputra.

2. There are two mountains of the same name, one known to the Rāmāyana (किष्किन्धाकाण्ड 41 18-20, लंका 4-92-94), situated between the Gangāsāgar Samgam and Saptagodāvari (Cf भागवत पुराण X-79). A portion of Eastern Ghats near Ganjam is still called the Mahendra hill. There is another Mahendra mountain in the Tinnevelly district. According to Pargiter these are two different hills (Pargiter, Mārkandeya purana 305 notes) while Raychudhuri identifiers the two in Indian Antiquities Pp. 108-109). In this context praśastikāra probably intends the महेन्द्रगिरि of the Tinnevelly district...

3 Same as the Himālayas.

4. सामन्त literally means 'bordering' neighbouring i. e. neighbonr, but here a feudatory ruler This word and महासामन्त are of constant occurence in the inscriptions are used in the same technical sense

5 Read रत्नाशु—

6. This verse is a conventional reference to the digvijaya, and gives conventional boundaries of a चक्रवर्ती क्षत्र.

7. It is variously known as Hemavat (Pali Himavata, Himāchala) known to Indian literature from very early times of Ṛgveda (See B. C. law's *Historical Geography of Ancient India*, p. 16).

स्तम्भः स्तम्भाभिराम स्थिर भुज परिघेणोच्छ्रितं नायितो(ऽ) ब्धिः[॥] [7]

8 [श्लो] ध्ये जन्मास्य वङ्शे चरितमधहर हृश्यते कान्तमस्मि
न्धर्म्मस्यायं निकेतश्चलति नियमितं नामुना लोकवृत्तम् [।]
हृत्युत्कर्षं गुणानां लिखितुमिव यशोधर्म्मणश्चन्द्र बिम्बे
रागादुल्लिख उच्चैर्भुज इव रुचिमान्यः पृथिव्या विभाति [॥] [8]

9. इति तुष्टूषया तस्य नृपतेः पुण्यकर्म्मणः ।
वासुलेनोपरचिताः श्लोकाः ककस्य सूनुना [॥] [9]
उत्कीर्णा गोविन्देन [॥]

32. ERAN BOAR INSCRIPTION OF TORMĀṆA.

Prov. : Eran, Sāgar district, Madhya Pradesa.
Date : Regnal year I.
Lang. : Sanskrit; **Scr.** : Northern Brāhmī.
Ref. : James Prinsep. *J. B. A. S* Vol. VII. p. 631 ff.; Hall, *J. B. A. S.* Vol. XXX p. 20. or Fleet, *C I. I.* III. p. 158 ff.; Bhandarkar's. list. No. 1269.

Text

1. ॐ [॥][1]
जयति धरण्युद्धरणे घन घोणाघात घूर्णित महीद्रः [।]
देवो वराहमूर्त्तिस्त्रैलोक्य महागृह स्तम्भः[2] [॥] [1]
वर्षे प्रथमे पृथिवी [म्]
2. पृथु कीर्त्तौ पृथु द्युतौ [।]
महाराजाधिराज श्रीतोरमाणे प्रशासति । [।] [2]
फाल्गुन दिवसे दशमे । इत्येवं राज्य वर्ष मास दिनैः [।]
एतस्यां
3. पूर्व्वायाम् स्वलक्षणैर्युक्त पूर्व्वायाम् । [।] [3]
स्वकर्म्माभिरतस्य क्रतुयाजिनो (ऽ) धीत स्वाध्यायस्य विप्रर्षे
र्म्मैत्रायणीय वृषभस्येन्द्र विष्णोः प्रपौत्रस्य [।]

---

1 सिद्ध expressed by a symbol.

2 This is an allusion to the boar-incarnation of Viṣṇu, when he plunged into darkness to rescue the earth A similar invocation of Siva in the first line of the Aihole inscription (*Ind. Ant* vol IX p. 97).

4. पितुर्गुणानुकारिणो वरुणविष्णोः प्रपौत्रस्य पितरमनुजातस्य
स्ववंश वृद्धि हेतोर्हरिविष्णोः पुत्रस्यात्यन्त भगवद्भक्तस्य
विधातुरिच्छया [।]
5. स्वयंवरयेव राजलक्ष्म्याधिगतस्य चतुः समुद्र पर्यन्त प्रथितयशसः
अक्षीण मान [ध] नस्यानेक शत्रु समर जिष्णोः महार (ा) ज
मातृविष्णोः
6. स्वर्गतस्य भ्रात्रानुजेन[1] । तदनुविधायिना तत्प्रसाद परिगृहीतेन[2]
धन्यविष्णुना तेनंव [स] ह्याविभक्त पुण्य विक्रयेण मातापित्तोः
7. पुण्याप्यायनार्थमेष भगवतो वराहमूर्त्तेर्ज्जगत्परायणस्य नारायणस्य
शिला[3] प्रा [सादः][4] स्वविष [ये] (ऽ) स्मिन्नैरिकिणे कारितः । [।]
8. स्वस्त्यस्तु गो ब्राह्मण पुरोगाभ्यः सर्व्व प्रजा [भ्य इ] ति [॥]

33. GWALIOR STONE INSCRIPTION OF MIHIRKULA.

Prov. : Gwalior, Madhya Pradesh.
Date : Regnal year 15.
Lang. : Sanskrit; **Scr.** : Northern Brāhmī.
Ref. : Dr. Rajendralal Mitra, *J. B. A. S.* XXX p. 267 ff.
Fleet, *C. I. I.* III. pp. 161–164.

---

1. Cf the same expression in the line 6 of Eran stone pillar inscription of Budhagupta of the year 165 (Fleet *C. I. I.* III P 89) Dr. Hall explained this expression in J B A S Vol XXX p 139, note, by a passage quoted in St. Petersburg Dictionary from Pañchatantra viz.

जातः पुत्रोऽनुजातश्च अतिजातास्तथैव च
अपजाताश्च लोकेऽस्मिन्मन्तव्याः शास्त्रवेदिभिः ।
मातृतुल्यगुणोजातस्त्वनुजातः पितुः समः
अतिजातोऽधिकस्तस्मादपजातोऽधमाऽधमः ॥

By those who know the scriptures are to be understood among men as being a जात son or an अनुजात or an अतिजात or an अपजात. A जात is one whose virtues are equal to those of his mother, an अनुजात is equal to his father (in virtues), an अतिजात surpasses that (father), and an अपजात is altogether inferior.

2. A sign follows this word resembling the dagger mark which, according to Fleet indicates the passage तेनैव सद्दाविभक्त पुण्यक्रियेण should be read here i e just before धन्य विष्णुना.
3. Prinsep reads नारायणस्याशीर्ण; Hall नारायणस्य शीर्णः

Text

1. [ॐ ॥ स्वस्ति ॥][1]
[ज] [य] ति जलद वल[2] ध्वान्तमुत्सारयन्स्वैः
किरण निवह जालैर्व्योम विद्योतयन्निः [।]
उ [दय] [गिरि] तटाग्र ['] मण्डयन् यस्तुर ['] गैः[3]
चकित गमन खेद भ्रान्त चञ्चत्सटान्तैः [।] [1]
उदय [गिरि]

2. ... .ग्रस्त[4] चक्रो [s) र्त्तिहर्त्ता
भुवन भवन दीपः शर्व्वरी नाश हेतुः [।]
तपित कनक वर्ण्णैरंशुभिर्यपङ्कजान [।]
मभिनव रमणीयं यो विधत्ते स वो (s) व्यात् । [।] [2]

3. श्री तोर [माण इ] ति यः प्रथितो
3. [भूचक्र] पः प्रभूत गुणः [।]
सत्यप्रदान[5] शौर्य्याद्येन मही न्यायत [:] शास्ता [॥] [3]
तस्योदित कुल कीर्त्तेः पुत्रो (s) तुल विक्रमः पतिः पृथ्व्याः [।]
मिहिरकुलेतिख्यातो (s) भङ्गो यः पशुपतिम ❀ ❀ ❀ [॥][6] [4]

4. [तस्मिन्ना] जनि शासति पृथ्वीं पृथु विमल लोचने (s) र्त्ति हरे [।]
अभिवर्द्धमान राज्ये पञ्चदशाब्दे नृप वृषस्य [।] [5]
शशिरश्मिहास विकसित कुमुदोत्पल गन्ध शीतलामोदे [।]
कार्त्तिक मासे प्राप्त गगन

5. [पतौ] [नि] र्म्मले भाति । [।] [6]
द्विज गण मुख्यैरभिसंस्तुते च पुण्याह नाद घोषेण [।]
तिथि नक्षत्र मुहूर्त्ते संप्राप्ते सुप्रशस्त [दिने] । [।] [7]
मातृतुलस्य तु पौत्रः पुत्रश्च तथैव मातृदासस्य [।]
नाम्ना च मातृचेटः पर्व्व-

---

1. It is a conjectural restoration
2. Fleet ' वाल meaning banks of clouds; Sirkar seeks जलदवेला (rainy day) to have been intended
3. Sirkar रंगैश्चकित' '
4. Sirkar's conjectural restoration is उदयगिरिवनान्तग्रस्त.
5. Fleet's suggested यान
6. Bhandarkar wants to restore भेजे in the lacuna. According to him Mihirkula was the worshipper of Paśupati which seems unlikely in face of the clear appraisement of the sun. Evidently this is an inscription of solar worship. Fleet and Kielhorn believed that the Huna king broke the power of one Paśupati.

6. [त दुर्ग] [नु] वास्तव्यः [॥] [8]
नानाधातु विचित्रे गोपाह्वय[1] नाम्नि भूधरे रम्ये [।]
कारितवान्शैलमयं भानोः प्रासाद वर मुख्यम् । [।] [9]
वसता (˙) च गिरिवरे (ऽ) स्मि (न्) राज्ञः

7. ❀ ❀ ❀ [पा] देन [॥] [10]
ये कारयन्ति भानोश्चन्द्रांशुसमप्रभं गृहप्रवरं [।]
तेषां वासः स्वर्गे यावत्कल्प क्षयो भवति [॥] [11]
भक्त्या रवेर्व्विरचितं सद्धर्म्म ख्यापनं सुकीर्त्तिमयं [।]
नाम्ना च केशवेति प्रथितेन च ।

8 ❀ ❀ ❀ [दि] त्येन [॥] [12]
यावच्छुर्व जटा कलाप गहने विद्योतते चन्द्रमा
दिव्य स्त्री चरणैर्व्विभूषित तटो यावच्च मेरुर्नगः [।]
यावच्चोरसि नील नीरद निभे विष्णुर्व्विभर्त्युज्वलां
श्रीस्तावद्गिरि[2] मूर्ध्नि तिष्ठति
[शिला प्रा] साद मुख्यो रमे [॥] [13]

CHAPTER V

POST-GUPTA INSCRIPTIONS

34. HARAHA INSCRIPTION ĪŚĀNAVARMAN

Prov. : Harha, Barabanki district, U. P.
Date : M. E. 611 (= 554 A. D.)
Lang. : Sanskrit; **Scr.** : Northern Brāhmī.
Ref. : Hiranand Sastri, *Ep Ind.* XIV. pp. 115–118.

---

1. This hill is variously called, i गोपगिरि in line 1 of Gwalior inscription of Bhojadeva V. S. 933–876 A. D. (J. B. A. S. Vol XXXI p. 407), ii गोपाद्रि in the lines 4 and 14 of the Gwalior inscription of Mahipāla V. S. 1150–1093 A. D. (In Anti Vol. X. V. P. p. 36–37), iii गोपालिकेर in line 2 of a Gwalior inscription of V. S. 1161—1104 A. D. (*Ind. Ant.* Vol. XV. p. 202), iv गोपाचल in an inscription of V. S. 1497—1440 A. D. on the pedestsal of a colossal figure of Ādināth at Gwalior (J. B. A. S. XXX 1. p. 422). Probably गोपालिकेर is, as Dr Hultzch points out, the source of mod. Gwālher or Gwāhor.

2. Fleet : श्री तावद्—

Text

1. लोकाविष्कृत संक्षयस्थिति कृतां यः कारणं वेधसाम्
ध्वस्तध्वान्तचयाः परास्तरजसो ध्यायन्ति यं योगिनः [।]
यस्यार्द्धं स्थित योषितोपि हृदये नास्थायि चेतोभुवा
भूतात्मा त्रिपुरान्तकः स

2. जयति श्रेयः प्रसूतिर्भवः [॥] [1]
आशोणां फणिनः फणोपलरुचा सैह्वी[1] वसानं त्वचं
शुभ्रां लोचनजन्मना कपिशयद्भासा कपालावलीम् [।]
तन्वीं ध्वान्तनुदं मृगाकृतिभृतो विभ्रत्कलां मौलिना
दिश्यादन्ध

3. कविद्विषः स्फुरदहि स्थेयः पदं वो वपुः [॥] [2]
सुतशतं लेभे नृपोश्वपति र्ज्वैत्रस्वतात्यद्भुणोदितम [।]
तत्प्रसूता दुरितवृत्तिरुधो मुखराः क्षितीशाः क्षतारयः [॥] [3]
तेष्वादौ हरिवर्म्मणोवनिभुजो भूतिर्भु

4. वो भूतये [।]
रुद्धाशेषदिगन्तरालयशसा रुग्णारिसंपरिवषा [।]
सङ्गामे हुतभुक्प्रभाकपिशितं वक्त्रं समीक्ष्यारिभि-
र्यो भीतेः[2] प्रणतस्ततश्च भुवने ज्वालामुखाख्यां गतः [॥] [4]
लोकस्थितीनां स्थितयेस्थि-

5. तस्य मनोरिवाचारविवेकमार्गे [।]
जगाहिरे यस्य जगन्ति रम्याः सत्कीर्त्तयः कीर्त्तयितव्यनाम्नः [॥] [5]
तस्मात्पयोधेरिव शीतरश्मिरादित्यवर्म्मा नृपति र्बभूव [।]
वर्णाश्रमाचार विधि प्रणीतेर्यं प्राप्य

6. साफल्यमियाय धाता ॥ [6]
हुतभुजि मखमध्यासङ्गिनि ध्वान्तनीलम्
वियति पवनजन्मभ्रान्तिविक्षेपभूयः ।
मुखरयति समन्तादुत्पतद्धूमजालम्
शिखिकुलमुरुमेघाशङ्कि यस्य

7. प्रसक्तम् ॥ [7]
तेनापीश्वरवर्म्मणः क्षितिपतेः क्षत्रप्रभावाश्रये (।)
जन्माकारि कृतात्मनः क्रतुगणेष्वाहूतवह्नेः द्विषः ।
यस्योत्खातकलिस्वभावचरितस्याचारमार्गं नृपा
यत्नेनापि ययाति—

तुल्ययशसो नान्येनुगन्तुं क्षमाः ॥ [8]

---

1. Read सैह्वी.
2. Ibid भीतैः

नीत्या शौर्यं विशालं सुहृदमकुठिनेनोमेच्छाङ्कुलेन[1] (।)
स्यागं पात्रेण वित्तप्रभवमपि हृया[2] यौवनं संयमेन [।]
वाचं सत्येन चेष्टां श्रुतिपथविधिना प्रश्रये-

9. णोत्तमर्द्धिम्
यो बह्वं[3] नव व्रजति कलिमयध्वान्तमग्नेपि लोके ॥ [9]
यस्येज्यास्वनिश यथाविधि हुतज्योतिर्ज्वलज्जन्मना (।)
[ध] मेनाञ्जनभङ्गमेचकरुचा दिक्चक्रवाले ततें।
आयाता नव—

10. वारिभारविनमन्मेघावली प्रावृडि-
स्युन्मादोद्धत चेतसः शिखिगणा वाचालतामाययुः ॥ [10]
तस्मात्सूर्य्य इवोदयाद्दिशिरसो धातुर्म्मरुत्वानिव
क्षीरोदादिव तर्जितेन्दुकिरण. कान्तप्रभः कौस्तुभः [।]

11. भूतानामुदपद्यत स्थितिकरः स्थेष्ठ महिम्नः पदम्
राजन्राजकमण्डलाम्बरशशी श्रीशानवर्म्मा नृपः ॥ [11]
लोकानामुपकारिणारिकुमुद व्यालुप्तकान्तिश्रिया (।)
मित्राम्याम्बुरुहा[4] गरद्युतिकृता भूरि—

12. प्रतापत्विषा।
येनाच्छादितसत्पथं कलियुगध्वान्तावमग्नजग-
त्सूर्येणेव समुद्यता कृतमिदं भूयः प्रवृत्तक्रियम् ॥ [12]
जित्वाम्भाधिपतिं सहस्रगणितत्रेधाश्वरद्वारणम्
व्यावल्गन्निधुनाति—

13 संख्यतुरगान्भङ्गा रणे शूलिकाम्[5] [।]
कृत्वा चायतिमौचित[6] स्थलभुवो गौडान्समुद्राश्रया-
नध्यासिष्ट नतक्षितीशचरणः सिङ्हासनं[7] यो जितौ ॥ [13]
प्रस्थानेषु बलार्णवाभिगमनक्षोभस्फुटद्भूतल-

14. प्रोद्भूतस्थगितार्कमण्डलरुचा दिग्व्यापिना रेणुना।
यस्यामृढदिनादिमध्यविरतौ लोकेन्धकारीकृते (।)
व्यक्ति नाडिकयैव यान्ति जयिनो यामास्त्रियामास्विव ॥ [14]
प्रविशती कलिमारुत घट्टिता

15. क्षितिरलक्षयरसातलवारिधौ।
गुणशतैरवबध्य समन्ततः
स्फुटितनौरिव येन बलाद्धृता[8] ॥ [15]

---

1. H P. Śastri corrects मकुटिलेनोत्तमोर्व्वीङ्कुलेन.
2. Read हिया.
3. Ibid बन्धनैव.
4. Read रुहाकर.
5. Ibid शूलिकान्.
6. Ibid मौचित.
7. Ibid सिंहासनं.
8. Ibid बलाद्धृता.

ज्याघातव्रणरूढिकर्कशभुजा व्याकृष्टशार्ङ्गच्युता-
न्यस्या वाप्य पतत्रिणो रणमखे प्राणानमुञ्च-

16 न्निषुः ।
यस्मिन्शासति च क्षितिं क्षितिपतौ जातेव भूयस्त्रयी (।)
तेन ध्वस्तकलिप्रवृत्तितिमिरः श्रीसूर्यवर्म्माजनि ॥ [16]
यो बालेन्दुसकान्ति कृत्स्नभुवनप्रेयो दधद्यौवनम्
शान्तः शास्त्रविचारणा-

17. हितमनाः पारङ्गलानाङ्कितः ।
लक्ष्मीकीर्त्तिसरस्वतीप्रभृतयो यं स्पर्धयेवाश्रिता
लोके कामितकामिभावरसिकः कान्ताजनो भूयसा ॥ [17]
सद्वृत्तेन बलारफलेखन[1] तितावस्प्रवृद्धात्मनो
बाणै—

18. स्तावदवस्थितं स्मृतिभुवः कान्ताशरीरक्षतौ (।)
लक्ष्म्या तावदकाण्डभङ्गजभयं त्यक्तम्परापाश्रयम् [।]
यावन्नाविरकारि यस्य जनताकान्त वपुर्व्वेधसा ॥ [18]
लक्ष्मयः शत्रुभुवः कुचग्रहभयावेशभ्रम-

19. क्लोचना (।)
येनाकृष्य भुजेन विस्फुरदसिज्योतिः कलासङ्गिना
कान्ता मन्मथिनेव कामितविदा गाढ निपीड्योरसा (।)
प्रायेणान्यमनुष्यसंश्रयकृत भावं परित्याजिता ॥ [19]
तेनानतोन्नतिकृता

20. मृगयागतेन
दृष्ट्वाद्यमन्धकभिदो भवनं विशीर्णम् [।]
स्वैरेच्छासमुन्नतमकारि ललाम भूमेः
क्षेमेश्वरप्रथितनाम शशाङ्कशुभ्रम् ।
एकादशातिरिक्तेषु षट्सु शातितविद्विषि ।
शतेषु शरदां

21. पत्यौ भुवः श्रीशानवर्म्मणि ॥ [21]
यस्मिन्कालेम्बुवाहा नवगवलरुचः प्रान्तलम्बेन्द्रचापा-
स्तन्वन्त्याशावितानं स्फुरदुरुतडितः सान्द्रधीरं क्वणन्तः ।
वाताश्च वान्ति नीपार्जुनकुसुमचयानम्रमूर्ध्नो

22. धुनाना—
स्तस्मिन्मुक्ताम्बुमेघद्युति भवनमदो निर्म्मितं शूलपाणेः ॥ [52]
कुमारशान्तेः पुत्रेण गर्गराकटवासिना ।
नृपानुरागात्पूर्व्वं[2] यमकारि रविशान्तिना ॥ [23]
उत्कीर्णा मिहिरवर्म्मणा

---

1 Read रवनतिरताव. 2 Read ब्र्वं.

35. BANSKHERA COPPER PLATE OF HARṢAVARDHAN.

Prov. : Banskhera, Sahjahanpur, U. P.
Date : 22 of an unspecified era; C. 628 A. D.
Lang. : Sanskrit; **Scr.** : Northern Brāhmī.
Ref. : Buhler, *Ep. Ind.* IV. pp. 208–12.

Text

1. श्रीस्वस्तिमहानौहस्त्यश्वजयस्कन्धावाराच्छ्रीवर्द्धमानकोट्या महाराजश्रीनर-
वर्द्धनस्तस्य पुत्रस्तत्पादानुध्यातश्रीवज्रिणीदेव्यामुत्पन्न ✕परमादित्यभक्तो
महाराजश्रीराज्यवर्द्धनस्तस्यपुत्रस्तत्पादानु–
2. ध्यातश्रीमदप्सरोदेव्यामुत्पन्न ✕ परमादित्यभक्तो महाराजश्रीमदादित्य-
वर्द्धनस्तस्य पुत्रस्तत्पादानुध्यातश्रीमहासे [न] गुप्तादेव्यामुत्पन्नश्चतुस्स-
मुद्रान्तिक्रान्तकीर्त्ति ✕ प्रतापानुरागोप–
3 नतान्यराजो वर्ण्णाश्रमव्यवस्थापनप्रवृत्तचक्र[1] एकचक्करथ इव प्रजाना-
मार्त्तिहर ✕ परमादित्यभक्त ✕ परमभट्टारकमहाराजाधिराज श्रीप्र [भा]
कर [व] र्द्ध [न] स्तस्य पुत्रस्तत्पा [दा]–
4 नुध्यातस्मितयश ✕ प्रतानविच्छुरितसकलभुवनमण्डल ✕ परिगृहीत
धनदवरुणेन्द्रप्रभृतिलोकपालतेजास्सत्पथोपार्जितानेकद्रविणभूमिप्रदा–
[नसं] प्रीणितार्थिहृदयो–
5. तिशयितपूर्व्वराजचरितो देव्याममलयशोमत्यां श्रीयशोमत्यामुत्पन्न ✕
परमसौगत[2]स्सुगत इव परहितैकरत ✕ परमभट्टारकमहाराजाधिराज-
श्रीराज्यवर्द्धनः। राजानो युधि दु–
6. ष्टवाजिन इव श्रीदेवगुप्तादयः कृत्वा येन कशाप्रहारविमुखास्सर्व्वे समं
संयताः। उत्खाय द्विषतो विजित्य वसुधाङ्कृत्वा प्रजानां प्रियं प्राणानुज्झित-
वानरातिभवने[3] सत्यानुरोधेन यः। तस्या–
7. [नुजस्त] स्पादानुध्यात ✕ परममाहेश्वरो महेश्वर इव सर्व्वसत्वानुकम्पी

---

1 Read वर्ण···

2. परमसौगत is a Buddhist sectarian title. सुगत is one of the epithets of the Budha.

3 Cf. one passage in the Harsacharita (Cal. ed. p 436) : गौडाधिपेन मिथ्योपचारोपचितविश्वास मुक्तशस्त्रमेकाकिन विश्रब्धं स्वभवन एव भ्रातर व्यापदितमश्रौषीत्. Saṅkarārya commenting on this writes :

तथा हि तेन शशांकेन विश्वासार्थं कन्याप्रदानम् उक्त्वा प्रलोभितो
राज्यवर्द्धनः स्वगेहे सानुचरो भुंजानएव छद्मना व्यापादितः ॥

परमभट्टारकमहाराजाधिराजश्रीहर्षः अहिच्छत्रा[1]भुक्तावङ्गदीयवैषयिक-
पश्चिमपथक स [ग्रद्ध] मर्कटसा-

8. गरे[2] [स] मुपगतान्महासामन्तमहाराजदौस्साधसाधनिकप्रमातारराज-
स्थानीय कुमारामात्योपरिकविषयपतिभटचाटसेवकादीन्प्रतिवासिज्ञान-
पदांश्च समाज्ञापय [ति विदित] म-

9. [स्तु] यथायमुपरिलिखितग्रामस्त्वसीमापर्यन्तस्सोद्रङ्गस्सर्व्वराजकुला
भाव्यप्रत्यायसमेतस्सर्व्वपरिहृतपरिहारो विषया [दु] द्धृतपिण्ड ✕ पुत्र
पौत्रानुगश्चन्द्रार्क्कक्षितिसमका-

10. [ली] नो भूमिच्छिद्रन्यायेन मया पितु ✕ परमभट्टारकमहाराजाधिरा-
जश्रीप्रभाकरवर्द्धनदेवस्य मातुर्भट्टारिकामहादेवीराज्ञीश्रीयशोमतीदेव्या
ज्येष्ठभ्रातृपरमभट्टारक-

11. महाराजाधिराजश्रीराज्यवर्द्धनदेवपादानाञ्च पुण्ययशोभिवृद्धये भरद्वाज-
सगोत्रवह्वृचच्छन्दोगमब्रह्मचारिभट्टबालचन्द्रभद्रस्वामिभ्यां प्रतिग्रह-
धर्म्मणाप्रहारत्वेन प्रतिपा-

12. दितो विदित्वा भवद्भिस्समनुमन्तव्य ✕ प्रतिवासिजानपदैरप्याज्ञाश्रवण-
विधेयैर्भूत्वा यथासमुचिततुल्यमेयभागभोगकरहिरण्यादिप्रत्याया एतयो-
रेवोपनेयास्सेवोपस्थान [ञ्च] क-

13. रणीयमित्यपि च ।
अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयं ।
लक्ष्मयास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयश ✕ परिपालनञ्च ।
कर्म्मणा म-

14. मनसा वाचा कर्त्तव्यं प्राणिभिर्हितं ।
हर्षेणैतत्समाख्यातन्धर्म्मार्जनमनुत्तमं [।]
दूतकोत्रमहाप्रमातारमहासामन्तश्रीस्कन्दगुप्तः महाक्ष-

---

1 The name is written both as अहिक्षेत्र as well as अहिच्छत्र (serpent's umbrella) The latter seems to be the correct form (Cunningham : Ancient Geography, S. N Majumdar's ed. p. 412). It is identified with modern Rāmnagar in the Bareilly District. It was the capital of northern Pañchāla, Kāmpilya being the capital of Southern Pañchāla (For detail see B. C. Law, Historical Geography, p. 63 ff ; see also *Ep Ind* Vol XIV p. 269).

2. This मर्कटसागर is yet unidentified.

पटला[1]धिकरणाधिकृतमहासामन्तम-
15. हाराज [भान] समादेशाद्युत्कीर्ण्णं
16. ईश्वरेणेदमिति सम्वत् २० २
17. कार्त्ति वदि १ [।]
18. स्वहस्तो मम महाराजाधिराजश्रीहर्षस्य [॥]

GANJĀM PLATES OF THE RIEGN OF SAŚĀṄKARĀJA.

Prov. : Ganjam,
Date : G. E. 300 (=619 A. D.).
Lang. : Sanskrit ;
Scr. Nail-headed Brāhmi of the Northern class.
Ref. : Hultzsch *Ep. Ind.* Vol. VI.p. 144 ff.

Text

First Plate

1. ओं[2] स्वस्ति । चतुरुदधिसलिलवीचीमेखलानिलीनायां सद्वीपा—
2. गरपत्तनवस्या[3] वसुन्धरायां गौसाब्दे[4] वर्षशतत्रये वर्त्तमाने
3. महाराजाधिराज[5]श्रीशशाङ्कराज्ये शासति गगनतल—
4. विनि [:] सृतभगीरथावतारिताया हिमवद्गिरेरुपरि-
5. पतनादनेकशिलासंहातविभिन्नवहि×पातालात्तर्ज[6]लौघैः
6. सुरसरित इव विविधतरुवरकुसुमसञ्छन्नोभयतटा-

Second Plate : First Side

7. न्त विनिपतितजलाशयायाः श [।] लिमासरितः कुला[7] [प] कण्ठा-
8. द्वेजयकोङ्के[8]दात्महाराजमहासामन्तश्रीमाधवराजस्य प्रियतनयो
9. महाराज यशोभीतस्तस्यापि प्रियसूनुः स्वगुण [म] रीचिनिकर-
10. प्रबोधित[9]शिलोन्नवकुलकमलो विकोशनीलोत्पल-

---

1. अक्षपटलिक is the technical title denoting the keeper of the records : Monier Williams Sanskrit-English Dictionary gives the meaning of the अक्षपटल as a court of law, a depositary of legal documents (See Second. ed. p 3).
2. Expressed by a scymbol
3. Hultzsch read सहीपन गिरि पत्तन वत्यां.
4. Ibid गौसाब्दे.
5. Ibid राज श्रीशशाङ्कराजे.
6. Ibid संघात विभिन्न व्रहिष्यति तान्तर्जलौघायाः.
7. Ibid कूलोप—
8. Ibid विजयकोङ्गेदाम्महा—
9. Ibid —प्रबोधित—

11. प्रतिस्पर्द्धि(नी) खड्गधारानिधि[1]तनिश्शेषप्रतिहतरिपु[2]·
12. वलो[3] दीनानाथकृपणवनीपकोपभुज्यमानविभवः स्वभु·
13. जपरिघयुगलोपार्जितनृपश्री [:] कमलविमलरुथर[4]·

Second Plate : Second Side

14. तनुर्ज्जगन्म [ण्ड] लमण्डनश्रुतशौर्यधैर्यगुणान्वितो महावृषभपर्यङ्क-
15. ककुधोपधानविन्यस्तवाहोर्व्वलचन्द्रोद्योतित[5]जटाकलापैकदे
16 शस्य भगवतस्स्थित्युत्पत्तिप्रलयसृष्टिसंहार[6]कारणस्य
17. तृभुवन[7]गुरोरपादभक्तः परमब्रह्मण्यो[8] महाराजमहासा-
18. मन्तश्रीमाधवराजः कुशली कृष्ण[9]गिरिविषयसंवद्ध[10]च्छवल
19. कखयग्रामे वर्त्तमानभविष्य[11]ककुमारामास्योपरिकतदायुक्तकानन्याश्च[12]
20. यथाहि[13] पूजयति मानयति च [।] विदितमस्तु भवतामयं ग्रामो·

Third Plate : First Side

21. स्माभिरर्द्धेण[14] मातापित्रोरात्मनश्च पुण्याभिवृद्धये सलिलधारापुर-
22 स्सरेण[15]चन्द्रार्कसमकालीनाक्षय[16]नीयेभरद्वाजसगोत्रायाङ्गि·
23. रसवार्हस्पत्य[17]प्रवराय छरम्पस्वामिने सूर्योपरागे प्रतिपादित [:] ॥
24. उक्तञ्च स्मृतिशास्त्रे ।
वहुर्व्वसुधा[18] दत्ता राजभिस्सगरादिभिः [।]
25. यस्य यस्य यदा भूमिस्तस्य[19] तस्य तदा फलं ॥
षष्टिं वर्षसहस्रा—
26. णि स्वर्गे मोदति भूमिद· [।]
आच्छेत्ता चानुमन्ता च तान्येव नरके
27. वसे [त्] ॥
स्वदत्तां परद[20]त्तां वा (।) यो हरेत वसुन्धरा [म् ।]
स विष्ठायां

---

1. Ibid खड्ग धार ought to come after निशित.
2. In Hultzsch's opinion प्रतिह ought to have come before (निश्शेष) but there is nothing inconvenient in it
3. Ibid वलो. 4. Ibid रुचिर—
5. Hultzsch ककुकोदोपधान विन्यस्त वाहोवलि चन्द्रोदद्योतित—
6. Ibid सहार. 7. Ibid त्रिभुवन. 8 Ibid ब्रह्मण्यो.
9. According to Hultzsch कृष्णगिरि might be identical with its synonym नीलगिरि which is a name of Jagannath (Puri) in Orissa. (*Ep Ind* p 144.)
10. Hultzsch गत . 11. Ibid भविष्यत्कु— 12. Ibid न्याश्च.
13. Ibid यथाहं 14. Ibid र्द्धे— 15. Ibid स्मरण—
16. Ibid नीनोक्षयणीयो— 17. Ibid बार्हस्पत्य 18 Ibid बहु
19. Ibid भूमिस्थस्य 20. Ibid स्वदत्तां परदत्तां वा

Third Plate : Second Side.

28. [कृमि] र्भूत्वा पितृभिस्सह पच्यते ॥
मा भुत[1]फलशङ्का व [:] परदत्ते-

29. ति पार्थिव [ा:] ॥ स्वदाना [त्] फलमानन्त्य[2] (॥) परद
[त्तानुपालने] ॥ · · ·

30. .... · ·

31. [प्र] यच्छति ॥

APHSAD STONE INSCRIPTION OF ĀDITYASENA.

Prov. · Aphsad, Nawādā Subdivison, Gaya district, Bihar.
Date C. 672 A. D.
Lang. Sanskrit; **Scr.** : Northern Brāhmī.
Ref. Cunningham, *Arch, Sur. Ind.* Vol. XV. pp. 11.
Fleet. *C. I. I.* III. p. 200 ff.

Text

1. ओम् [॥]
आग्नीद्दन्तिसहस्रगाढकटको विद्याधरा[3]ध्यासितः
सद्वंशः स्थिर उन्नतो गिरिरिव श्रीकृष्णगुप्तो नृपः ।
दृप्तारातिमदान्धवारणघटाकुम्भस्थलीः क्षुन्दता
यस्यासंख्य रिपुप्रतापजयिना दोष्णा मृगेन्द्रायितम् ॥ [1]
सकलः कलङ्करहितः

2. क्षततिमिरस्तोयधेः शशाङ्क इव ।
तस्मादुदपादि सुतो देवः श्रीहर्षगुप्त इति ॥ [2]
यो योग्याकालहेलावननदृढधनुर्भीमबाणौघपाती
भूर्ं [त]ैः स्वस्वामिलक्ष्मीवसति विमुखितैरीक्षितः सानुपातं ।
घोराणामा-

3. हवानां लिखितमिव जयं श्लाघ्यमाविर्दधानो
वक्षस्युद्दामशस्त्र-व्रण-कठिनकिणग्रन्थिलेखाच्छलेन ॥ [3]
श्रीजीवितगुप्तोभूच्चितीशचूडामणिः सुतस्तस्य ।

---

1. Ibid भूद्फल 2. Ibid नन्त्य—

3. The opening verse is a fine example of pun.
विद्याधरा : are semi-divine beings, here the word also means the learned men. सद्वंश born in a good family, also good bamboo tree.

यो दृप्तवैरिनारीमुखनलिनवनैकशिशिरकरः[1] ॥ [4]
4. मुक्तामुक्तपयः प्रवाहशिशिरासूत्तुङ्गतालीवन-
आर्य्यहन्तिकरावलूनकदलीकाण्डासु वेलास्वपि ।
श्वेतोत्स्फारतुषारनिर्झरपयः शीतेपि शैले स्थिता-
न्यस्योर्द्धिषतो मुमोच
5. न महाघोरः प्रतापज्वरः ॥ [5]
यस्यातिमानुषं कर्म्म दृश्यते विस्मयाजनौघेन ।
अद्यापि कोशवर्द्धन[2]तटाप्लुतं पवनजस्येव[3] ॥ [6]
प्रख्यातशक्तिमाजिषु पुरःसरं श्रीकुमा-
6. रगुप्तमिति ।
अजनयदेकं स नृपो हर इव शिखिवाहन[4] तनयम् ॥ [7]
उत्सर्प्पद्वातहेलाचलितकदलिकावीचि मालावितानः
प्रोद्यद्बृलीजलौघभ्रमितगुरुमहामत्त-
7. मातगशैलः ।
भीमः श्रीशानवर्म्मक्षितिपतिशशिनः सैन्यदुग्धोदसिन्धु-
र्लक्ष्मीसंप्राप्तिहेतुः सपदि विमथितो मन्दरीभूय[5] येन ॥ [8]
शौर्यसत्यव्रतधरो यः प्रयाग गतो ध-
8. न्ये ।
अग्भसीव करीषाग्नौ मग्नः स पुष्पपूजितः ॥ [9]

---

1. Cf. दानवाङ्गनामुखाम्भोजलक्ष्मी तुषारेण विष्णुना in the line 2 of Tusam inscription (*C I I.* III p. 270).
2. Another mention of the mountain कोशवर्द्धन is in line 17 of the Shergarh (Kota) inscription (*Ind Ant* vol. XIV. P. 46). This mountain is not found mentioned in the Puranic literature or the Rāmāyaṇa.
3. The allusion here is to Hanumān, one of the famous semi-divine Zoomorphic god, who took several famous leaps; one he made from the mainland to Ceylon in order to search Sītā, another back form Ceylon, a third leap was taken when he went to Gandhamādan Parvata to obtain 'Sañjīvanī herb' Which of these leaps is alluded to here is difficult to say.
4. शिखिवाहन is a synonym of कार्त्तिकेय or कुमार since he rides on a peacock. Hence the conparison between Rama and Kumārgupta.
5. The allusion is to the churning of the ocean by gods, in which Mandara was utilised as the churning stick and during the process लक्ष्मी sprang up from the sea (see Vishnu P. 1-9-76; हर्षचरित p. 227).

श्रीदामोदरगुप्तोभूत्तनयस्तस्य भूपतेः ।
येन दामोदरेणेव दैत्या इव हता द्विषः ॥ [10]
यो मौखरैः समितिषूद्ध-
9. तहूणसैन्या-
वल्गद्धटा विघटयन्नरुवारणानां ।
समूर्च्छितः सुर-वधु (धू) वरयं (यन्) ममेति
तत्पा[ि]णपङ्कजसुखस्पर्शाद्विबु (बु) द्धः ॥ [11]
गुणवद्भि [द्द्भि] ज कन्याना [ं] नानालंकारयौवन-
10. वतीनां ।
परिणायितवान्स नृपः शतं निसृष्टाग्रहाराणां ॥ [12]
श्र [ी] महासेनगुप्तोभूत्तस्माद्वीराग्रणी [:] सुतः ।
सर्व्ववीरसमाजेषु लेभे यो धुरि वीरता [ं] [॥] [13]
श्र [ी] मत्सुस्थितवर्म्मयुद्धविजय-
11. श्लाघापदाङ्कं मुहु-
र्यस्याद्यापि विबुद्धकुन्दकुमुदक्षुण्णाच्छहार [ँ] त [ं] ।
लौहित्यस्य तट [ॅ] षु श [ी] तलतल [ॅ] ध्वं स्फ [ु] ण [ल]
न्नागद्र [ु] म-
च्छायासुप्तविबु (बु) द्ध [ि] सद्ध [ि] म थुन [ै] : स्फ [ी] तं
यशो गीयते ॥ [14]
वसुदेवा-
12. दिव तस्माच्छ्रीस (ॅ) वन [शो] भ [ी] दितचरणयुग ।
श्रीमाधवगुप्तोभून्माधव इव विक्रमैकरस [: ॥] [15]
[— — —ᴗ अ] नुस्म [ृ] तो धुरि रण [ॅ] श्लाघावतामग्रण [ी] :
सो (सौ) जन्यस्य निधानमर्थनिध (ध)-
13. य स्यागो [द्] धुराणा ध (ब) र [:] ।
लक्ष्म [ी] स [स्यस] रस्वतीकुलगृह [ं] धर्मस्य सेतुर्दृढः
पूज्यो नास्ति[न] स भ [ू] तल [ॅ] [ᴗ —ᴗ — — —ᴗ] [-]
सद्गुण [ै :] ॥ [16]
चक्र [ं] पाणितलेन सोप्युदवहत्तस्यापि शार्ङ्ग [ं][1] धनु-
14. र्नाशायासुहृदा [ं] सुखाय सुहृदाम् तस्याप्यसिर्नन्दकः ।
प्राहे विद्विषतां वधे प्रतिहत [—]तेनाप [— —ᴗ— — — —
ᴗ ᴗ—ᴗ— ढरिम [— —] न्याः प्रणेभुर्जनाः ॥ [17]
आजौ मया विनिहता व (ब)
15. लिनो द्विषन [तः]
कृत्य [ं] न म [ॅ] स्त्यपरमित्यवधार्य वीरः [।]

1. The discus (चक्र), the bow शार्ङ्ग, and the sword Nandaka (नन्दक) of Vishṇu (Mādhava) have been alluded to here.

श्रीहर्षदेव[1] निज स ['] गमवाञ्छया च
[— —ᴗ—ᴗ ᴗ ᴗ—ᴗ ᴗ—ᴗ— —] [॥] [18]
श्र [्]ी मान्व (ब) भूव दलितारिकरीन्द्रकुम्भमुक्तारजः[2]-

16. पटलपांसुलमण्डलाग्रः ।
आदित्येन इति तत्तनयः क्षितीश-
चूडाम [ि] णर्द [ᴗ ᴗ—ᴗ ᴗ—ᴗ— —] [॥] [19]
[— — —ᴗ ᴗ—ᴗ] भागतमरिध्वंसोऽसमासं यशः श्लाघ्यं

17 मर्त्यधनुष्मतां पुर इति श्लाघं [।] परां वि (बि) भ्रती ।
आशीर्व्वाद परम्परा चिरसकृद् [— —ᴗ— —ᴗ— — — —ᴗ ᴗ
—ᴗ—ᴗ ᴗ ᴗ— — —ᴗ] यामासम् [20]
आजौ स्वेदच्छलेन ध्व-

18. जपटशिखया मार्ज्जतो दानपङ्कं
खड्गं क्षुण्णेन मुक्ताशकलसिकतिल [ि] कृत्य [— —ᴗ— — —
— — — — — — — — — — मर [त] मात ['] ग घातं
तद्गन्धाकृष्टमर्प्पद्ध (द्ध)-

19. हलपरिमलभ्रान्त (न्त) मत्तालिजालं ॥ [21]
आव (ब) द्धभीमविकटभ्रुकुटी कठोर-
स ['] ग् [रण] ाम [—ᴗ ᴗ ᴗ—ᴗ ᴗ—ᴗ— — ।
— —ᴗ—ᴗ ᴗ] ववल्लभभृत्यवर्ग-
गोष्ठीषु पेश-

20. लतया परिहासशीलः [22]
सत्यभर्त्तव्रता यस्य मुखोपध [ा] न तापसी ।
प [ि] रहास [—ᴗ— — — — — —ᴗ—ᴗ—] [॥] [23]
[— — — —ᴗ—] सकलरिपुव (ब) ल ध्वंसहेतुर्गरी-

21. या-
न्निस्त्रिंशोत्खातघातश्रमजनित जड़ोष्मूर्ज्जितस्वप्रतापः ।
युद्धे मत्तेभ कुम्भस्थ [ल ᴗ ᴗ ᴗ ᴗ— —ᴗ— —ᴗ— — — —]
श्च [्] तातपद्मस्थगित वसुमतीमण्डलो लो-

22. कपालः [24]
आजौ मत्तगजेन्द्रकुम्भदलनस्फीतस्फुरद्दोर्युगो-

---

1 The reference here is to Harshavardhana of Kanauj. It seems that Mādhavagupta was a feudatory of Kanauj emperor, seeking alliance with him.

2 The belief to which there are constant allusions in Sanskrit poetry, was that there are pearls to be found inside the foreheads of elephants. (*C I I* III p 207).

ध्वस्तानेक रिपुप्रभाव व [⏑ ⏑— — —] यशोमण्डलः ।
न्यस्ताशेषनरेन्द्रमौलिचरणस्फारप्रतापान·

23. लो
लक्ष्मीवान्समराभिमानविमलप्रख्यातकीर्त्तिर्नृपः ॥ [25]
येनेयं शरदिन्दुबिम्बधवला प्रख्यातभूमण्डला
लक्ष्मी संगमकांक्षया सुमहती कीर्त्तिश्चिरं कोपिता ।
याता सा·

24. गरपारमद्भुततमा सापत्न्यवैरादहो
तेनेदं भवनोत्तम क्षितिभुजा विष्णोः कृते कारितं [26]
तज्जनन्या महादेव्या श्रीमत्या कारितो मठः ।
धार्मिकस्य स्वयंदत्तः सुरलो-

25. कगृहोपमः ॥ [27]
शंखेन्दुस्फटिक प्रभा प्रतिसमरफारस्फुरच्छीकरं
नक्रक्रान्तिचलत्तरङ्ग विलसत्पक्षिप्रनृत्यत्तिमि
राज्ञा खानितमद्भुतं सुतपसा पेपीयमानं

26. जनै-
स्तस्यैव प्रियभार्यया नरपतेः श्रीकोणदेव्या सरः [28]
यावच्चन्द्रकला हरस्य शिरसि श्रीः शार्ङ्गिनो वक्षसि
ब्र (ब्र) ह्मास्ये च सरस्वती कृत

27. [⏑— — —⏑— —⏑—] ।
[भोगे] भूर्भुजगाधिपस्य च तडिद्यावद्भनस्योदरे
तावत्कीर्त्तिमिहातनोति धवलामादित्यसेनोनृपः [29]
सूक्ष्मशिवेन गौडेन प्रशस्तिर्व्विकटाक्षरा ॥ (।

28. [— — —] मामिता सम्यग्धार्म्मिकेण सुधीमता [30]

DEO-BARNARK INSCRIPTION OF JĪVITAGUPTA. II

Prov. : Deo-Barnark or Deva-Barnark Cave, Varunika Shahabad dist., Bihar.
Date . 695–715 A. D.
Lang. : Sanskrit ; **Scr.** : Northern Brāhmī
Ref. : G. Cunningham. *Arch-Sur. Ind. Ant.* Vol. XVI. pp. 68–73, Fleet, *C. I. I.* III. p. 215 ff.

Text

1. .....[1][न] मः [॥] स्वस्ति शक्तित्रयोपास्तजयशब्दान्महानौहा (ह)
स्त्यश्वपत्तिसम्भारदुर्निवाराज्जयस्कन्धावारात् गोमतिकोद्दकसमीपवास-

2. [कात्] ....[2][श्रीमाधव] गुप्तस्तस्य पुत्रस्तत्पादानुध्यातः
परमभट्टारिकायां राज्ञ्यां महादेव्यां श्रीश्रीमत्यामुत्पन्नः परमभागवतः
श्री आदित्य [3][से]-

3. [नदेवस्तस्य] पु [त्र] स्तत्पादानुध्यातः परमभट्टारिकायां राज्ञ्यां
महादेव्यां श्रीकोणद [`] व्यामुत्पन्नः परममाहेश्वरपरमभट्टारकमहार
[ा] ज [ा]-

4. [धिराज परमेश्वर] श्रीद [` ] वगुप्तद [ `] वस्तस्य पुत्रस्तत्पादानु-
ध्यातः परमभट्टारिकारिकाया [` ] राज्ञ्या [ `] महादेव्या [`] श्रीकमल[4]
देव्यामुत्पन्नः परममाहे-

5. [श्वरपरममट्टारक म] हाराजा [धि] राज परमेश्वर श्री विष्णुगुप्तदेव-
स्तस्य पुत्रस्तत्पादानुध्यातः परमभट्टारिकाया [` ] राज्ञ्या [ `] महा-
देव्या [`] श्री इज्जादे[5] [व्या]-

6. [मुत्पन्नः परम ..... परम] भट्टारकमहाराजाधिराज परमेश्वर-
श्रीजीवित[6]गुप्तदेव [:] कुशली नगरभ [ु] क्तौ वालवीवैषयिक-
श्रीवा (वो)-

7. .. .. पद्रलिका (क्षा) न्तप्पातिव [ा] रुणिकाग्राम-
गोष्ठ [ा] नकुल तलावाटकदूतसीमकर्मकरमद्या

8 ....तकराजपुत्रराजामात्र[7]महा... क्षतिकमहादण्डनायक-
महाप्रतीहारमह [ा] सा

9. .... प्रमातसा... ..क [ु] म [ा] रामात्यराजस्थानीयो
परिक .. धिक चौरोद्धरणिकदाण्डिकद (दा) ण्ड

---

1 Bhagwanlal Indraji suggested here वरुणवासी भट्टारकाय, but as Dr. Fleet rightly suggested, only about five Aksharas, or at the most six, appear to have been destroyed.

2 Dr Fleet (*C I I* III p 215) suggested that some sectarian title of Mādhavagupta must have been lost here, but there is no room for परमभागवत or परममाहेश्वर in the line.

3. Fleet : आदित्य — 4 Bhagwanlal Indraji, कुमार—

5. Fleet श्रीज्जा—

6. Bhagawanlal Indraji read सपित्, but, as suggested by Fleet and also recognised by Gen Cunningham (*Arch Srv Ind.* vol. XVI pp. VIII 68), the three aksharas are distinctly Jivita.

7. Fleet's suggestion is राजामात्य.

10. [पाशिक]·····क·····र्ण्णिवलव्यायतकिशोखाटक ग्[र]ा
मह·····द्···त···यणिकग···पतिकर्म-
11. ·····रसक····· ····· तास्म ः[प]ादप्रसादोपजीविनश्च
प्रतिव [ा] सिनश्च ब्रा [ब्रा] ह्मणोत्तरा [न्] महत्तरक (कु) लिपुर-
12. ·····विज्ञापित श्रीवरुणवासि भट्टारक प्रतिव (ब)
द्धभोजक[1] सूर्यमिश्रेण उपरिलिखि-
13. [त]·····ग्रामादि संयुतं परमेश्वरश्रीवा (बा) लादित्य-
देवेन[2] स्वशासनेन भगवश्री[3]वरुणवासिभट्टारक···
14.·····क·····व परिवाहक··· ·····भोजकहन्समिश्रस्य
समापर [ः] या यथाकालाध्यासिभिश्च एवं परमेश्वर-
15. श्रीशर्व्व वर्म्म····· ····· ··· ·· ···भोजकरिषि[4]मिश्र·····यतकं एवं
परमेश्वरश्री [म] दवन्तिवर्म्मणा पूर्व्वदत्तकमवल-
16. [म्य]· · · · ··एवं मह [ा] रा [जाधिरा] ज परमेश्वर· ·····
शासनदानेन भोजकदुर्द्धरमिश्रस्यानुमो-
17. [दित]·····तेन भुज्यते [।] तदहस्किमपि·····एवं·····
मतिमान्· ····आनुपा (मो) दितमिति सर्व्व समाज्ञापना [।] एता
18. ····· ····· ·····पयु·····
वरुणवास्यायतनं तदनु दत्तम् ·····
19. ·····त्यच्च·····
सोद्रङ्गं सोपरिकरं सदशापराधपञ्च·· ·····
20. ····· [॥]

NĀLANDĀ STONE INSCRIPTION OF YAŚOVARMADEVA.

Prov. : Nalandā , (Modern Bargaon), Dist.Patna, Bihar.
Date : C. 725 A. D.
Lang. : Sanskrit ; **Scr.** : Northern Brāhmī.
Ref. : Hirānand Śastri. *Ep. Ind.* XX. pp.37–46.

---

1. Monier Williams, in his Sanskrit-English Dictinary explained भोजक to denote 'a class of preists or sun-worshippers, supposed to be deseended from the Magas by intermaniage with the women of the Bhoja race Childers, in his Pali Dictinary gives its meaning 'a village head-man'.
2. Is generally identifeid with नृसिंहगुप्त, a later Gupta king.
3. Fleet भगवच्छ्री.
4. Read भोजकऋषि or भोजकर्षि as is the usual form.

Text

1. [1]संसारस्थिरव (ब) न्धनात्कृतमतिर्मोक्षाय यो देहिनां
कारुण्यात्प्रसभं शरीरमपि यो दत्वा तुतोषार्थिने [।]
सेन्द्रैर्यः स्वशिरः किरीटमकरी घृष्टांहि-
2. पद्मः सुरै·
स्तस्मै सर्व्वपदार्थतत्त्वविदुषे बु (बु) द्धाय नित्यं नमः ॥ [1 ॥]
सर्व्वेषां मूर्ध्नि दत्वा पदमवनिभृतामुद्गतो भूरिधामा
निर्ह्लिशांशुप्रतानप्रदलितनिखिलारातिघो·
3. रान्धकारः [।]
ख्यातो यो लोकपालः सकलवसुमतीपद्मिनी[2]वो (बो) धहेतुः
श्रीमान्भास्वानिवोच्चैस्तपति दिशिदिशि श्रीयशोवर्म्मदेव[3]ः ॥ [2 ॥]
तस्यासौ परमप्रसादम
4. हितः श्रीमानुदाराशयः
पुत्रो मार्गपतेः प्रतीततिकिनोदीचीपनेर्मन्त्रिणः [।]
मालादो भुवि नन्दनोरिदमनो यो व (ब) न्धुमत्यास्सुधी·
र्दीनाशापरिपूरणै-
5. कचतुरो धीरो विशुद्धान्वयः ॥ [3 ॥]
यासावूर्जितवैरिभूप्रविगलद्दानाम्बु (म्बु) पानोल्लसन्
माद्यद्भृङ्गकरीन्द्रकुम्भदलन प्राप्तश्रियाम्भूभुजाम् ।
नालन्दा[4]ह·
6. सतीव सर्व्वनगरीः शुभ्राभ्रगौरस्फुर·
च्चैत्यांशु प्रकरोस्सदागमकलाविख्यातविद्वज्जना ॥ [4 ॥]
यस्यामम्बु (म्बु) धरावलेहिशिखरश्रेणी वि·
7. हारावली
मालेवोर्ध्वविराजिनी विरचिता धात्रा मनोज्ञा भुवः [।]
नानारत्नमयूखजालखचितप्रासाददेवालया
सद्विद्याधरसङ्ग
8. रम्यवसतिर्धत्ते सुमेरोः श्रियम् ॥ [5 ॥]
अत्रास [द्य] पराक्रमप्रणयिना जित्वाखिलान्विद्विषो
बा (बा) लादित्यमहानृपेण सकलम्भुक्त्वा च भूमण्डलम् [।]

---

1. Here is a symbol for either 'Om' or Siddham.
2. A type of woman. 3 He is यशोवर्मा of Kanyakubja.
4. The designation is certainly Nālandā and not Nālanda as it was sometimes supposed to be. The noun ending in short vowel occurs in *C. I. I.* III p. 210, Walleser M. The life of Nāgārjuna and Chinese Sources (Hultz Anniversary Volume, Leipzig pp. 15; Budhist Records of the Western World, pp. 167 etc.)

9. प्रासादः सुमहानयम्भगवतः शौद्धोदनेरद्भुतः
कैलासाभिभवेच्छयेव धवलो मन्ये समुत्थापितः ॥ [6 ॥]
अपि च ॥
न्यक्कुर्व्वन्निन्दुकान्तिन्तुहिनगि-
10. [1]रिशिरः श्रेणिशोभान्निरस्यन्
शुभ्रामाकाशगङ्गान्ततदनु मलिनयन्मूकयन्वादिसिन्धून् ।
मन्ये जेतव्य शून्ये भुवन इह वृथा भ्रान्तिरित्याक-
11. लय्य
भ्रान्त्वा श्रोणीमशेषाञ्जितविपुलयशस्तम्भ उच्चैस्स्थितो वा ॥ [7 ॥]
अन्नादायि निवेद्यमाज्यदधिमहीपस्तथा भासुर-
श्चातुर्जातकरेणुमिश्रममल-
12. न्तोयं सुधाशीतलं ।
साध्वी चाक्षयनीविका भगवते बु (बु) द्धाय शुद्धात्मने
मालादेन यथोक्तवंशयशसा तेनाति भक्त्या स्वयं ॥ [8 ॥]
आदेशात्स्फीतशीलश्रुतधवलधि-
13 यो भिक्षुसङ्घस्य भूयो
दत्तन्तेनैव सम्यग्व (ग्ब) हुघृतदधिभिर्य्यन्नैर्युक्तर्म (म) न्नं ।
भिक्षुभ्यस्तच्चतुर्भ्यो[2] [ष] ट्सुरभि चतुर्जातकामोदि नित्यं
तायं स [श्रे] विभक्तं पुनरपि
14. विमलं भिक्षुसङ्घाय दत्तम् ॥ [9 ॥]
तेनैवाद्भुतकर्म्मणा निजमिह क्रीत्वा [र्य] सङ्घान्तिका-
न्मुक्त्वा चीवरिकां प्रदाय विधिना सामान्यमेकन्तथा ।
कालम्प्रेरयितुं सुखे-
15. न लयनन्दत्तं स्वदेशम्विना
तेभ्यो नर्द्दरिकावधेश्च[3] परतः शाक्यात्मजेभ्यः पुनः ॥ [10 ॥]
दानं यदेतदमलङ्कुणशालिभिक्षु-
पूर्णेन्द्रसेनवचनप्रतिवो (बो) धितेन ।
तेन प्रतीत-

---

1. तुहिनगिरि or snow-mountain is obviously Himālaya.

2 The four fragrant articles are enumerated as (i) Tvak = Bamboo manna (ii) Elā ie cordemom (iii) Patraka, ie. Laurus Cassia and (iv) Nāgakeśare. cf. .—
त्वगेला पत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशर-संयुक्तं चतुर्जातकमुच्यते ॥
quoted from the Rājanighanta and the Bhāvaprakāśa in the Śabdakalpadruma.

3. Probably it meant some place for himself, if not his own country. What is the exact significance is not clear.

16. यशसा भुवि निर्म्मलाथा
भ्रात्रा व्यधायि शरदिन्दुनिभाननायाः ॥ [11 ॥]
पित्रोर्भ्रातुः कलत्रस्वसृसुतसुहृदान्तस्य धर्म्मैकधाम्नो
दत्तं दानं यदेतत्सकलमतिरसेनायुरा-
17. रोग्यहेतोः ।
सर्व्वेषाञ्जन्मभाजां भवभयजलधेः पारसंतारणार्थं
श्रीमत्सङ्घो (ङ्घो) धिकल्पद्रुमविपुलफलप्राप्तये चानुमोद्यम् ॥ [12॥]
चन्द्रो यावच्चकास्ति स्फुरदुरुकिरणो लो-
18. कदीपश्च भास्वान्
एषा यावच्च धात्री सजलधिवलया शैश्च दत्तावकाशा ।
यावच्चैते महान्तो भुवनभरधुरान्धारयन्तो महीध्रा-
स्तावच्चन्द्रावदाता धवलयतु दिशाम्म-
19. ण्डलं कीर्त्तिरेषा ॥ [13 ॥]
यो दानस्यास्य कश्चित्कृतजगदवधेरन्तरायं विदध्या
त्साक्षाद्वज्रासनस्थो[1] जिन[2] इह भगवानन्तरस्थः सदास्ते ।
वा (बा) लादित्येन[3] राज्ञा प्रदलितरि-
20. पुणा स्थापितश्चैष शास्ता
पञ्चानन्त [र्यं] कर्तुर्गतिमतिविषमान्धर्म्महीनः स यायात् ॥ [14 ॥]
इत्येवं शीलचन्द्रप्रथितकरणिकस्वामिदत्तावलङ्घ्यां
संज्ञाज्ञां मूर्ध्नि कृत्वा श्रुतलव-
21. विभवावप्यनालोच्यभारं ।
इत्थामेतामुदारां त्वरितमकुरुतामप्रधृष्यां प्रशस्तिं
वाञ्छेतां किञ्च पंगू शिखरितरुफलावाप्तिमुच्चैः करेण ॥ [15 ॥]

JODHPUR INSCRIPTION OF BĀUKA.

Prov. : Jodhpur, Rajasthān.
Date : C. 650 A. D.
Lang. : Sanskrit; **Scr.** : Northern Brāhmī.
Ref. : Munshi Devi Prasad *J. B. A. S.* 1894 pp. 1 ff.;
Dr. R. C. Majumdar, *E. I.* Vol. XVIII. p. 87 ff.

Text

1. ओं नमो विष्णवे ॥
य [स्मिन्विश] न्ति भूतानि यतस्सर्ग्गस्थिती मते ।
स वः पायाद्धृषीकेशो निर्ग्गुणस्सगुणश्च यः ॥ [1]
गुणाः पूर्व्वं पु (पू) रुषाणां की [र्त्यन्ते] तेन

1. वज्रासन is one of the yogic postures.
2. बुद्ध 3 One of the Gupta emperors.

2. पण्डितैः ।
गुणकीर्त्तिरनश्यन्ती स्वर्गवासकरी यतः ॥ [2]
अतः श्रीबाउको धीमां[1] स्वप्रतीहारवङ्शजां[2] ।
प्रशस्तौ लेखयामास श्रीयशो विक्रमान्वितान् ॥ [3]
स्वभ्राभ्रा रा-

3 मभद्रस्य प्रतिहार्यं कृतं यतः ।
श्री प्रतिहारवङ्शो[3]यमतश्चोन्नतिमाप्नुयात् । [। 4]
विप्रः श्रीहरिचन्द्राख्यः पत्नी भद्रा च क्षत्रिया[4] ।
ताभ्यान्तु [ये सु] ता जाताः [प्रतीहा] राश्च तान्वि-

4. दुः । [। 5]
बभूव रोहिल्लद्धयङ्को वेदशास्त्रार्थपारगः ।
द्विजः श्रीहरिचन्द्राख्यः प्रजापतिसमो गुरुः ॥ [6]
तेन श्रीहरिचन्द्रेण परिणीता द्विजात्मजा ।
[द्वि] तीया क्षत्तृ-

5. या भद्रा महाकुलगुणान्विता[5] [॥ 7]
प्रतीहारा द्विजा भूता ब्राह्मण्यां ये भवन्सुताः ।
राज्ञी भद्रा च यांस्सूते ते भूता मधुपायिनः । [। 8]
चत्वार [श्] चात्मजास्तस्यां जाता भूधरणक्ष-

6. माः ।
श्रीमान्भोगभटः कक्को रज्जिलो दद्द एव च । [9]
माण्डव्यपुर[6]दुर्गेस्मिन्नेभिर्निजभुजार्जिते ।
प्राकारः कारितस्तुङ्गो विद्विषां भीतिवर्द्धनः । [। 10]
अमीषां रज्जिलाजातः

7. श्रीमान्नरभटः सुतः ।
पेल्लापेल्लीति नामाभूद्वि [तीयं] तस्य विक्रमैः [॥ 11]
तस्मान् [नरभ] टाज्जातः श्रीमान्नागभटः सुतः [।]
राजधानी स्थिरा यस्य महन्मेडन्तकं पुरं ॥ [12]
राज्ञां श्री-

---

1. R. C. Majumdar reads धीमान्— 2. Ibid. वंशजान्—
3. Ibid वश— 4. Ibid. क्षत्रिया
5. Manusmṛti (III 12, 13.) allows a Brāhmaṇa to marry non-Brahmaṇa women. (*Ep. Ind* vol. XVIII p. 88 Note 3)
6. According to Dr. Bhandarkar (*Progress Report. Arch. Surv. W. Circle* 1906-7 p 30) and Dr. R. A. Majumdar (*Ep. Ind.* XVIII p 88) this is represented by modern Mandor, five miles to the north of Jodhpur (G. R. A. S. 1894. p. 3) where the stone must have been orignially put up

8. जज्जिका देव्या[1]स्ततो जातौ महागुणौ ।
द्वौ सुतौ तातभोजाख्यौ सौ[2]दर्यौ रिपुमर्द्दनौ ॥ [13]
तातेन तेन लोकस्य विशुद्धञ्जलजीवित ।
दत्त्वा[3] राज्य लघोर्भ्रातु[4] श्रीभोज-

9. स्य समर्प्पितं ॥ [14]
स्वयंञ्च संस्थितस्तात [:] शुद्धं धर्म्मं [ं] समाचरन् ।
माण्डव्यस्याश्रमे पुण्ये नदीनिर्झर शोभिते ॥ [15]
श्रीयशोवर्द्धनस्तस्मात्पुत्रो विख्यात पौरुषः ।
भूतो नि [ज]-

10. भुजख्यातिः समस्तोद्धृतकण्टकः ॥ [19]
तस्माच्च चन्दुकः श्रीमान्पुत्रोभूत्पृथुविक्रमः ।
तेजस्वी त्यागशीलश्च विद्विषां युधि दुर्द्धरः ॥ [17]
ततः श्रीशिलुको जातः पुत्रो दुर्व्वारविक्रमः [।]
येन

11. सीमा कृता नित्या स्वर्णावल्लद[5]शयोः ॥ [18]
भट्टिकं देवराजं यो वल्लमण्डल पालक [ं] : ।
नि [पा] त्य त [स्व] णं भूमौ प्राप्तवान् च्छत्रचिह्नकं [:] ॥ [19]
पुष्करिणी कारिता येन त्रेतातीर्थं च पत्तन ।
सि-

12. द्धेश्वरो महादेवः कारितस्तुङ्गमदिरः ॥ [20]
ततः श्रीशीलुकाज्जातः श्रीमान्झोटो वरः सुतः ।
येन राज्यसुखं भुंक्त्वा[6] भागीर [थ्यां] कृता गति- । [। 21]
बभूव सत्ववान्तस्माद्भिल्लादित्यस्तपोम-

13. तिः ।
यूना राज्यं कृतं येन पुनः पुत्राय दत्तव (वा) न् ॥ [22]
गङ्गाद्वारम्[7] ततो गत्वा वर्षाण्यष्टादश स्थितः ।
अन्ते चानशन कृत्वा स्वर्ग्गलोकं समागतः ॥ [23]
ततोपि श्रीयुतः कक्कः

14. पुत्रो जातो महामतिः ।
यशो मुद्गगिरौ[8] लब्धं येन गौडैः सम रणे ॥ [24]
[छन्दो] व्याकरणं तर्क्कां ज्योतिः शास्त्रं कलान्वित ।
सर्व्वभाषाकवित्वञ्च विज्ञातं सुविलक्षण । [25]
भट्टि व-

---

1. R. C. Majumdar reads देव्याम्स्ततो.
2. Ibid. सो— 3. Ibid. बुद्ध्व'— 4. Ibid भ्रात-
5. Read दे. 6. Read भुक्त्वा 7. हरद्वा-
8. मुद्गगिरि is modern Monghyr (मुंगेर) in Bihar.

15. कृश[1]विशुधायाम्[2] तदस्मारकक्षभूपतेः ।
श्रीमत्पद्मिन्याः महाराज्ञा[3] जातः श्रीबाउक सुत इति ॥ [26]
नन्दावल्लं प्रहत्वा[4] रिपुबलमतुल भूअकूपप्रयातं
दृष्ट्वा भ-
16. ग्नां[5] स्वपक्ष [ा] द्विजनृपकुलजां सत्प्रतीहारभूपां ।
धिग्भूतैकेन तस्मिन्प्रकटितयशसा श्रीमता बाउकेन ।
स्फूर्जन्हत्वा मयूर तदनु नरमृगा घातिता हे-
17. [नि] नैव ॥ [27]
कस्यान्यस्य प्रभग्नः[6] ससचिवमनुज त्यज्य राणसु[7] तस्मः
केनैकेनातिभीते दशदिशि तु वले स्तम्भ्य[8] चात्मानमेकं ।
धैर्या [न्म] ुत्वाश्वपृष्ठ क्षितिग-
18. तचरणेनासिहस्तेन शत्रु
छित्वा भित्वा श्मशानं कृतमति [भ] यदं बाउकान्येन तस्मिन् ॥ [28]
नवमण्डल नवनिचयं भग्ने हत्वा मयूरमतिगहने ।
तदनु-
19. भृतासितरंगा श्रीमद्बाउकनृसिघेन[9] ॥ [29]
मार्द्धैः प्रग [ल] द्विरक्त[10]-सुषिरैर्व्वा [ह] ूरु पादाङ्ककै-
रेन्त्रै[11]श्चोपरिलम्बि (म्बि) तैविरचितं शवगृह फेत्का[12]रसत्वाकुलं ।
20. यच्छ्रीबाउकमण्ड [ल] । प्ररचितं प्रावल्लुसंघाकुले
तत्संस्मृत्य न कस्य संप्रति भवेत्रासोद्गमश्चेनमि [।] [30]
ननु सम [र] धारायां बाउके नृत्यमाने
शवतनु-
21. शकलान्त्रेष्वेव विन्यस्तपादे ।
शममिव हि गतास्ते तिष्ठतिष्ठेति गीता-
ह्रयगतनृक [ु] रगाश्चित्रमेतत्तदासीत्[13] ॥ [31]
स० ८९४ चैत्र शु दि ५[14]
22. उत्कीर्णा च हेमकारविष्णुरविस [ू] नुना
कृष्णेश्वरेण ॥

---

1. R. C. Majumdar वश. 2. Ibid विशुद्धायाम्
3. Ibid. पद्मिन्याम् महाराज्ञाम .
4. Ibid प्रहृत्य but Dr. Hirananda Sastri suggested च हृत्वा which would better suit the meter.
5. Ibid. भग्नान्स्वपक्षान्द्विज नृप कुलजान्सत्प्रतीहार भूपान्
6. Read प्रभग्न. 7 Ibid. त्यक्त्वा रणास् तस्र. 8. Correctly. स्तम्भयित्वा
9. R. C. Majumdar—नृसिंहेन 10. Ibid—प्रगलद्विरक्त—
11. Ibid.—रान्त्रैर— 12. Ibid. फेत्कारि.
13. Thre is the figure of a wheel after this word.
14. There is a figure of शख.

GWALIOR STONE INSCRIPTION OF MIHIRA BHOJA

Prov. : Sagar Tal. Gwalior, Madhya Pradesha.
Date : Undated ; C. 880 A. D.
Lang. : Sanskrit ; **Script.** : Northern Brāhmi.
Ref. : Dr. R. C. Majumdar *Ep. In.* XVIII pp. 99–114.
Ann. Rep. Arch Sur. Ind. 1903–04. pp. 277–85.

Text

1. ओं नमो विष्णवे ॥
शेषाहितल्पधवलाधरभागभासि-
वक्षः स्थलोल्लसित कौस्तुभकान्तिशोणं ।
श्यामं वपु [:] शशिविरोचनविम्ब (बिम्ब) चुम्बि (म्बि)-
व्योमप्रकाशमवताक्षरकद्विषो वः [1]
आत्मारामफलादुपार्ज्य विजरं देवेन दैत्यद्विषा
ज्योतिर्ब्बीज[1]मकृत्तमे
2 गुणव [ि] त क्षेत्रे यदुप्तं पुरा ।
श्रेयःकन्दवपुस्ततस्समभवद्वास्वानतश्चापरे—
मन्विक्ष्वाकु ककुस्थ[2] मूल पृथवः[3] क्षमापाल कल्पद्रु [ु] माः [2]
तेषां वंशे सुजन्मा क्रमनिहितपदे धाम्नि वज्रेषु घोरं
रामः पौलस्त्यहिन्थ्र[4] क्षनविहतिसमित्कर्म्मचक्रे पलाशैः ।
श्लाघ्य—
3. स्तस्यानुजोसौ मघवमदमुषो मेघनादस्य सख्ये
सौमित्रिस्तीव्रदण्डः प्रतिहरणविधेर्यः प्रतीहार[5] आसीत् [3]
तद्वन्शे[6] प्रतिहारकेतनभृति त्रैलोक्यरक्षास्पदे
देवो नागभट· पुरातनमुनेर्मूर्त्तिर्ब्ब [ब्ब] भूवाद्भुतं ।[7]

---

1. Read—र्ब्बीज—
2. R. C Majumdar ककुत्स्थ
3. There are a number of kings called Prithus. Dr. R. C. Majumdar suggested that Mūla Prithu may be taken to denote the first king of the name viz. the son of Vēna (*Ep. Ind.* XVIII p. 110 n. 4)
4. Read. हिन्त्र.
5. The allusion is to the story described in the Rāmāyana VII–116. (for delail see *Ep. Ind* XVIII p. 110–111 N. 5).
6. Read. वश.
7. Pt. Hirānand वलन्; Dr. Bhandarkar वलच (*Ind. Ant.* 1911 p. 240.

येनासौ सुकृतप्रमाधिव (व) लवन्मलेच्छा—

4. धिपाद्दौहिणीः
छुन्दान स्फुरदुग्रहेतिरुचिरे (रै) र्द्दोर्भिश्चतुर्भिर्व्वभौ[1] [4]
भ्रातुस्तस्यात्मजोभूत्कलितकुलयशाः ख्यातकाकुस्थनामा[2]
लोके गीतः प्रतीकपृथ्वचनतया[3] कक्कुकः क्ष्माभृदीशः ।
श्रीमानस्यानुजन्मा कुलिशधरधुरामुद्वहन्देवराजो
यज्ञेच्छिन्नोरुपक्षक्षपितग—

5. ति कुलं भूभृतां सन्नियन्ता [5]
तस्सूनुः प्राप्य राज्यं निजमुदयगिरिस्पर्द्धिभास्वत्प्रतापः
क्ष्मापालः प्रादुरासीन्नतसकलजगद्वत्सलोचत्सराजः ।
यस्यैतास्सम्पदश्च द्विरदमदसुरास्वादसान्द्रप्रमोदाः
पद्माक्षीराक्षिपन्त्य[4] प्रणयिजनपरिष्वङ्गकान्ता विरेजुः [6]
स्या [ताद्भण्डि][5]—

6. कुलान्मदोत्कटकरिप्राकारदुर्ल्लङ्घतो
यः साम्राज्यमधिज्यकार्म्मुकसखा[6] संख्ये हठादग्रहीत्
एकः क्षत्रियपुङ्गवेषु च यशोगुर्व्वन्धुरं प्रोद्वह-
न्निच्चाक [ो] : कुलमुन्नतं सुचरितैश्चक्रे स्वनामाङ्कितं [7]
आद्यः पुमान्पुनरपि स्फुटकीर्त्तिरस्मा-
ज्जानस्स एव किल नागभटस्तदाख्यः ।
यस्रा—

7. न्ध्र सैन्धवविदर्भकलिङ्गभूपैः
कौमारधाम[7]नि पतङ्गसमैरपाति [8]
श्र (त्र) य्याम्पदस्य सुकृतस्य समृद्धिमिच्छु-
र्यः क्षत्रधामविधिवद्बलिप्रबन्धः[7] ।
जित्वा पराश्रयकृतस्फुटनीचभाव
चक्रायुध विनयनम्रवपुर्व्व्यराजत्[8] [9]
दुर्व्वारैर्व्वरिवरवारणवाजिवार-
याणौघसंघट[9]—

---

1. R. C. Majumdar ब्बभौ.
2. R. C Majumdar काकुत्स्थ
3. Ibid—प्रिय
4. Ibid—आक्षिपन्त्यः
5. Read ख्याता भण्डि०
6. R. C. Majumdar : साम्राज्यमधिज्य—
7. R. C. Majumdar बद्ध बलिप्रबन्धः.
8. Cf. V. 3 of Bhāgalpur copperplate of Nārāyanapāla (*Ind. Ant.* Vol. XV p. 304 f.) and V. 6 of Khalimpur Copper plate (*Ep. Ind* Vol. IV p. 243 f).
9. R. C. Majumdar यान—

8. न घोर घनान्धकारं ।
निर्जित्य वङ्गपतिमाविरभूद्विवस्वा-
नुषसिव त्रिजगदेकविकासको यः [10]
आनर्त्तमालवकिरातनुरुष्कवत्स-
मत्स्यादिराजगिरिदुर्गहठापहारैः ।
यस्यात्मवैभवमतीन्द्रियमाकुमार-
माविर्ब्बभूव भुवि विश्वजनीनवृत्तेः [11]
तज्जन्मा राम—

9. नामा प्रवरहरिबलन्यस्तभूभृत्प्रबन्धै[1]-
रावध्नन्वाहिनीनां[2] प्रसभमधिपतीनुद्धतक्रूरसत्वान् ।
पापाचारान्तरायप्रमथनरुचिरः सङ्गत[3] कीर्त्तिदारै-
स्त्राता धर्म्मस्य तैस्तैस्समुचितचरितैः पूर्व्ववन्निर्व्वभासे[4] [12]
अनन्यसाधनाधीनप्रतापाक्रान्तदि—

10. ह्यस्तः ।
उपायैस्सम्पदां स्वामी यः सवीडमुपास्यत [13]
अर्थिभिर्व्विनियुक्तानां सम्पदां जन्म केवलं ।
यस्याभूत्कृतिनः प्रीत्यै नात्मेच्छा विनियोगतः [14]
जगद्वितृष्णुः स विशुद्धसत्वः
प्रजापतित्वं विनियोक्तुकामः ।
सुतं रहस्य व्रत सुप्रसन्ना-
स्सूर्यादवा—

11. पन्मिहिराभिधान [15]
उपरोधैकसंरुद्धविन्ध्यवृद्धेरगस्त्यतः[5]
आक्रम्य भूभृतां भोक्ता यः प्रभुर्भोज इत्यभात् [16]
यशस्वी शान्तात्मा जगदहितविच्छेदनिपुण·
परिष्वक्तो लक्ष्म्या न च मदकलङ्केन कलितः ।
बभूव[6] प्रेमार्द्रो गुणिषु विषयः सूनृत—

---

1. Ibid प्रबन्धः—
2. Ibid आबन्धन्
3. Ibid सगत·
4. Ibid निर्ब्बभासे
5. The reference is to the story of Vindhya mountain gradually rising higher and higher in order to check the daily course of the sun When requested by the gods the sage Agastya approached the mountain and asked him to bow down in order to give him way to the South. The Vindhya agreed and as the sage never retured, it had to remain in the same position Cf. Mahābhārata, Vana-parva, chap. 104.
6. R. C. Majumdar. बभूव.

12. गिरा–
मसौ रामो वाग्ये स्वकृतिगणनायामिह विधेः [17]
यस्याभूत्कुलभूमिभृत्प्रमथनव्यस्तान्यसैन्याम्बुधे[1]–
र्व्यूढां च स्फुटितारिलाजनिवहान्हुत्वा प्रतापानले ।
गुप्ता वृद्धगुणैरनन्यगतिभिः शान्तैस्सुधोद्भासिभि–
र्द्धर्म्मापत्ययशःप्रभूतिरपरा लक्ष्मीः पुनर्भू—

13 र्क्षया [18]
प्रीतैः पालनया तपोधनकुलैः स्नेहाद्गुरूणां गणै–
र्भक्त्या भृत्यजनेन[2] नीतिनिपुणै र्बन्धैररीणां पुनः ।
विश्वेनापि यदीयमायुरमितं कर्त्तुं स्वजीवैषिणा
तन्निघ्ना विदधे विधातरि यथा सम्पत्परार्द्धाश्रये [19]
अविनथमिद यावद्विश्वं श्रुते—

14. नुशासना–
भवति फलभाक्कर्त्ता नेशः क्षितीन्द्रशतेष्वपि ।
अधरितकलेः कीर्त्तेर्भर्त्तुस्समतां सुकृतैरभू–
द्विधुरितधियां सम्यग्वृद्धिर्यदस्य तदद्भुतं [20]
यस्य वैरि वृहद्वशान्दहतः[3] कोपवह्निना ।
प्रतापादर्ण्णसां राशीन्पातुर्व्वैतृष्ण्यमावभौ[4] [21]
कुमारैव[5] विद्यानां

15. वृन्देनाद्भुतकर्म्मणा ।
यः शशासासुरान्घोरान्स्त्रैणेनास्त्रैकवृत्तिना [22]
यस्याश्चपटले राज्ञः प्रभुत्वाद्विश्वसम्पदः ।
लिलेख मुखमालोक्य प्रातिलेख्यकरो विधिः [23]
उद्दामतेजः प्रसरप्रसूता शिखेव कीर्त्तिर्द्युमणिं विजित्य ।
जाया जगद्भर्त्तु—

16. रियाय यस्य चित्रं त्विदं यज्जलधीन्स्ततार[6] [24]
राज्ञा तेन स्वदेवीनां यशःपुरायाभिवृद्धये ।
अन्तःपुरपुर नाम्ना व्यधायि नरकद्विषः [25]
यावन्नभः सुरसरित्प (त्प्र) सरोत्तरीयं

---

1 Ibid. —आम्बुर्धेव्यू— 2. R. C. Majumdar भृत्य
3. Ibid. वृह— 4. Ibid —आवभौ
5 The reference is here to the war between the Devas and the Asuras in which Kumāra was the commander-in-chief of the former with his army of a number of Mātṛikās (Vidyās). Cf. Mahābhārata, Salyaparva, Chap. 45. (Madras ed.)
6. R. C. Majumdar जलधि—

यावत्सुदुश्चरतपःप्रभवः प्रभावः ।
सत्यञ्च यावदुपरिस्थ (ष्ठ) मवत्यशेषं
तावत् पु—
17 नातु जगतीमियमार्य[1]कीर्त्तिः[2] [26]
पातुर्व्विश्वस्य सम्यक्परममुनिमतश्रेयसस्सम्विधाना-
दन्तर्वृत्तिर्व्विवेकः स्थितेव पुरतो भोजदेवस्य राज्ञः ।
विद्वद्वृन्दाज्जितानां फलमिव तपसां भट्टधन्नेकसूनु-
र्व्वालादित्यः[3] प्रशस्तेः कविरिह जगता साकमाकल्पवृत्तेः [27]

BARAH COPPER PLATE INSCRIPTION OF MIHIRABHOJA

Prov. . Barah, Kanpur, distt U P.
Date : V. E. 893 (=836 A. D.)
Lang. : Sanskrit ; **Script.** : Northern Brāhmi
Ref. : Hiranand Sastri, *Ep Ind.* Vol XIX pp. 15–19.

Text

1. ओं[4] स्वस्ति । श्रीमहोदयसमावासितानेकनौहस्त्यश्वरथपत्ति-
सम्पन्नस्कन्धावारात्परमवैष्णवो
2. महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिका-
देव्यामुत्पन्नः परममाहेश्वरो
3. महाराजश्री [व] त्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीसुन्दरीदेव्यामुत्पन्नः परम्भगवतीभक्तो[5]
4. महाराजश्री [ना] गभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीमतीसटादेव्यामुत्पन्नः परमादित्यभक्तो
5. महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः
श्रीमदप्पादेव्यामुत्पन्नः परम्भगव—

---

1 Pt. Hirānanda reads अस्य

2 For full discussion on the कीर्त्ति Cf. Fleet *C. I I.* III. P. 212. note 65.

3. R. C. Majumdar. व्वालादित्य.

4. Expressed by a symbol

5. We may with Dr. Śastri read here and below परम for the sake of uniformity.

6. तीभक्तो महाराजश्रीभोजदेवः ॥ श्रीकान्यकुब्जभुक्तौ ।
श्रीकालञ्जरमण्डलान्त—
7. ✕ पाति उदु[म्ब] रविषयस [म्ब] द्भवलाकाग्रहारे
समुपगतान्सर्व्वानेव यथास्था-
8. न नियुक्तान्प्रतिवासिनश्च समाज्ञापयति । उपरिलिखिताग्रहारस्स
9. र्व्वायसमेत आचन्द्रार्क्कक्षितिकालम्पूर्व्वदत्तदेवब्रह्मदेयवर्जितः
परमेश्वरश्री—
10. शर्व्ववर्म्मदेवशासनं । महाराजश्रीनागभटदेवानुमतिञ्च दृष्ट्वा
भागञ्च महा-
11. राजश्रीरामभद्रदेवराज्ये व्यवहारिणो वैगुण्यात्किञ्चित्काल
म्विहतं ज्ञात्वा म-
12. या पित्रो ✕ पुण्याभिवृद्धये । भरद्वाजसगोत्र वाजसनेय-
सब्रह्मचारिभट्टकाच-
13. रस्वाम्यन्वयजब्राह्मणानामन्तरा विच्छेदमप्रमाणीकृत्य
प्राग्भागक्रमेणैवो-
14. त्सङ्कलित इति विदित्वा भवद्भिस्समनुमन्तव्यः
प्रतिवासिभिरप्याज्ञाश्रवण विधेयै [र्भूत्वा स] र्व्वा-
15 या एषाम्समुपनेया[1] इति ॥ रुद्रटेन प्रयुक्तस्य शासनस्य
स्थिरायतेः । दूतको बालादि-
16. त्योत्र राज्यभट्टारिकासुतः ॥ सम्वत् १०० (✕) ८ (= ८००)
९०३ (ie. ८९३) कार्त्तिक शु दि ५ निबद्धं ।

SIYADONI STONE INSCRIPTION OF THE TIME OF DEVAPĀLA

Prov. : Siyadoni, Lalitpur Distt. U. P.
Date : 977 V. E. (= 1024 A. D.)
Lang. : Sanskrit influenced by Prakrit;
Script. : Nāgarī of 11th Century A. D.
Ref. : Kielhorn, *Ep. Ind.* Vol. I. pp. 162–179.

Text

1. ओं ओं नमो भग [व] ते वासुदेवाय··· ·····[य]·····
·····धिरा [ज[2]] ·····[दे वपा]·····

1. H. Sastri. एषां समु—
2. Dr. Kielhorn has a little doubt in his restoration :—धिराज परमेश्वर श्रीभोजदेव पादानुध्यात परमभट्टारक महाराजाधिराज परमेश्वर श्रीमहेन्द्रपालदेव पादानां as below L. 4.

हाराजाधिराजपरमेश्वर [श्री]—[हेन्द्र] पालदेवपादा [नां]
म [हीप्र]-

2. वर्द्धमानकल्याणविजय—[ज्ये ?] [सं] — — [रस][1] तेषु नवसत-
षष्ट्यधिकेषु श्राव··· ·····सम्वत् ९६० श्राव [ण]· ·····
·····गताशेषमहा [श] ब्दम [हा] सामन्ताधिपति
[श्रीमदु]—[न्द्र ?] ·· [भु] ज्यमानस्त [त्पादाधिष्ठित]
[व]··· ··ञ्च [कुं] ···[कौ] क्षिके श्रीपञ्च [स्था] ·····
[क] द्वाविंसतिकच्छितराकयोर्व्वारे [सतीद्दमे] का [ले वर्त्त-
माने वार] प्रभु [ख]-

3. सकलस्थानेन संसारस्यानित्यत्वं बुध्वा[2] पुण्ययशोभिवृ [द्ध] ये
स्वकीयतलसीमाप्रतिब [द्धक्षेत्रं] [पूर्व्वपश्चि] मतो
हस्तद्विसतमात्रं दक्षिणोत्तरतो वा सपादहस्तद्विसत [मात्र] ञ्च
वणिकचण्डुकेन सङ्कटसुतेन प्रतिष्ठापित पत्तनस्य
दक्षिणदिग्विभागे पश्चिमाभिमुखश्रीनारायणभट्टारकस्याव-
[लेपनस] न्मा [र्जना] ङ्ग [राग] धूपप्रदीपनैवेद्याद्यर्थं
निवेदितं धर्म्माय मत्वा आचन्द्रार्क्कक्षित्युदधिसमकालिनं
यावच्च कैश्चि [त्परिपन्थना कर्त्त] [व्या] ह्य [ति]

4 सकलस्थानानुमतेन वा [र] स्वहस्तायेति ॥ छ ॥ मतं केसिआवारु-
च्छितरावारु साक्षिणौ श्रुतें[3] लिखितसाक्षि वी [टु] राच्छड-
पुत्रस्तथा वावण गोंदासुतः ॥ लिखित स्थानानुमतेन
करणिकमर्व्वहरिणा भोचुकपुत्रेणेति ॥ ॐ ॥ परमभट्टारक-
महाराजाधिराजपरमेस्वरश्रीभोजदेवपादानुध्यातपरमभट्टारक-
महाराजाधिराज परमेश्वरश्रीमहेन्द्रपालदेवपादानां
महीप्रवर्द्धमानकल्यण[4] विजयराज्ये सम्वत्सरस-

5 तेषु नवमत [ष] ष्ट्यधिकेषु चतुरन्वितेषु मार्ग्गसिरमास-
बहुलपक्षतृतीयायां सम्वत् ९६४ मार्ग्ग वदि ३ अद्येह
सीयडोणिममावासितमहाप्रातिहारसमधिगतासेषमहाशब्दमहा-
सामन्ताधिपतिश्रीउन्दभटः ॥ समस्तराजपुरुषान्बोधयति
विदितमस्तु भगवतां[5] अस्मिन् पत्तने नेमकवणिकचण्डुक-
प्रतिष्ठापितविष्णुभट्टारकस्यास्माभि ७ परलोकनिस्रेयसार्थं[6]
पुण्ययसोभिवृद्धये यौवनधनजीवितानि नलनीदलगतज-

6. ललवतरलतराणि लक्ष्य अक्षयनीवीयं निवेदिता ॥ सीयडोणिसत्कमण्डपि-
कायां प्रतिदिनं पञ्चियकद्रम्मसत्कपादमेकं ज्ञातव्य तथा दिनं प्रति मुद्र-
यित्वा युगैका देया ॥ देवस्यावलेपनसन्मार्ज्जनाङ्गरागध[०]पप्रदीपनैवे-

---

1. Ibid. The restoration is —विजयराज्ये सवत्सरशतेषु.
2. Ibid. बुद्ध्वा. 3. Ibid. Either श्रुते or श्रुतं.
4. Dr. Kielhorn— हल्याण— 5. Ibid. भवतां 6. Ibid. निःश्रेयसार्थं

यार्थमाचन्द्रार्कक्षित्युदधिसमकालिनं यावत्पालनीयं कस्मिंश्चित्काले यः कोपि पुरुषः परिपन्थनाखश्राकरोति उत्पादयति स पञ्चमहापातकै[1] लिप्यति स्वहस्तोयं श्रीउन्दभटस्य ॥ छ ॥

7. बहुलरुद्रगणयोर्व्वारे वारप्रमुखस्थानेन निवेदिता अक्षयनीमिका ॥ ❀ ॥ अस्मिनेव[2] काले तथा चण्डुकेन सङ्कटसुतेन प्रतिष्ठापितपश्चिमाभिमुख-श्रीविष्णुभट्टारकस्य समर्प्पिता वणिकचण्डुकस्तथा सावसस्तथा माहपा-[दिभि] स्साङ्कटसुतैः स्वकीयस्वकीयच्छाया [आ] स्मीय-अवासनिका उत्तराभिमुखा अस्याभ्यन्तरे उत्तराभिमुखगृहाणि चत्वारि अपसरक सहितानि अवलिप्तमिलाच्छ [श्रा] नि अवासनिकाया [श्रा] घाटानि लिख्यन्ते [पूर्व्वे] ण र-

8. त्था दक्षिणेन चण्डुकीयावासनिकास्वोलिकापातं पश्चिमेन सीयदेवसत्क-अवासनिका उत्तरेण च्छेण्डिकामर्यादा एवं चतुराघाटचिह्नोपलक्षिता महद्धर्म्महेतोरवलेपनसन्मार्ज्जनधूपप्रदीपनैवेद्यार्थं प्रदत्ता यः कश्चित्परि-पन्थना करोति स च महानरकं व्रजति ॥ मतं चण्डुसावसमाहपानां साङ्कटसुतानामिति ॥ ❀ ॥ तथा सम्वत्सरसतेषु नवसप्त पञ्चषष्टयधिकेषु अश्विनमासे प्रतिपदायां सम्वत् ९६५ अश्वि [न सु] दि १

9. वणिकनागाकेन चण्डुसुतेनापरिमितमूल्येन क्रीत्वां कुम्भकारदैवैकअह-च्चागा [न्दू] कलिआकादीनां अक्षयनीमिका देवस्य समर्प्पिता ॥ छ ॥ तथा समस्तकल्पपालानां मध्ये यस्य यस्य सत्कमद्यभाण्डं नि ७ पद्यते विक्रयं याति स च सचाचन्द्रार्कं यावद्विग्रहपालसत्कद्धर्म्मार्द्धिका[3] ताली दातव्या ॥ [4]यश्चश्चित्परिपन्थना करोति स नरक व्रजति स्थानीयभूमौ ये भूये भूता ये भविष्यन्ति कुम्भकारश्चलपालाश्च[5] तैरक्षयनीमिका पालनी-

10. या ॥ ❀ ॥ तथा वारप्रमुखस्थानसम्बद्धकन्दुकानां पार्श्वात् कन्दुक [ना] ट्टलभोट्टलतिकूदेगू [प] स [नू] कादीनां पार्श्वात् वणिकनागाकेन चाण्डुसुतेन सन्मार्ज्जनविलेपनधूपप्रदीपनैवेद्यार्थं अपरिमितमूल्येन क्रीत्वा कन्दुकानां प्रतिवराहकयविंसोपकंकं प्रतिदिनं वि १ प्राह्ममाचन्द्रार्कं यावद्भोक्तव्यं यश्चश्चित्परिपन्थनाखश्रामुत्पादयति स च महापातक-पञ्चकैर्लिप्यति ॥ स्वहस्तोय ४४४ मिति ❀ ॥

11. तथा सम्वत्सरसतेषु नव [स] त सप्त [प] ष्टयधिकेषु फाल्गुनमास[6] अमावास्यां सम्वत् ९६७ फाल्गुन वदि १५ सीयडोण्यां वारप्रमुखस्थाने अष्टकुआनर सिंघयोर्व्वारे यथा नेमकवणिकचाण्डुकेन प्रतिष्ठापितश्री-विष्णुभट्टारकपश्चिमाभिमुखमुलाहतणदक्षिणदिग्विभागे नेमकवणिकवा-

---

1. Read —कैर्लि—
2. Ibid. अस्मिन्नेव
3. Dr. Kielhorn—द्धर्म्मार्द्धिका
4. Ibid. यश्चश्चि—
5. Ibid. कुम्भकाराश्चल पालाश्च
6. Kielhorn expects—मासे.

सुदेवेन प्रतिष्ठाप्य श्रीविष्णुभट्टारकं उत्तराभिमुखं महान्तधर्म्मार्थहेतोः पूजापनसन्मार्ज्जनधूपप्रदीपार्थं

12. दोसिहट्टे पूर्व्वाभिमुखावलिप्ताच्छन्ना उवटकसहिता देवस्य समर्प्पिता ॥ यस्याश्चाघाटानि लिख्यन्ते पूर्व्वेण हट्टरथ्या[1] दक्षिणेन वामनसत्कवीथी पश्चिमेन स्वोलिकार्पतमुत्तरेण[2] श्रीविष्णुभट्टारकवीथी मर्यादा एवं चतु-राघाटविशुद्धा प्रदत्ता ॥ तथा वैस्वान्दर[3] पूजनार्थं वासुदे [वे] न स्वकीयगृहं पूर्व्वाभिमुखं उवटकसहितं प्रदत्तं अस्याघाटानि पूर्व्वेण प्रसन्नदेवियारकमर्यादा दक्षिणेन

13. वासुदेवगृहभित्ति ~ पश्चिमेन रथ्या उत्तरेण श्रीप्रसन्नवीथीमर्यादा एवं चतुराघाटविशुद्धं देवस्य प्रदत्तं यश्चक्षिद्धरणविधारणविधारणा करोति स च नरकं व्रजति न संशयः ॥ ❀ ॥ तथा वणिकचण्डूकीयोपार्जना प्रसन्नहट्टे उत्तराभिमुखा वीथी अवलिप्ता उवटकसहिता अस्याश्चाघाटानि पूर्व्वेण सुभादित्यस्य वीथी दक्षिणेन भट्टदेवप्रसादसत्कावासनिकास्वो-लीपातं पश्चिमेन चूंश्रां

14. वीथी उत्तरेण हट्टरथ्या मर्यादा ॥ छ ॥ तथा अपरं चाण्डूकेन साङ्गटसुतेन पितृपितामहोपार्जितं स्वीकीय दक्षिणाभिमुखं वीथीचतुष्टयं अमीषामाघा [टा] नि[4] लिख्यन्ते पूर्व्वेण चूंश्रावीथी दक्षिणेन हट्टरथ्या पश्चिमेन स्वकीयावासनिकाद्वारोष्ठमर्यादा उत्तरेण स्वकीयावासनिका मर्यादा एवं चतुराघाटचिह्नोपलक्षिता[5] मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये[6] परमभक्त्या श्रीविष्णुभट्टारकस्य मा–

15. सनत्वे प्रदत्तं यश्चक्षिप्तपरिपथ्यनाक्षेप्ता करोति स च महापञ्चपातकै-[7] र्लिप्यति नरकं व्रजति ॥ ❀ ॥ तथा [अ] हपतिकताम्बूलिककेशवेन वटेश्वरसुतेन पितृपितामहोपार्जितदक्षिणाभिमुखस्वकीयवीथी चतुर्हट्टे अस्याश्चाघाटानि लिख्यन्ते पूर्व्वेण कंसारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन केशवस्यव वीथी उत्तरेण कंदासघूटमर्यादा एवं चतुराघाट-विशुद्ध चण्डुप्रतिष्ठापितपश्चि [मा] भि–

16. [मु] खश्रीविष्णुभट्टारकस्य प्रदत्ता आचन्द्रार्कं यावत्पालनीया यश्चक्षि-त्परिपन्थना करोति स च महापञ्चपातकैर्लिप्स्यति[8] ॥ वीथी इयं सांप्रत पूर्व्वाभिमुखा वर्त्तते ॥ स्वहस्तोयं केशवस्य ॥ ❀ ॥ तथा नेमकवणिक-नागाकेन चाण्डूसुतेन दोसिहट्टे उपार्जनां कृत्वा वीथीद्वौ २ पूर्व्वाभिमुखौ अवलिप्त उवटकसहितौ अनयोराघाटा लिख्यन्ते पूर्व्वेण हट्टरथ्या दक्षिणेन वासुदेववीथी पश्चिमेन स्वोली [पा]

---

1. Ibid. हट्टरथ्या. See, later in line 14.
2. Ibid. स्वीलिकापातमत्तरेण
3. Ibid. वैश्वानर—
4. One may, with Kielhorn expect अमूषामाघाटानि or आमामाघाटानि
5. Kielhorn expects —लक्षित here.
6. Ibid.—वृद्धये.
7. Ibid.—कैर्लिप्यति.
8. Kielhorn.—कैर्लिप्स्यति.

17. [त] उत्तरेण रामेवीथी मर्यादा एवं चतुराघाटचिह्नोपलक्षिता श्रीविष्णु· भट्टा [र] कस्य प्रदत्ता मातापित्रोरात्मनश्च पुण्ययसोभिवृद्धये यश्चक्षि· त्परिपन्थनाबाधा करोति स च षष्टिं वर्ष सहस्राणि षष्टी[1] वर्षसतानि च विष्ठायां जायते कृमिः ॥ ❀ ॥ तथा नेमकवणिकसील्लूकेन महापासुतेन उपर्जयित्वा[2] वीथी दक्षिणाभिमुखापसरकसहितावलिप्तासच्छन्ना[3] अस्या· श्चाघाटानि लिख्यन्ते पूर्व्वेण सावसवीथी दक्षिणे–

18. न हट्टरथ्या पश्चिमेन श्रीशिवभट्टारकवीथी मर्यादा एवं चतुराघाटविशुद्धं श्रीनारायणभट्टारकस्य धूपप्रदीपनैवेद्यार्थं प्रदत्ता यश्चक्षित्परिपन्थना करोति स च नरकं व्रजति महापञ्चपातकैश्लिष्यति[4] ॥ ❀ ॥ तथा सम्व· त्सरनवसतेषु एकोनसप्तत्यधिकेषु माघमासे पञ्चम्यां सम्वत् ९६९ माघ शुदि ५ अद्येह श्रीमत्सीयडोण्यां महाराजाधिराजश्रीधू [र्भ] ट[5] परिभुज्यमाने तत्पादाधिष्ठितलोधुआकादिपञ्चकुलं

19. मण्डपिकायां कौसिकरम्थाकः स्थानारोपितअवुआनरसिंघयोर्व्वारे सती· क्षे काले वर्त्तमाने [ने] मकवणिकनागार्केन चाण्डूसुतेन समस्तकल्ल· पालानां पार्श्वात् अपरिमितमूल्येन क्रीत्वा कल्लपालमहत्तकपञ्चिकः सांत· डस्तथा राहडस्तथा कुराडाकस्तथा जसकरकादीनां समस्तकल्लपालानां सत्कहट्टानामुपरि दत्तश्रीमदादी[6] [वरा] ह पञ्चासदधिकानि सतानि त्रयोदशाङ्के वराहद्र १३५० अ–

20. तोर्थे सुराभाण्डं प्रति मासान्मासं विग्रहतुङ्गीयद्रम्माद्धं दातव्यं तालिं प्रति वि १० आचन्द्रार्कक्षितिकालिनं धूपप्रदीपनैवेद्यार्थं श्रीविष्णुभट्टारक· स्य प्रदत्तं यश्चक्षिद्धरणविधारणा करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नेमकवणिकनागार्केन चाण्डूसुतेन मातगानां पार्श्वादुपार्जित[7] मह [द्द] म्मार्थहेतो[8] दोसिहट्टे युगंक युगैकं प्रति कपर्दकद्वयं द्वयं क२ दातव्य मातङ्गकोवेजोहटाकस्तथा देरुलाकस्तथा रउंआक–

21. स्तथा संकराकस्तथा येम्वराकस्तथा हेम्व [टा] कादीनां[9] दोसिहट्टे समस्तयुगानामुपरि अक्षयनीमिका प्रदत्ता यश्चोपि परिपन्थना करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नागार्केन दोसिहट्टे उपार्जिता पूर्व्वाभि· मुखा वीथी अवलिप्ता उवटकसहितास्याश्चाघाटानि पूर्व्वेण हट्टरथ्या दक्षिणेन भट्टजेहरिवीथी पश्चिमेन स्वोलीपातं उत्तरेण च्छेंडिका मर्यादा एवं चतुराघाटविसुद्धा श्रीनारायणभट्टारकस्य स–

22. मर्प्पिता यश्चोपि परिपन्थना करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नागार्केन चाण्डूसुतेनात्मीयदक्षिणाभिमुखवीथीत्रयं उवटकसहितं अमीषां[10]

---

1. Ibid षष्टि वर्ष सहस्राणि षष्टि 2. Ibid.उपार्ज्जयित्वा.
3. The original had—लिप्तासच्छन्ना 4. Idid—केल्लिष्यति.
5. Ibid टपरि— 6. Kielhorn श्रीमदादि—
7. Kielhorn expects—पार्ज्जितं. 8. Ibid—हेतोर्दोसि—
9. The original had—कादिनां 10. Dr. Kielhorn expects अमूषां न आस्वां

आघाटानि लिख्यन्ते पूर्व्वेण शिवभट्टारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन श्रीमाकीयदेववीथी उत्तरेण नागासत्कअवासनिकास्वोलीपातं एवं चतुरा घाटचिह्नोपलक्षिता विलेपनसन्मार्ज्जनधूपप्रदीपनैवेद्यार्थं श्रीनारायणभट्टारकस्य समर्प्पिता

23. यश्चक्षिप्तपरिपन्थना करोति स च न [र] कं व्रजति ॥ ❀ ॥ तथा स्थानानुमतेन वारपद्मयोर्व्वारे नेमकवणिकभाइलेन गोविन्दसुतेन श्रीवामनस्वामिदेवपश्चिमाभिमुखस्य पितृपितामहोपार्ज्जित[1] उत्तराभिमुखा वीथी अवलिप्ता उवटकसहिता अस्याश्चाघाटानि लिख्यन्ते[2] पूर्व्वेण सीगासत्कदेववीथी दक्षिणेन स्वोलीपातं पश्चिमेन पुन[3] सीगासत्कदेववीथी उत्तरेण हट्टरथ्या मर्यादा एव चतुराघाटचिह्नोप-

24. लक्षिता धूपप्रदीपनैवेद्यार्थं प्रदत्ताचन्द्रार्क्ककालिन यावत् रसीके विग्रहपालीयद्रम्मनृभागं[4] नृ १ देवस्य दानध्यं यश्चक्षोपि परिपन्थना करोति स च नरकं व्रजति ॥ ❀ ॥ तथा नागाकाय उपार्ज्जना पूर्व्वाभिमुखौ गृहद्वौ अवलिप्तौ अपसरकसहितौ अस्याश्चाघाटानि पूर्व्वेणाकासभाग-प्राङ्गणं दक्षिणेन वामनगृहभीति पश्चिमेन स्वोलीपातं उत्तरेण च्छेण्डिका मर्यादा एव चतुराघाट-

25. चिह्नोपलक्षिता सन्मार्ज्जनविलेपनगन्धधूपप्रदीपार्थं प्रदत्तं [5]तृभुवनस्वामिदेवस्य यश्चक्षिप्तपरिपन्थना करोति स च नरक व्रजति ॥ ❀ ॥ तथा नागार्कीयउपार्जनायां उत्तराभिमुख उवटकं वा [क्ष] णताम्बोलिकधमाकेन क्रयित्वा महन्तधर्म्मार्थहेतो[6] श्रीउमामहेस्वरस्य प्रदत्तं अस्याघाटानि पूर्व्वेण सिवभट्टारकवीथी दक्षिणेन स्वगृहभित्ति[7] पश्चिमेन सिवभट्टारकवीथी उ-

26 त्तरेण हट्टरथ्या मर्यादा एवं चतुराघाटविशुद्धं य ७ परिपन्थना करोति स नरक व्रजति ॥ ❀ ॥ सम्वत् ९९४ वैसाख वदि ५ संक्रान्तौ[8] चण्डूकीयदेवस्य इह निवासी ताम्बोलिकमहर सवर केसवासुतस्तथा माधव दृच्छूसुत समस्तलोकानां मिलित्वा अक्षयनामिका प्रदत्ता पर्ण्णपालिकां प्रति विग्रहद्रम्मविसोवकं विसोवकं प्रदत्त वि १ आचन्द्रार्क्ककालिन भोक्तव्यमिति[9] ॥ स्वहस्तं सवरमाधवयोः ॥ ❀ ॥

27. [त] था सावसकीय दक्षिणाभिमुखा वीथी अवलीप्ता[10] उवटकसहिता कृतोपसक्षा अस्याघाटानि पूर्व्वेण सीगाकीयदेववीथी दक्षिणेन हट्टरथ्या पश्चिमेन सीलूवीथी उत्तरेण स्वोलीपातं एवं चतुराघाटविशुद्ध विलेपनसन्मार्ज्जनधूपदीपनैवेद्यार्थं तृभुवनस्वामिदेवस्य[11] प्रदत्ता यश्चक्षोपि परिपन्थना करोति स महापातकपञ्चकैलिप्यति[12] ॥ ❀ ॥ तथा नागाकीयउपर्ज्जना[13] तैलिकवीटु तथा नारायणस्तथा ना-

---

1. Ibid.—पार्ज्जिना. 2. Ibid लिख्यन्ते 3. Ibid पुनः
4. Ibid त्रिभाग त्रि— 5. Dr. Kielhorn त्रिभुवन 6. Ibid हेतोः
7. Ibid.—भित्तिः 8. Ibid संक्रान्तौ. 9. Ibid भोक्तव्यमिति.
10 अवलिप्ता. 11. Ibid त्रिभुवन—. 12. Ibid केलिप्यति. 13.Ibid उपार्ज्जना.

28. गदेवस्तथा महसोणः समस्ततैलिकानां घाणकं घाणकं प्रतिदिनं महन्तधर्म्मार्थहेतोः तैलपलिका प्रदत्ता ॥ ॐ ॥ परमभट्टारकमहाराजाधिराजपरमेस्वरश्रीक्षितिपालदेवपादानुध्यात ७ परमभट्टार[1] [क] महाराजाधिराजपरमेस्वरश्रीदेवपालपादानां महीप्रवर्द्धमानकल्याणविजयराज्ये सम्वत्सराणां सहस्रैकं पञ्चोत्तरं माघमासशुक्लपक्षपञ्चम्यां सम्वत् १००५ माघ शुदि ५ अद्येह

29. श्रीमत्सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्क[2] ७ परिभुज्य [मा] ने मण्डपिकायां सीहपादिपञ्चकुल स्थानानुमतेन पाहुदेदेकयोर्व्वारे मतीहशे काले वर्त्तमाने दोसिहटे समस्तमहाजनेन एकमतीभूत्वा महान्तधर्म्मार्थहेतोर्व्वणिकविक्रमेन[3] प्रतिष्ठापितश्रीभाइलस्वामिदेवस्य प्रदत्तं मासान्मास प्रति द्रम्मस्य तृभागं[4] तृ १ देयमिति ॥ ॐ ॥ तथा सूत्रधारजेजपस्तथा विम्बिआकस्तथा भलुआकस्थता जो [गू]-

30. [क] द्रकादीनां समस्तआहाडसम्वद्धमिलाकूटानां एकमतीभूत्वा श्रीविष्णुभट्टारकस्य भरणं भरणं प्रति विग्रहपालद्रम्मस्य तृभागं तृ[5] १ अचन्द्रार्कालिनं यावद्दोक्तस्य यश्चक्षित्परिपन्थना करोति स च महापातकपञ्चकैर्लिप्यति ॥ ॐ ॥ तथा सम्वत् १००८ माघ शुदि ११ अद्येह सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्कस्तत्पादाधिष्ठितपुरदरादिपञ्चकुलं मण्डपिकायां कौशिकमाधवः स्थानाधिष्ठिततुण्डिप्रद्युम्नयोर्व्वारे

31. इहाधिष्ठाने चण्डूप्रतिष्ठापितश्रीविष्णुभट्टारकायतने पुरन्दरेण प्रतिष्ठापितपश्चिमाभिमुखश्रीचक्रस्वामिदेवस्य दीपतैलार्थं इह निवासी तैलिकानां केसवस्तथा दुर्ग्गादित्यस्तथा के [सु] लाक उजोणेक तुण्डिआकादीनां महान्तधर्म्मार्थहेतो[6] घाणकघाणकं प्रति तैलपलिका प्रदत्ता यश्चक्षित्परिपन्थना करोति स च नरक व्रजति ॥ ॐ ॥ तथा पूर्व्वसूचित नेमकवणिकपप्पाकेन देवडासुतेन यत्प्रतिष्ठापित श्री [च]-

32. क्रस्वामिदेव [स्य] वणिकमहादित्यनोहलाभ्यां पप्पासुताभ्यां [आत्मीया] वासनिका उत्तराभिमुखास्याभ्यन्तरे उत्तराभिमुखानि[7] गृहाणि त्रीणि ३ अपसरकप्राङ्गणसहितावलिप्तानि अस्याघाटानि पूर्व्वेण रथ्या दक्षिणेन स्वोलीपातं पश्चिमेन चाण्डूसत्कावासनिका उत्तरेण द्वारोष्ठनिष्कासप्र [वे] सक मर्यादा एवं चतुराघाटचिह्नोपलक्षिता विलेपनसन्मार्जनधूपप्रदीपनैवेद्यार्थं प्रदत्त यश्चक्षित्परिपन्थना करोति स च नरकं [व्र]-

---

1. Dr. Kielhorn.—ध्यातपरम—.
2. Ibid.—लङ्कपरि—.
3. Ibid.—विक्रमेण.
4. Ibid.—त्रिभाग त्रि.
5. Ibid—त्रिभाग त्रि १ आच—.
6. Dr. Kielhorn.—हेतोर्घा—
7. Original had उत्तरीभि—.

33. जति ॥ स्वहस्तोयं महादित्यनोहलयोः ॥ ॐ ॥ तथा पूर्व्वसूचितस [म्वत्] ९९१ माघ शुदि १० नगाकः[1] वाण्डुसुतस्तथा [दे] दैकस्तथा वालिस्तथा रुदाक जाजूसुतास्तथा क्षित्तराकः सावासुत एकमतीभूत्वा स्वकीय स्तथा स्वकीयच्छाया महान्तधर्म्मार्थहेतो ए पूर्व्वाभिमुखा अवासनिका-अपसरकप्राङ्गणसहिता अस्याघाटानि पूर्व्वेण निष्कासप्रवेसद्वारोष्टक दक्षिणेन विषयणकहूपसत्कावासनिका पश्चिमेन कविलासत्क [अवा]-

34. सनिका उत्तरेण सावससत्कअवासनिका मर्यादा एवं चतुरा [घा] टविशुद्धा अस्याभ्यन्तरे समस्तगृहसमेतां समस्तवीथीसमेतां च देवस्य प्रदत्ता यश्कोपि वि [घ्न] करोति म चात्मीयपुरुषचयं नरकं नयति यश्कोपि वीथीषु प्रवसति म च गोष्टिभावितं भाटकं ददाति दायादस्या [धि] कारं नास्ति स्वहस्तोयं नागादेदैवालीरुदाकादीनां मतं लिखितं सर्व्वह [रि] पुत्रेण रच्छाकेन ॥ ॐ ॥ तथा देदैकस्तथा वालीकस्तथा

35 तथा रुदाक जाजू सुतारेभि[2] प्र [दत्ता] चण्डूप्रतिष्ठापितपश्चिमाभिमुख-श्रीविष्णुभट्टारकस्य चतुष्कहट्टे[3] पश्चिमाभिमुखा वीथी अवलिप्ता उवटक-सहिता कृतोपसन्ना अस्याघाटानि लिख्यन्ते[4] पूर्व्वेण [ओ] लीपातं दक्षिणेन श्रीभ्र [म्ब] लोहीदेविजगतिए पश्चिमेन हट्टरथ्या उत्तरेण निम्बरावीथी मर्यादा[5] एवं चतुराघाटविसुद्धा विलेपनसन्मर्ज्जन[6] धूपप्रदीप नैवेद्यार्थं प्रदत्ता [यश्क]-

36. श्रिपरिपन्थना करोति स च नरकं घोरं व्रजति पितृपितामहैस्सह ॥ स्वहस्तोय देदैवालीरुदाकादीनां सम्मतं लिखित स्वामिकुमारेण सर्व्व-हरिसुतेनेति ॥ ॐ ॥ सम्वत् १०२५ माघ वदि ९ अद्येह सीयडोणिपत्तने महाराजाधिराजश्रीनिष्कलङ्कपरिभुज्यमाने तत्पादाधिष्ठिनकेशवराजादि पञ्चकुलं स्थानानुमतेन पाहुदेदेकयोर्व्वीरे सतीदसे काले इहाधिष्ठाने द-

37. [वि] णे दिग्विभागे चाण्डुप्रतिष्ठापितपश्चिमाभिमुखश्रीविष्णुभट्टारक-स्यायतने नेमकजातिवणिकमहादित्येन पेपेमृतेन प्रतिष्ठापितपूर्व्वाभिमुख-श्रीविष्णुभट्टारकस्य वणिकश्रीधरेण महादित्यसुतेन विलेपनसन्मार्ज्जन-पूजापनधूपप्रदीपनैवेद्यार्थं श्रीमदादीवराहद्रम्मस्य[7] पादैक प्रदत्त एतदर्थे मासान्मास प्रति दीयमानं पञ्चियकद्रम्मैक सास-

38. [नं] लिखितं अङ्क पंद्र १ एतदर्थे [मा] च वीथी [नागासत्का] दक्षिणाभिमुखा उवटकसहिता कृतोपसन्ना भोगाधिना तिष्ठति अस्या-

---

1. Ibid नागाकः चाण्डू—
2. Dr. Kielhorn रुदाको जाजूसुता एभिः
3. Ibid —हट्टे.
4. Ibid (अस्या आघाटानि) लिख्यन्ते
5. Ibid नर्यादा.
6. Ibid.—नन्मार्जन—; better—प्रम्मार्जन—.
7. Dr. Kielhorn. श्रीमदादि— .

घाटानि लिख्यन्ते पूर्व्वेण श्रीशिवभट्टारकवीथी दक्षिणेन हट्टरथ्या पश्चिमेन सीह्लुकवीथी उत्तरेण ओलीपात मर्य्यादा एवं चतुराघाटविशुद्धा अस्यां वीथ्यां मोचापनकाले अपरवीथी अनुरूपा[1] सासने लिखाप्य भोक्तव्या आचन्द्रार्क्क-

39. क्षितिकालिनं यावद्भो [क्तव्यं] यङ्कुक्षि [स्वश्रावाधा] [ददाति] म च महान्तं नरकं व्रजति मतं सिरिधर महादित्यसुतस्य लिखितं करणिकधीरवर्म्मणा[2] स्वामिकुमारसुतेनेति ॥ ॐ ॥ ओं ओं नमो गणपतये ।

भ्रंतु वो गणनाथस्य हस्तास्तेपवमथवः ।
विघ्न रेणुं क्षितेः क्षिप्रं विन्दुभिर्जलदा इव ॥

योसौ [च] क्राम धात्रीं गिरिकुहरसरित्सागरानूपरम्यां पादेनैकेन कृत्स्नां वलिच्छलनव[3]-

40. [शा] न्मूर्त्ति [मास्था] य [ह] स्वां ।
स्वर्ग्ग [स्वभ्राम[4]] साकं पवनप [थ] गणैर्भा [नुचन्द्र] प्रहाग्रयैः
सोय्याश्रिविक्रमो व [स्तृ[5]] तयपदपथो यस्य देवैर्न्न लब्धः[6] ॥
महोदयामरावत्यां मनुष्येन्द्रेण धीमता ।
रायक्क नाम नगरं ब्राह्मणेभ्यो[7] ददे किल ॥
रायक्कभट्टा इति ते ख्यातिं प्राप्ता महीतले ।
दातारः शत्रुजेतारो विद्वांसो सुवहुश्रुताः[8] ॥
तेषां प्र—

41. तीतकुलसंततिसुप्रसूति-
श्चारित्र [चा] रधनधैर्य्ययुतो व [शि] ष्टः ।
शिष्टप्रहर्षजनकः स कलौ [वभूव[9]]
सद्भावभावपरिभावितचित्तवृत्तिः ॥
शुभ्रास्ततु [न्यैर्भ] वनैर्व्विरा [जि] ता-
त्कैलासशृङ्गादिव गुह्यकाधिपः ।
द्रष्टुङ्गृही [त्वा] किल मातृयानकान्
केनापि कार्येण चरान्नहागतः ॥
तेना [स्मि] ञ्जगरीन्द्रकदरमुखे दृष्टो नृपः सिंहव[10]-
[च्छ्री] मद्राजकुले [भ]—

---

1 Ibid अनुरूपा. 2. Original had—वर्म्मेणा. 3. Ibid वलि—
4. Dr. Kielhorn. स्वर्ग्ग (वभाम ?). 5. Ibid. वस्ति—.
6 Ibid. लब्धः. 7. Ibid. ब्राम्ह—. better ब्राह्म.
8. Ibid. सुवहु—. 9. Ibid. वभूव. 10. Ibid. सिंह—

42. दर्प्पशमनप्रो [द्भू] तगुंजारवः ।
गत्वा कौतुकपूरितान्तरगतो राज्ञः समीपेवस-
[च्छ्री] मन्तं हरिराजमाहवह [रे] रासाद्य पूजामनु ॥
तस्यात्मजः ख्यातगुणोपपन्नो दामोदरो नाम [ज] गत्प्रसिद्धः
सोसारतां वीक्ष्य हिरण्यजीवात्कारापयामास गृहं मुरारेः ॥
प्रावाणपुंजैरिव सिद्धकोस्मिन्सोपानमाहृत्य ग [तोन्त]—

43. रिक्तम् ।
शृङ्गं हिमाद्रेरिव वानरेण [आ] नीय [मु] क्तं [ल] वणाब्धिबंधात्[1] ॥
ये [नाभू] न्निजबाहुपंजरबृहद्गुप्त्याकृता[2] रोदसी
दर्पप्रोद्भूतदैत्यकटुकठिनच्छेदोद्यम [च्छो] णितैः ।
स्नाता [य] स्य वसुन्धरा करवरैर्द्धौता पवित्रीकृता
तस्यार्द्धां प्रविवेस[3] लक्षणवतीं त्रैविक्रमीयां शुभाम् ॥
मोरानीपार्ज्जुनांत्रैर्गगनप[4] [रि] चि—

44. तैस्तालमालामधूकै-
[र्ज्ञा] रङ्गया राजजंब्वा[5] फलभरमितैर्द्दाडि [मीमातुलुंगैः] ।
[जातीने] वालजालैर्ब्बिकसितसुमनोमल्लिकामंजरीभिः
पुष्पै [र्ब्व] न्यप्रधानैः सम [श] नरुचिरै राजितं वृक्षषण्डैः ॥
प [त्तनात्पूर्व्वमारामं] मद्दाक्षि [न्या] दिगुत्तर [म् ।]
ददौ स नित्यपू [जार्थं] न्तस्मै सत्कारसिद्धये ॥
विप्रकीयगृहपश्चिमभा [गा]—

45. हेवभूमिनिल [यात्पु] रतश्च ।
दक्षिणेन वणिजो[6] निजरथ्या उ [त्तरे] ण ⏑ ⏑ – ⏑ ⏑ [पश्चात्] ॥
[त] स्य · · · प्रतिमामं· · [लो] हवानाम ।
दोष · · [मं] डपिकायामध्यर्द्ध [का] किर्णी—[दिने दिने] ॥
[हारिकां प्रति] वराटकै [कां] ? देव्याः
···· ····णर [थ्या] · ·····कगृह १ वसन्तमह [त्त] कहट्टे [व]-

46. णि [ग] ·· ··· ··महत्तकहट्टे · ·····पुर [तो] र [थ्या]
च्छि · · ॥-[जा] ⏑ पूरि ⏑ ⏑ – [रयशः] पताका
– – ⏑ – [रणमुखे स्ति] दिवं प्रयातः । तस्या] त्मजेन
वरविप्रनतांह्रियुग्मो दामोदरेण⏑ ⏑ – ⏑ ⏑ – ⏑ – – ॥ ❀ ॥

---

1. Dr. Kielhorn:—बिधबन्धात्. 2. Ibid. बाहुपंजरबृह—.
3. Ibid प्रविवेश. 4. Ibid—नाम्नै- 5. Ibid जम्बवा.
6. Original had वणिजो णिजो, but the second णिजो is struck out.

44. CHANDRAVATI PLATE OF CHANDRADEVA.

Prov. : Chandravati, Varanasi district. U. P.
Date : V. Samvat 1184 (= 1081 A. D.).
Lang. : Sanskrit. **Script.** : Nāgarī.
Ref. : Sten Konow, *Ep. In.* IX. 303.

Text

1. ओं स्वस्ति ॥ अकुण्ठोत्कण्ठ-वैकुण्ठ-कण्ठपीठलुठत्करः।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेस्तु वः ॥
आसीदसौ (शौ) तद्व-
2. तिवंस (श) जात [क्ष्मा] पालमालासु दिवं गतासु ।
साक्षाद्विस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारः ।
तत्सुतोभूत्म (न्म) हीचंद्र-
3. श्च [ं] द्रधामनिभं निजं ।
येनापारमकूपारपारे व्यापारितं यशः ॥
तस्याभूत्तनयो नयैकरसिकः क्षांतद्विषन्मंडाला (मंडलो)
विद्ध[1]स्तोद्धत-
4. धीरयोधतिमिरः श्रीचद्रदेवो नृपः ।
येनोदारतरप्रतापस (श) मिताशेषप्रजोपद्रवं श्रीमद्वाधिपुराधिराज्य-
मसमं दोर्विक्र-
5. मेणार्जितं ॥
तीर्थानि काशिकुसि (शि) कोत्तरकोश (स) लेन्द्र (-)
स्थानीयकानि परिपालयताभिगम्यः (य) ।
हेमाद्रितुल्यमनिसं (शं) ददता द्विजेभ्यो
6. येनांकिता वसुमती शतस (श) स्तुलाभिः ॥
स च परमभट्टारकमहाराजाधिराजपरमेस्व (श्व) र परममाहेस्व (श्व)
रःनिजभुजोपा [र्ज] जितश्री का-
7. न्यकुब्जा (ब्जा) धिपस्य श्रीचंद्रदेवो विजयी ॥ वावन पत्तलायां वडग-
वाग्रामे निवा [सिनो निखिल] जनपदानुपगतानपि च राजराज्ञी
युवरा-
8. जमंत्रिपुरोहितप्रतीहार सेनापति भांडागारिकाक्षपटलिकभिषक (षग्)-
नैमि [त्तिकांतःपु] रिकदूतकरितुरगपत्तनाकरस्थानगो [कु]-

1. Konow विध्वस्त—.

9. लाधिकारिपुरुषानाज्ञापया (य) त्यादिशति च यथा विदितमस्तु भवतां यथोप [रिलिखि] त ग्राम [:] सजलस्थलः सलोहलवणाकरः सम-

10. [त] स्याकरः सगर्त्तोषरः समधूकाम्रवनवाटिकातृणयूतिगोचरपर्यंतः सोद्धा [द्धा] धश्चतुराघाटविसु (शु) द्धः स्वसीमापर्यन्तः [संवत्]-

11. ११४८ कार्त्तिक सुदि.....अद्येह सौ (शौ) रि नारायण समीपे स्नात्वा विधिवन्मंत्रदेवपु (मु) नि मनुजभूतपितृगणांस्तर्पयित्वा ति-

12. मिरपटलपाटनप [टु म] हसंस (सम) [ुष्णुरोचि] षं समभ्यर्च्च त्रिभुवन[1] त्रातुर्वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषा हविर्भुजं [हु] त्वा-

13. मातापित्रोरात्मन [श्च] पुण्यप्र (य) [शोभिवृद्धये] वसिष्ठगोत्राय। वसिष्ठैकप्रवराय अणरुधपौत्राय वर [ा] हस्वामिपुत्राय। वरुणेस्वय (श्वर)-

14. स (श) र्म्मणे ब्रा (ब्रा) ह्मणाय गोकर्स (र्ण) कुशलतापूतकरतलोदकेनास्माभिः आचंद्रार्कं यावच्च (च्छा) सनीकृत्य प्रदत्तः। मत्वा यथादीयमानभागभो-

15. गकरप्रवणिकरतुरुष्कदंड कुमरगदिआणकप्रभृतिसमस्ता [ः] नियताऽनियतादायानाज्ञा (ं) विधेयीभूय दास्यथ-

16. इति ॥ भवंति चात्र पौराणिका [:] श्लोकाः ॥ ॥
भूमि यः प्रतिगृह्णाति यश्चभूमिं प्रयच्छति।
उभौ तौ पुण्यकर्म्माणौ नि-

17. यतौ स्वर्ग्गं (र्ग) गामिनौ ॥
सं (शं) खं भद्रासनं च्छत्रं[2] वरास्त्रा (श्वा) वरवारणाः।
भूमिदानस्य चिह्नानि फलम (मे) तत्पुरंदर ॥
षष्टि (ष्टिं) वर्षसहस्रा-

18. णि स्वर्गे वसति भूमिदः [।]
आच्छेत्ता चानुमन्ता च ता-[य]`व नरकं (के) वसेत् ॥
स्वदत्तां परदत्तां वा यो हरेद्व (त व) सुंधरां।
स विष्ठायां कृमिर्भूत्वा

19. पितृभिः सह मज्जति ॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः।
कृष्णसर्प्पाश्च (श्च) जायंते देवव्र (ब्र) ह्मस्वहारिणः ॥
न विषं वि [ष] भित्या-

20. हु [°] व्र (ब्र) ह्मस्वं विषमुच्यत (ते)।
विषमेकाकिनं हति (°) व्र (ब्र) ह्मस्वं पुत्रपौत्रिआकं (पुत्रपौत्रिकं) ॥

---

1. The engraver originally engraved त्रिभुवम, but corrected it.

2. Konow, छत्त्रम्

गामेकाम् स्वर्सेमे[1]कं भूमेरप्येकमंगुलं ।
हरं (हरन्) नरकमाप्नोति यावदा-
21. भूतस [˙] प्लवं ॥
तडागानां सहस्राणि अश्वम [ˆ] धसतानि[2] च ।
गवां का (को) टि प्रदानन (नेन) भूमिहर्त्ता न सुयति (शुध्यति) ॥
व (ब) हुभिर्वसुधा भुक्ता राजभिः च (स) ग-
22. रादिभि [:] ॥ (।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥
यानीह दत्तानि पुरा नरे [ः] द्रै [˙]
दानानि धर्म्मार्थिय[3]शस्कराणि [।]
नि [र्माल्यवांत प्रति]-
23. मानि तानि
को नाम साधुः पुनरादधीत ॥ ॥
लिखीतंमिदं[4] तांम्रपटक [˙] ठक्कुरश्रीमहणंद ॥

45. SARNATH INSCRIPTION OF KUMARADEVĪ.

Prov. : Sarnath, Varanasi district, U. P.
Date : Middle of the 12th century. A. D.
Lang. : Sanskrit. **Script.** : Nāgarī.
Ref. : Sten Konow, *Ep Ind.* IX, pp. 319-328.

Text

1. ओं नमो भगवत्यै आर्यवसु[5]धारायै ॥
समवतु वसुधारा धर्मपीयूषधारा-
प्रशमितबहुविश्वोद्दामदुःखोरुधारा ।
धनकनकसमृद्धिं भूर्भुवः स्वः[6] किरन्ती
तद्-
2. खिलजनदैन्यान्याजयन्ती जगन्ति ॥ [1]
नैत्रैरुत्कण्ठितानां चरणमुपनयंश्चारु चन्द्रोपलाना-
म्मानग्रन्थिम्विभिन्दन् सह कुमुदवनीमुद्रया मानिनीनाम् ।
दृग्धन्दग्धेश्वरेणा [मृ]-

---

1. Ibid. गामेकां स्वर्णमेकं च.
2. Konow. अश्वमेधशतानि च.
3. Ibid. धर्मार्थयशस्—.
4. Ibid. लिखितमि—
5. वसुधारा is a Buddhist goddess.
6. Konow स्वः

3. तनिकरकरैर्जीवयन् कामदेवं
कान्तोयं कौमुदीनां स जयति जगदालोकदीपप्रदीपः ॥ [2]
वंशे तस्य नमस्यपौरुषजुषि प्रस्फारकीर्त्तिस्विषि
द्राक् शौचेन सु [राप]-

4. गामदमुषि प्रत्यर्थिलक्ष्मीरुषि ।
वीरो वल्लभराजनामविदितो मान्यः स भूमीभुजां
जेतासीत्पृथुपीठिकापतिरतिप्रौढप्रतापोदयः [3]
क्षिप्तोरवंशकुमुदोदयपूर्ण-

5. चन्द्र
श्रीदेवरक्षित इति प्रथितः पृथिव्याम् ।
पीठीपतिर्गजपतेरपि राज्यलक्ष्मीं
लक्ष्म्या जिगाय जगदेकमनोहरश्रीः ॥ [4]
तस्मादास पयोनिधेरिव विधु-

6 स्त्रीवण्यलक्ष्मीविधु-
र्नेत्रानन्दसमुद्रवर्द्धनविधुः कीर्त्तिद्युतिश्रीविधुः ।
सौजन्यैकनिधिः स्फुरद्गुणनिधिर्गाम्भीर्य्य-वाराशिधि-
र्हर्म्माद्वैतनिधिः स च[ण्डि]म-

7. निधिः शस्त्रैकविद्यानिधिः ॥ [5]
दीनानामभिवाञ्छितैकफलदः प्रत्यक्षकल्पद्रुमो
दृप्यद्वैरिगिरीन्द्रभेदनविधौ दुर्वारवज्रश्च य ।
कान्तान [ा] श्मद-

8. नज्वरोपशमने सिद्धौषधीपल्लवो
वाहुर्यस्य वभूव भूतलभुजामन्तश्चमत्कारिणः ॥ [6]
गौडेऽद्वैतभटः सकाण्डपठिकः क्षत्रैकचूडामणिः
प्रख्यातो[1]

9 महणाङ्कपः क्षितिभुजाम्मान्योभवन्मातुलः ।
त (तं) जित्वा युधि देवरक्षितमधात् श्रीरामपालस्य यो ।
लक्ष्मीं निजितवैरिरोधनतया देदीप्यमानोदयाम् ॥ [7]
कन्या महण-

10. देवस्य तस्य कन्येव भूभृतः ।
सा पीठी[2]पतिना तेन तेनेवोढा स्वयम्भू (भु) वा ॥ [8]

---

1. Konow प्रख्यातो.

2 Konow suggests that "Pīṭhī or Pīṭhikā is synonymous with Pīṭha" and is therefore possible that Pīṭhī is identical with Pīṭhāpuram (*Ep. Ind.* IX. p. 322). For other variants of Pīṭhāpura or Pīṭhāpuri Cf. *Ep. Ind.* IV p 37, 357, N. 4.

ख्याता शङ्करदेवीति तारेव करुणाशया ।
व्यजेष्ट कल्पवृक्षाणां लता दानोद्यमेन या ॥ [9]
अ–

11. जनि कुम[1]रदेवी हन्त देवीव ताभ्यां
शरदमलसुधाङ्शो[2]श्चारुलेखेव रम्या ।
दुरितजलधिमध्यालोकमुद्धर्त्तुकामा
स्वयमिह करुणार्त्ता तारिणीवावतीर्णा ॥ [10]

12. याम्वेधाः प्रविधाय शिल्परचनाचातुर्य्यदर्प्पं व्यधा–
द्यद्वक्त्रेण जितस्तुषारकिरणो हीणः स स्वस्थोभवत ।
रात्रावुद्गममातनोति मलिनो जातः कलङ्कीतत–
स्त–

13. स्याः सुद (सुन्द) रिमा स विस्मय[3]करो वाच्यः मिमस्मा[4]दृशैः ॥ [11]
चित्रञ्चञ्चलहेककङ्कणमवधून्धस्फुरद्वागुराम्
बिभ्राणा तनुमस्पदम्प्रविलसत्कान्त्याभिकान्तश्रिया ।

14. खेलत्क्षीरसमुद्रमान्द्रलहरीलावण्यलक्ष्मीमुषं
मोषं शैलसुतामदस्य दधती सौभाग्यगर्वेण सा ॥ [12]
धर्माद्वैतमतिर्गुणाहितरतिः प्रारब्धपुण्याचिति–

15. र्दानोदारधृतिर्मनङ्गजगतिर्नेत्रा (त्रा) भिरामाकृतिः ।
शास्तृन्यस्तनति[5]जनोदितनुतिः कारुण्यकेलिस्थिति–[6]
नित्यश्रीवसतिः कृताध्वविहृतिः स्फायद्गुणाहंकृ

16. तिः ॥ [13]
जगति गहडवाले क्षत्रव (वं) शे प्रसिद्धे–
जनि नरपतिचन्द्रश्चन्द्र (मा) नामा नरेन्द्रः ।
यदसहननृपाणाङ्कामिनीवाष्पवाहेः (हैः)
शितितरमिदमासीद्यामुन (नं) तू (न्) नमस्भः ॥ [14]
नृ–

17. पतिमदनचन्द्रश्चण्डभूपालचूडा–
मणिरजनिसतस्माद्विभ्रदेकातपत्र [म्] ।
धरणितलमनस्य प्रौढतेडो (जो) नलश्रीः
श्रियमपि च मघोनः स्वश्रियाधो दधानः ॥ [15]
वाराण–

18. सी भुवन रक्षणदक्ष एको
दुष्टात्तुरुष्कसुभटादवितुं हरेण ।
उक्तो हरिस्स पुनरत्र बभूव तस्माद्

---

1. Read.कुमार देवी. 2. Read. सुधांशो—. 3. Konow विस्मय—.
4. Ibid. मस्मादृशैः. 5. Ibid.—नतिर्ज. 6. Ibid.—स्थितिर्नि.

गोविन्दचन्द्र इति प्रथिताभिधानः ॥ [16]

वत्साः कामदुहां कणा-

19 मपि पयःपूरस्य पातु[1] न ते चित्रं
प्रागलभन्त याचकमनः सन्तोषनित्यव्ययात् ।
त्यागैर्यस्य महीभुजः[2] प्रमुदिते तथाचकानाश्रये
स्वच्छन्दाहितनित्यनिर्भरपयः-

पानीत्सवैरासते ॥ [17]

20

यद्विद्वेषिमहीभुजां पुरवरे प्रभ्रष्टहारावली-
व्याधास्तन्मृगपाशबन्धमनसा [3]गृह्णन्तिनैवभ्रमात् ।
व्याधाः स्रस्तसुवर्णकुण्डलमहिभ्रान्त्या

तदत्यायते-

21. दंष्ट्रैर्द्रागपसारयन्ति च भयप्रोत्कम्पिहस्तस्रजः ॥ [18]
यस्योत्सन्नविरोधिभूपतिपुरप्रासादपृष्ठोपरिप्रत्यग्रस्फुरदुग्रशष्पकवलव्या-
लोलवाजि-

स्रजः ।

22. आदित्यस्त्वभवत्स मन्थररथश्चन्द्रोपि मन्दोभवत्
वा[4]सग्रासविरूद[5]लोभहरिण रक्षन् पतन्तन्ततः ॥ [19]
अहह कुमरदेवी तेन र [ा] ज्ञा प्रसिद्धा
त्रि (क्षि) जगति

23. परिणीता श्रीरिवेहाच्युतेन ।
प्रविलसदवरोधे तस्य राज्ञोङ्गनानां
नियतममृतरश्मेर्लेखिका तारकासु ॥ [20]
वी[6]हारो नवखण्डमण्डलमहीहारः कृतोयन्तया

24. तारिण्या वसुधारया ननु वपुर्विभ्राणयालंकृतः ।
यं दृष्ट्वा प्रविचित्रशिल्परचनाचातुर्य्यसीमाश्रयं
गीर्वाणैः सुदृश [श्च] विस्मयमगाद्द्राग्विश्वकर्मापि सः । (॥) [21]
श्रीधर्मचक्रजि-

25. नशासनसञ्चिवद्धं
सा जग्बुकी सकलपत्तलि[7]वाग्रभूता ।
तत्ताम्रशासनवर (र) प्रविधाय तस्यै
दत्वा तया शशिरवी भुवि यावदास्ताम् ॥ [22]
धर्माशोकनराधिपस्य समये श्रीध-

---

1. Konow. पातु. 2. Ibid. भुजः— 3. Read. गृह्णन्ति.
4. Ibid. मवद्भास—. 5. रूढलोभहरिण 6. Read. विहारो.
7. Konow. पत्तलिका—.

26. म(र्म) चक्रो जिनो
याहक् तन्नयरक्षितः पुनरयञ्चक्रे ततोऽयद्भुतम् ।
वीहा[1]रः स्थविरस्य तस्य च तया यत्नादयङ्कारित-
स्तस्मिन्नेव समर्प्पितश्च वसतादाचन्द्रचण्डद्युति ॥ [23]
तत्कीर्त्तिरप-

27. रिपालयिष्यति जनो यः कश्चिदुर्वीतले
सा तस्याङ्घ्रियुग प्रणामपरमा यूयं जिनाः साक्षिणः ।
तस्याः कश्चिदनिश्चितो यदि यशोव्यालोपकारी खलः
तं पापीयसमा-

28. शु शासति तुनस्ते लोकपालाः क्रुधा ॥ [24]
एकस्तीर्थिकवादिवारणघटासङ्घट्टकण्ठीरवः
साहित्यो [ज्] ज्वलरत्नरोहणगिरियोंद्यष्टभाषाकविः ।
ख्यातो वङ्गमहीभजः[2]

29. प्रणयभूः श्रीकुन्दनामाकृती
तस्याः सुन्दरवर्णगुम्फरचनारम्यां प्रशस्तिं व्यधात् ॥ [25]
एषा प्रशस्तिरुत्कीर्णा वामनेन तु शिल्पिना ।
राजावर्त्तस्य सापत्यन्दधाने प्रस्तरोत्तमे ॥ [26]

46. KAMOULI COPPER PLATE OF GOVINDACHANDRA.

Prov. : Kamouli, near the confluence of the Varunā and the Gangā at Varanasi, U. P.
Date : V. S. 1182 (= 1125-26 A. D.).
Lang. : Sanskrit. **Script.** Nāgarī.
Ref. : F. Kielhorn, *Ep. Ind.* Vol. IV, pp. 99 ff.

Text

1. ओं स्वस्ति ॥
अकुण्ठोरुकण्ठ-वैकुण्ठ-कण्ठपीठ-लुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेस्तु वः ॥ [1]
आसीदशीतद्युति वंश जात-

2. क्षमापालमालासु दिवङ्गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारहः ॥ [2]
तत्सुतोभून्महीचन्द्रश्चन्द्रधामनिभद्विज-

---

1. Better विहारः, but this spoils the metre. 2. Konow. भुजः,

3. म् ।
येनापारमकूपारपारे[1] व्यापारितं यशः ॥ [3]
तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतधीत (र) योधतिमिरः
4. श्रीचन्द्रदेवोनृपः ।
येनोदारतरप्रतापशमिताशेषप्रजोपद्रव
श्रीमद्वाधिपुराधिराज्यमसमन्दीर्व्विक्रमेणार्जितम् ॥ [4]
तीर्थानि का-
5. शिकुशिकोत्तरकोसलेन्द्र-
स्थानीयकानि परिपालयताभिगम्य ।
हेमाद्रितुल्यमनिशन्ददता द्विजेभ्यो
येनाङ्किता वसुमती शत-
6. शस्तुलाभिः ॥ [5]
तस्यात्मजो मदनपाल इति क्षितीन्द्र-
चूडामणिर्व्विजयतेनिजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षा-
7 लित कलिरजःपटलन्धरित्र्याः ॥ [6]
यस्यासीद्विजय प्रयाणसमये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भिपदक्रमासमभरभ्रश्यन्मही-
8 मण्डले ।
चूडारत्नविभिन्नतालुगलितस्थानासृगुद्गासितः
शेषः पेषवशादिव क्षणमसौ क्रोडे निलीनाननः ॥ [7]
तस्मादजाय-
9. त निजायत वा (बा) हुवल्लि-
व (ब) न्धा [व] रुद्ध नवराज्यगर्ज्जो नरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवा-
10. स्खु (ख्खु) राशेः ॥ [8]
न कथमप्यलभन्त रणक्षमांस्ति सृषु दिक्षु गजानथ वज्रिणः ।
ककुभि वभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घ-
11. टागजाः ॥ [9]
सोयं समस्तराजचक्रसंसेवितचरणः परमभट्टारकमहाराजाधिराजपरमेश्वर
परममाहेश्व [र] निजभुजोपार्जि-
12. त श्रीकान्यकुब्ज (ब्जा) धिपत्य श्रीचन्द्रदेवपादानुध्यात परमभट्टारक
महाराजाधिराजपरमेस्व (श्व) र परममाहेश्वर श्रीमदनपा-

1. Originally—परे seems to have been engraved.

13. लदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वर परममाहेश्वरा-
श्वपति (ति) गजपतिनरपतिराजत्रयाधिप-
14. ति विविधविद्याविचारवाचस्पति श्रीमद्गोविन्दचन्द्रदेवो विजयी हलद्दोय
पत्तलायां महत्तोणमौ अ ग्राधा (म) निवासिनो मि (नि)-
15. खिलजनपदानुपगतानपि [च] राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहार-
सेनापति भाण्डागारिकाक्षपटलिकप्रभृतीन् (न्नै) मित्तिकान्तःपु-
16. रिक दूत करितुरगपत्तनाकरस्थानगोकुलाधिकारि पुरुषां[1]श्चाज्ञापयति
वो (बो) धयत्यादिशति च यथा विदितमस्तु भवतां यद्गो (यो)परि-
17. लिखितग्रामः सजलस्थलः सलोहलवणाकरः समस्याकरः
सपर्णाकरः सगर्त्तोषरः स मधूकचूतवनवाटिकाविटपतृण यूति-
18. गोच [र] पर्यन्तः सोद्दं [व] धश्चतुराघाटविशुद्धः स्वसीमापर्यन्तः
सवत् ११८२ माघ सुदि १५ स (श) नौ श्रीमदप्रतीहार समावासे
सोमग्र-
19. हण पर्व्वणि गङ्गायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृ-
गणांस्तर्प्पयित्वा तिमिरपटलपाटनपटु (टु) मसहमुष्णरोचिष-
20. मुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्च त्रिभुवनत्रातुर्व्वासुदेवस्य
पूजां विधाय हविषा हविर्भुज हुत्वा मातापित्रोरा-
21. त्मनश्च पुण्ययशोभिवृद्ध (द्ध) ये कुशलतापूतकरतलोदकपूर्व्वमस्मामि-
र्व्व (र्व्व) न्धुलगोत्राय व (ब) न्धुलाघमर्षण-
विश्वामित्र त्रि [प्र] वरा-
22. य दीक्षित श्रीपुरुषोत्तमपौत्राय दीक्षित श्रीवीह्लापुत्राय
महापुरोहित श्रीजागूश[2]र्म्मणे आचन्द्रार्कं शासनीकृत्य (त्य)-
प्रदत्तो (त्तो)
23. मत्वा यथादीयमानभागभोगकर प्रवणिकरकूटकप्रभृति-
समस्तादायानाज्ञाविधि (धे) यीभूयदास्यथ ॥ भवन्तिचात्र पुण्यश्लो-
24. काः ॥
भूमिं यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्ग्गगामिनौ ॥
शङ्क भद्रासनं च्छ (छ) त्रं वराश्वा व-
25. र वारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरन्दर ॥
सर्व्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सम्म [ा] न्योयं धर्म्म-
26. सेतुर्न्नृपाणां
काले काले पालनीयो भवद्भिः ॥

1. Kielhorn पुरुषानाश्चा—. 2. Kielhorn—शर्मण.

व (ब) हुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य त-
27. दाफलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
स [व] ष्ठायां कृमिर्भूत्वा पितृभिः सहमज्जति ॥
श्रीवास्तव्यकुलो-
28. द्भूत कायस्थोल्हणसूनुना ।
लिखितस्ता[1]म्रपट्टोयं कीठजेन नृपाज्ञयेति ॥ छ ॥ छ ॥

47. BANARAS COPPER PLATE GRANT OF GOVINDCHANDRA

Prove. . Varanasi, U P
Date. . V S. 1162 = 1105 A D
Lang. . Sanskrit. **Script.** Nāgarī of the 12th century. A. D.
Ref. : Arther Venis, *Ep. Ind.* II, pp. 359–61.

Text

1. ॐ नमो भगवते वासुदेवाय ॥
नमाद्यं सर्व्वदेवानां दामोदरमुपास्महे ।
त्रैलोक्यं यस्य वक्षीव क्रोडान्तःस्थं वलित्रयी ॥ [1]
वंसे[2] गाहडवालाख्ये बभूव विजयी नृपः ॥
2. महीयलसुतः श्रीमाञ्चलनाभागसन्निभः ॥ [2]
याते श्रीभोजभूपे विधु[3]धवरवधूनेत्रसीमातिथित्वं
श्रीकर्ण्णे कीर्त्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने ।
3. भर्त्तारं यं धरित्री त्रिदिवविभुनिभ प्रीतियोगादुपेता
त्राता विश्वस्य पूर्व्वं समभवदिह स क्ष्मापतिश्चंद्रदेवः[4] [4]
तस्मादभूद्रिषदिलापतिदन्तिसिंहः
क्षोणीपति-
4. मंदनपाल इति प्रसिद्धः ।
येनाक्रियन्त वभुशः[5] समरप्रबन्धा.[6]
सन्नत्तिप्रहृतशत्रुकबन्धबन्धाः[7] ॥ [4]

---

1. Ibid.—ताम्र— 2. A. Venis, वंशे. 3. Ibid. विबुध.
4. Ibid. चन्द्रदेवः 5 Ibid. बहुशः 6. Ibid. प्रबन्धाः
7. Ibid. कबन्धबन्धाः

तस्मादजायत नरेश्वरवृन्दवंद्य[1]-
पादारविंदयुगलो उव-

5. लितप्रतापः ।
क्षोणीपतीन्द्रतिलको रिपुरग[2]भंगी
गोविन्दचन्द्र इति विश्रुतनामकीर्त्तिः ॥ [5]
तिष्ठतो यस्य दोःस्तम्भे मत्तसौयँकदन्तिनः ।
धनुर्गुणकिणश्रेणी म-

6. दराजीव लक्ष्यते ॥ [6]
संवत्सहस्रैके द्विषष्ट्यत्तरशताभ्यधिके कार्त्तिकशौर्ण्ण[3]मास्ये
भौमे दिनेऽङ्केपि संवत् ११६२ सुदि ५[4] भौमे अद्येह
श्रीमद्विष्णुपुरावासितश्री-

7. विजयकटके सकलकलमषक्षयकारिण्यां गंगायां[5] स्नात्वा ॥
यथाविधानं मंत्रदेवऋ[6]षिमनुष्यभूतपितृंस्तर्पयित्वा । सूर्यं
भट्टारकं संपूज्य । भगवन्तं महेश्व[7]-

8. रं समभ्यर्च्चर्य । विश्वाधारं वासुदेवं समाराध्य । मंत्रपूतं[8]
भुतवह[9] हुत्वा । पंचा[10]लदेशे जीआवतीपत्तलायां उसिथागामे[11]
समस्तविषयसार्व[12]वर्त्तिसमस्त-

9. महत्तमजनपदान्सं[13]बोधयति समाज्ञापयति ॥ यथा ग्रामोयं
मया स्वसीमातृणयूतिगोचरपर्यन्तः सजलस्थलः साम्रमधूकः
सगर्त्तोषरपाषाणः स-

10. नदीवनलोहलवणाकरः सदशापराधदण्डः साकाशपातालः
स्वसीमाचतुराघाटविशुद्धान्वः पूर्व्वदत्तदेवब्राह्मणवर्जितः ।
नलिनीदलगतजल[14] ।

11. लवतरलतरं प्राणिना[15] जीवित विज्ञाय । करिकलभकर्णाग्रविलसितचपलां
लक्ष्मीं विलोक्य । जलबुद्बु[16]दाकारं यौवनं परिज्ञाय ।
कदलीदण्डव-

12. त् संसारमसारतंरं[17] समाकलय्य ॥ साधिवदेशनिर्गताय

---

1. Ibid.—वृन्दवन्द्य पादारविन्द— 2. A. Venis. रिपुरङ्गमङ्गी गोविन्दचन्द्र
3. Ibid. पौर्णमास्यां 4. Ibid. १५ instead of ५.
5. Ibid. गङ्गायां 6. Ibid. मन्त्रदेव ऋषि मनुष्यभूतपितृंस्तर्पयित्वा
7. Ibid. महेश्वर 8. Ibid. मत्र— 9. Ibid. हुतवत—
10. Ibid. पञ्चाल— 11. Ibid. ग्रामे. 12. Ibid पार्श्ववर्ति—
13. Ibid. सम्बोध. 14. This sign of punctuation is superfluous.
15. A. Venis. प्राणिनां जीवित 16. Ibid. बुद्बुदा. 17. Ibid. तरं.

वाजसनेयसाखोमृगाय वंधुलगोत्राय वधुल[1] अघमर्षणविरवामित्र त्रिपवराय ॥

13. दीक्षितनागानद[2]पौत्राय दीक्षितपुरवासपुत्राय [3]यजुर्वेदविद्यानलिनीविकासनप्रत्यूषभास्कराय दीक्षितवीरुहाकाय ।
श्रद्धाविशुद्धमनसा

14. महाराजपुत्रश्रीमद्गोविद[4]दचंद्रदेवेन कुशपूतहस्तोदकेन कार्त्तिक्यां निमित्ते सम्यगाजू[5]यास्मै ब्राह्मणार्या[6] मातापित्रोरात्मनश्च
यशःपुण्यवि-

15. वृद्धये चंद्रार्कोदिधि[7]क्षितिपवनाम्बराणि यावत् शासनीकृत्य
प्रदत्तः । मत्वा यद्दीयमानभागभागकूटकदशवधविंशति-
छ्रबथाकेरे तुरु-

16. ष्कदण्डप्रभृतिसर्व्वादायान[8] तत् सर्वमस्मै निसेदनीय[9] ॥ ये यास्यन्ति महीभृतो मम कुले कि वा परस्मित्पुर[10]स्तेषामेष मयाजलिर्विरचित्ता नादेय-

17. सत् कियत् दूर्व्वामात्रमपि स्वधर्म्मनिरता दत्त सदा पाल्यता[11]
वायुर्वास्यति तप्यति प्रतिपन श्रुत्व मुनीना वचः ॥ [7]
अत्राथ पौराणिकाः-

18. श्लोकाः ॥
भूमि[12] यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्गगामिनौ ॥ [8]
योचितं प्रतिगृह्णाति ददात्यचि-

19. तमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥ [9]
बहुदि[13]र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा-

20. फलं[14] ॥ [10]
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्म्मार्थयशस्कराणि ।

---

1. Ibid. बप्पुल.
2. Ibid नन्द.
3. Ibid यजुर्वे.
4. Idid. गोविन्दचन्द्र
5. Ibid. सम्यगाह्वया—
6. Ibid. ब्राह्मणाययि
7. Ibid. चन्द्रार्कोदधि क्षिति पवनाम्बराणि
8. A Venis —यान्
9. Ibid. निवेदनीयम्.
10. Ibid. परस्मिन्पुरस्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात् कियत् ।
11. Ibid. सवधर्म्म, दत्त, पाल्यतां
12. Ibid. भूमिं.
13. Ibid. बहुभि—
14. Ibid. तदा फलम्

निर्म्माल्यवत्[1]प्रतिमानि तानि को नाम साधुः पुनरादद्दीत ॥ [11]
अस्मत्कुलं पर-

21. मुदारमुदाहरन्निरनैश्च[2] दानमिदमच ।[3] णुमादनीयं ।
लक्ष्म्यास्तडित्सलिलबुद्बु[4]दचंचलाया दानं फलं परयशःपरिपालनं[5]धज-
षखभदासनं-

22. छत्र वराश्वा वरवारेणाः[6] ।
भूमिदानस्य चिह्नानि मसं ❀ ❀ [7]पुरंदर [13]
स्वदत्तां परदत्तां वा यो देरत वसंधरां ।
स विस्टायां [8]कृमिर्दूला पितृभिः स

23. ह मज्जति ॥ [14]
प्रतीहारगौन[9]मश्क जागूकश्च पुरोहितः ।
जननी राल्हदेवी च वाल्हणश्च महत्तकः ॥ [15]
एतेषां संमत्ति प्राप्य सम्यग्लिखित-

Reverse

24. वानिदम् ।
नाम्ना विजयदासाख्यः शासनं राजसंमतम् ॥ [16]

48. KHAJURAHO STONE INSCRIPTION OF CHANDELLA YAŚOVARMAN.

Prov. : Khajuraho, M. P.
Date. · V E. 1011 (953-54 A. D.).
Lang. . Śanskrit. **Script.** : Kutila Devanāgarī.
Ref. · Keilhorn, *Ep. Ind* Vol. I. pp. 122–135.

Text

1. ओं नमो भगवते वासुदेवाय ॥
दधानानेकां यः किरिपुरुषसिं [होभय] जुषं

---

1. Ibid.—वान्त— 2. A. Venis.—मन्यैश्च.
3. Ibid.—मिदमभ्यनुमोदनीयम 4. Ibid. लक्ष्म्या and चञ्चलाया.
5. Ibid. परिपालनञ्च. 6. Ibid. शङ्ख भद्रासनं छत्र वराश्वा वरवारणाः
7. A. Venis restores फलं स्वर्गः पुरन्दरः.
8. Ibid. हरेत वसुन्धराम् । स विष्टायां कृमिर्भूत्वा । 9. Ibid.—गोतमश्च

त [दा] कारोच्छेद्यां तनुमसुरमुख्यानजवरात् ।
जघान श्रीनुग्रान्ज (ज्ञ) गति कपिलादीनवतु वः
स वैकुण्ठः कण्ठध्वनिचकितनिःशेषभुवनः ॥ [1]
पायासुर्व्व (र्व्व) लिवन्च (च्छ) नय्यतिकरे देवस्य विक्रान्तयः
सद्यो विस्मितदेवदानवनुतास्तित्रस्ति [लो] कीं

2. हरेः ।
यासु म्र (त्र) ह्मवितीर्ण्णमर्घसलिलं पादारविन्दच्युतं
धत्तेद्यापि जगत (त्त) यैकजनकः पुण्यं स मूर्द्ध्ना हरः ॥ [2]
देवः पातु स वः पयःकणभृति व्योम्नीव ताराचिते
दैत्याक्षिव्रणलां[1]च्छने दिविसदः संस्तूय सर्व्वानपि ।
तस्मिन्नजनशैलभित्तिविपुले वक्ष [:] स्थले यस्य ताः
पेतुर्मन्दरसङ्गसंभ्रमवलल्लक्ष्मीकटाक्षच्छटाः ॥ [3]
गंभीरो-

3. म्बु (म्बु) धयः शशांकरुचिमान्भास्व [त्प्र] तापोज्व (ज्ज्व) लो
धीरो धात्रि महान्महीधरवराः कल्पद्रुमास्त्यागवान् ।
आकल्पादविकल्पनिर्म्मलगुणग्रामाभिरामः[2] प्रभुः
सत्य व्रु (भू) त यदि क्वचित्पुनरभूत्तल्यो यशोवर्म्मणः ॥ [4]
प्रधानादव्यक्तादभवदविकारादिह
महानहंकारस्तस्मादजनि जनितोपग्रहगणः ।
ततस्तन्मात्राणि प्रसव-

4. मलभ[3]न्त क्र [म] वशा-
दथैतेभ्यो भूतान्यनु भुवनमेभ्यः प्रवृते ॥ [5]
इहाद्यो विद्यानां कविरखिलकल्पद्युपरनौ[4]
परः साक्षी देवस्त्रिभुवनविनिर्माणनिपुणः ।
स विश्वेषामीश [:] स्मितकमलकिञ्जल्कवसति-
र्महिम्ना स्वेनैव प्रथममथ वेधाः प्रभुरभूत् ॥ [6]
तस्माद्विश्वसृजः पुराणपुरुषादाम्नायधाम्नः कवे-
र्येभूवन्मु-

5. नयः पवित्रचरिताः पूर्व्वे मरीच्यादयः ।
तत्रात्रिः सुषुवे निरन्तरतपस्तीव्रप्रभावं सुतं

---

1. Kielhorn लाञ्छने.
2. Originally the akshara मि was omitted and is engraved above the line.
3. The original had—लभन्त
4. The two letters were originally omitted and are engraved above the line.

चंद्रात्रेयमकृत्रिमोज्व (ज्ज्व) लतरज्ञानप्रदीपं मुनिं ॥ [7]
अस्ति स्वस्तिविधायिनः स जगतां निःशेषविद्याविद-
स्तस्यात्मोपनताखिल [श्रु] तिनिधेर्व्वन्शः[1] प्रशस्यास्पदं ।
यत्राभूच्च पराक्रमेण लघुता नो चाटुकारोद्धति-
र्नाल्पप्यंतरसा-

6. रना न च फलप्राप्ति [:] क्षयायात्मनः ॥ [8]
त्रस्तत्राणप्रगुणमनसां सर्वसंपत्पदाना-
मुद्युक्तानां कृतकृतयुगाचारपुण्यस्थितीनां ।
तत्रत्यानाममलयशसां भूभुजां का प्रशंसा
येषां शक्तिः सकलधरणीध्वंसने पालने वा ॥ [9]
तत्र क्षत्रसुवर्ण्णसारनिकषग्रावा यशश्चन्दन-
क्रीडालंकृतदिक्पु-

7. रन्ध्रवदनः श्रीनन्नुकोभून्नृपः ।
यस्यापूर्व्वपराक्रमक्रमनमन्निःशेषविद्वेषिणः
संभ्रान्ताः शिरसावहन्नृपतयः शेषामिवाज्ञां भयात् ॥ [10]
यस्यानंदितवंदिवृंदरचितस्तोत्रक्रियाप्रक्रमा-
त्संक्रान्तस्व (श्व) दुवैरिवर्गजयिनः कंदर्पकल्पाकृतेः ।
नाम क्षामतनूभूतां मृगदृशां सद्यो विधत्ते पदं
स्वान्तेषु

8. द्विषतां च राशिषु व (ब) लाद्वैक्लव्यमव्यामतं ॥ [11]
तस्मादभूदाजिपराजितारेः श्रीवाक्पतिर्वाक्पतितुल्यवाचः ।
यस्यामला भ्राम्यति भानुभाभिः सहैव लोकत्रितये[2]पि कीर्त्तिः ॥ [12]
यस्यामलोत्पलनिषण्ण (ष्ण) किरातयोषि-
दुद्गीततद्गुणकलध्वनिरम्यसानुः ।
क्रीडागिरिः शिखरनिर्झरवारिपातक्षात्का-

9. रताण्डवितकेकिगणः सविन्ध्यः ॥ [13]
तस्माद्विस्मयधाम्नः क्षीरा[3]ब्धेश्चन्द्रकौस्तुभौ यद्वत् ।
द्वावात्मजावभूतां जयशक्तिर्विजयशक्तिश्च ॥ [14]
तयोर्द्वयोरप्यमितप्रतापदावाग्निदग्धाहितकाननानि ।
कर्माणि रोमांचजुषः समेताः समूर्द्धकम्पं क्षितिपा [:] स्तुवन्ति ॥ [15]
तत्रानुजन्मा तनयं राहिलाख्यमजीजनत् ।
निद्राद-

---

1. Kielhorn—ऽवैंशः.
2. The original had—त्रितयेपि
3. The original had—क्षीरोब्ध— Kielhorn suggested क्षीराब्धे—.

10. रिद्धतां यान्ति यश्चिचिन्त्य[1] निशिद्विषः ॥ [16]
भीमभ्राम्यदसि (सु) चि स्रवदसृक्संपादिताज्यक्रिये
ज्यानिर्घोषवषट्पदे क्रमचरत्संरब्ध (ब्ध) [यो] धिर्व्वज्रि ।
अश्रान्तः समराध्वरेप्रतिहतक्रोधानिलोद्दीपि [ते]
[वै] रोदक्षिणि यः पशूनिव कृती मन्त्रैर्जुहाव द्विषः ॥ [17]
श्रीहर्षभूपमथ भूमिभृताग्वरिष्ठः[2]
सोसूत कल्पतरुकल्पमन-

11. रुपसत्व (श्व): [।]
अद्यापि यस्य सुविकासियशःप्रसून-
गन्धाधिवाससुरभीणि दिगन्तराणि ॥ [18]
यत्र श्रीश्च सरस्वती च सहिते नीतिक्रमो विक्रम-
स्तेजः सत्व (श्व) गुणोउद्य (ज्ज्व) लं परिणता क्षान्तिश्च नैसर्गिकी ।
सन्तोषो विजिगीषुता च विनयो मानश्च पुण्यात्मन-
स्तस्यानन्तगुणस्य विस्मयनिधेः किन्नाम वस्तु स्तुमः ॥ [19]
भीरुर्द्धर्मापराधे मधुरिपु-

12. चरणाराधने यः सतृष्णः
पापालापेनभिज्ञो निजगुणगणनाप्रक्रमेष्वप्रगल्भः ।
शून्यः पे (पै) शुन्यवादेनृतवचनसमुद्धारणे जातिमूकः
सर्व्वत्रैवं स्वभावप्रथितजुणतया नाम [कः स्तू] यतेमौ ॥ [20]
सोनुरूपां सुरूपाङ्गः कच्छुकाख्यामकुण्ठधीः [।]
सवर्णा[3]म्विधिनोवाह चाहमानकुलोद्भवां ॥ [21]
यस्यः पतिव्रततुलामधिरोढुमी-

13. शा
नारुन्धती गुरुतरामभिमानिनीति ।
पत्युः समीहितविधानपरापि साध्वी
कार्श्यन्तथा परमगादतिलज्जितेव ॥ [22]
गौडक्रीडालतासिस्तुलितखसव (ब) लः कोशलः कोशलानां
नश्यत्कस्मी (श्मी) रवीरः शिथिलितमिथिलः कालवन्मालवानां ।
सीद [स्सा] वद्यचेदिः कुरुतरुषु मरुत्सञ्वरो गूर्जराणां
तस्मात्तस्यां स जज्ञे नृपकुल-

14. तिलकः श्रीयशोवर्मराजः ॥[23]
स दाता राधेयः स च शुचिवचाः पांडुतनयः
स शूरः पार्थोपि प्रथितमहिमानः किमपि ते ।
व्यतीताः किं ब्रू (ब्रू) मो यदि पुन [रि] ह स्युः स्वचरिते

---

1. Ibid. य विचिन्त्य. 2. Kielhorn—तां वरिष्ठः.
3. Kielhorn. सवर्णां वि—

[हि] या नम्री (म्री) कुर्युर्वदनमवलो [क्यै] नमधुना ॥ [24]
अस्तत्रातरि तत्र भूभृति गणां क्लेशाय शस्त्रग्रहः
कामं दातरि सिद्धकेलिसुमनस्तल्पाय कल्पद्रुमाः [।]
विस्तेशः पर-

15 म (मा) र्थवृद्धिविधुरस्वान्तो विलासी स चे-
दास्ये तस्य सतान्दुरुत्पलवनप्रीत्यै दृशामुत्सवे ॥ [25]
यस्योद्योगे व (ब) लानां प्र [स] रति रजसि व्याप्त [भे] दो [न्तराले]
स्वः सिन्धुर्व (र्ब) हरोधाः पिहितरुचिरभूद्भानुरादर्शरम्यः ।
स [म्य] रदेवेन्द्रदन्ती मुदमधित वियत्साभ्रमालोक्य हन्साः[1]
सोत्कण्ठास्तन्थुरासीन्नयनदशशतीं-कूणितावृत्तशत्रोः ॥ [26]
अन्योन्याव (ब)-

16 द्धकोपद्विपकलहमिलद्दन्तदण्डाभिघात-
प्रोद्यज्ज्वला (ज्ज्वा) लाकलापप्रसृतहुतभुजि ज्याघनध्वानभीमे ।
पीतासृग्भी (क्षमी) वरूथः प्रमदक [लकल] ह्लादरौ [द्र प्रहासे]
धीरं भां [तेव लक्ष्मीः समरशि] रसि यं सं [भ्रमा] दालि [लिङ्ग] ॥ [27]
उत्तङ्गाञ्जनशैलसन्निभखलन्मत्तद्विपेन्द्रस्थित-
क्रध्यद्दुर्द्धरधन्विमार्गणगणप्रारब्ध (ब्ध) रक्षाक्रियं ।
विख्यातक्षितिपालमौ-

17 लिरचनाविन्यस्तपादाम्बु (म्बु) जं
सख्येसख्यव (ब) लं व्यजेष्ट गतभीर्यश्चेदिराज हठात् ॥ [28]
लक्ष्मच्छायाकलुषवपुषः कान्तिमद्दू [र] भि [न्दो]-
र [न्या] यत्त [स्फुरि] तविधुरा [स्रु] न्दरं चारवि [न्दात्] ।
य [स्या] – – ⏑ ⏑ ⏑ ⏑ ⏑ – – ⏑ – [चार्हवृत्तेः]
संभ्रान्ताभिः कथमपि मुख वीक्ष्य वैरिप्रियाभिः ॥ [29]
गङ्गानिर्झरघर्घरध्वनिभयभ्राम्यत्तुरङ्गव्रजाः
सद्यः सुप्तविबु (बु) द्धकेस-

18. रिरवत्रस्यत्करीन्द्राकुलाः ।
यत्सैन्यैः प्रतिकल्पपादपमुमालूनप्रसूनोच्चयाः
प्रालेयाचलमेखलाः कथमपि [क्रा] न्ताः श [नैर्हिंजये] ॥ [30]
उच्च [प्रा] कारभि [त्तिस्थि] त [स] मद [शिखिक्रू] – – [निना]द
– – [श्य] – ⏑ – – क्षुथ [रथ] तुरगप्राप्तवेगान्तरायः ।
यस्मिन्मध्यन्दिने स्यात्तरणिरनुदिन नीलकण्ठाधिवासं
जग्राह क्रीडया यस्तिलकमिव भुवः

19. किञ्च कालंजराद्रि ॥ [31]
आशस्त्रग्रहणादखण्डित महावीरव्रतप्रक्रियै-
रा वा (बा) ल्यादविलुप्तसत्य [समयै] रा पा [णि] पीडाविधेः ।

1, Kielhorn—हंसाः

अश्रान्तार्थिवि [तीर्ण] पूर्णविभवैस्त [थेप्सिता] कांक्षि [भि]-
[र्दूरोत्कर्षकथाकृतोद्ध] पुलकैर्यः साधुभि [:] स्तूयते ॥ [32]
[नि] न्दामुपै [मि] पुरुषान्तरसङ्गमेन
[शान्ति] क्ष जातु सततभ्रमणक्रमेण ।
यस्यानिपौरुषनिरस्तमनुष्यभावे
लोके स [मु]-

20 [द्गत] कीर्त्तिरनिन्दितैव ॥ [33]
एकैवोवाह लोकेस्मिन्पुत्रजन्मोत्सव शिरः ।
कच्छुका येन धीरेण देवकीव मधुद्विषा ॥ [34]
शौ [र्यौ] दार्यनयादिनिर्म [लगु] णग्रामाभिरा [मं यशो]
[धस्या] शेष [विशुद्ध] ना [थनि] लक [क्ष्मा] य [न्तिसि] द्ध [स्कि] यः ।
[तस्य स्तोत्रम] मित्रमर्हन [र] वे [:] स्पष्टप्रकाशीकृत-
त्रैलोक्यस्य सहस्रसख्यमहसो दीपप्रदानोपमं ॥ [35]
क्रोधोद्वृत्तान्तकभ्रूकुटिल-

21 पटरल (ण) च्छण्डकोदण्डयष्टि-
ज्याघातस्फारघोरध्वनिचकितमनःसंभ्रमभ्रान्तदृष्टु ।
स्पष्टं नष्टेषु दूरं क्वचिदपि रिपुषु त्रस्यते [जो] स्यु (स्थु) राशे-
र्यं [स्यौज] न व्य [रंसीद्भुवन] [वि] जयि [नश्चण्डदो] र्दण्डक-
[ण्डू]: ॥ [36]
यो लक्ष्म [र्म] नृप [ते]: शरदिन्दुकान्त-
माख्यातुमिच्छति यशःप्रस [रं] वचोभिः ।
दीपप्रभापरिचयेन विमुग्धवु [बु] द्धि-
र्मध्यन्दिने दिवसनाथमुदीक्षतेसौ ॥ [37]

22. यच्चाक्रामदवक्रमानसव [ब] लिव्याजप्रयोगापत-
त्पृथ्वीलंघनलब्ध [ब्ध] लाघवकचच्छेदी पदं वामनः ।
लोकालोकशिरःशतप्रतिहतज्योतिर्विवस्वान्न य-
त्तस्य क्रामति तन्निशाकर [महा] श्चास्प [र्द्धि शुभ्रं] यशः ॥ [38]
[धी] रो दिग्विजयेषु केलिसरसी [न्ती] व्रजता [पं द] ध-
न्निश्शेषद्विषदव्यथाभयतटीविन्यस्तसेनाभरः ।
मज्जन्मत्तकरीन्द्रपंकिलजलां श्रीलक्ष्मवर्मा-

23. भिध-
श्चक्रे शक्रसमः कलिन्दतनयां जह्नोः सुतां च क्रमात् ॥ [39]
आस्थानेषु महीभुजां मुनिजनस्थाने सतां सङ्गमे
ग्रामे पामरमण्डलीषु वणिजां वीथीपथे चत्वरे ।
[अ] ध्वन्यध्व [गसं] कथासु [निलये] र [रायौ] कसां विस्मया-
न्नित्यं [तद्गु] णकीर्त्तनैकमुखराः सर्व्वत्र सर्वे जनाः ॥ [40]

यस्यान [ने] शरदखण्डशशि प्रसन्ने
कोपं व्यनक्ति हृदयस्थमरिप्रिया-

24. णां ।
सिंदूरभूषणविवर्जितमास्यपद्म-
मुत्सृष्टहारवलय कुचमण्डलं च ॥ [41]
नेनैतद्वारु चामीकरकलसलसद्वयोम धाम व्यधायि
भ्राजिष्णु पांशुवंशध्वजपट [पटलां] दोलितां [भोज] वृन्दं ।
दैत्यारातेस्तुषारक्षितिधरशिखरस्पर्द्धि वर्द्धिष्णुरागा-
हृष्टे यात्रासु यत्र तृ (त्रि) दिववसनयो विस्मयन्ते समेताः ॥ [42]
कैलाशा (सा) द्भोट[1]नाथः सुहृदिति च ततः की-

25. रराजः प्रपेदे
साहिस्तस्मादवाप द्विपतुरगव (ब) लेनानु हेरम्ब (म्ब) पालः ।
तस्सूनोर्देवपालात्तमय हयप [ते]ः प्राप्य निन्ये प्रतिष्ठां
वैकुण्ठं कुण्ठनारिः क्षिति [धरनि] लकः श्रीयशोवर्मराजः ॥ [43]
श्रीधङ्कः स्वभुजप्रसाधितमहीनिर्व्याजराज्यस्थिति-
स्तस्मादास महोदधेरि व विधुः सूनुर्जनानन्दकृत् ।
युद्धे नश्यदरातिवर्गसुभटप्रस्तूयमानस्तुति-
र्नि-

26. स्यं नम्र (म्र) महीपमौलिगलितस्रक्पूजितांघ्रिद्वयः ॥ [44]
आकालक्षरमा च मालवनदीतीरस्थिते[2] भास्वतः
कालिन्दीसरितस्तटादिन इतोप्या चेदिदेशाव [धेः ।]
[आ तस्मादपि] विस्मयैकनिल [या] द्रोपाभिधानाद्रिरे[3]-
र्यः शास्ति क्षि [क्षि] मायनोर्जितभुजव्यापारलीलार्जि [तां ॥ [45]
यस्त्यागविक्रमविवेककलाविलास-
प्रज्ञाप्रतापविभवप्रभवश्चरित्रात् ।
चक्रे कृती

27. सुमनसां मनमामकस्मा-
दस्मादकालकलिकालविरामशंकां ॥ [46]
शब्दा (ब्दा) नुशाश्च (स) नविदा पितृमान्व्यधत्त
हेहेन माधवकविः स इमां प्रशस्तिं ।
यस्यामलं [कवि] यशः कृतिनः कथासु

---

1. Read—भूत.
2. Kielhorn suggested—स्थिताद्भास्वतः. The vowel of the letter ते must have been struck out.
3. गोपाद्रि is the hill-fort in Gwaliar and occurs in inscriptions found in this vicinity.

रोमाञ्चकञ्चुकजुषः परिकीर्त्तयन्ति ॥ [47]
संस्कृतभाषाविदुषा जय [गु] ण [पुत्रे] ण कौतुका [ल्लिखि] ता ।
रुचिराक्षरा प्रशस्तिः करणिकजह्वेन गौडेन ॥ [48]
पातान्नू-

28. मिपतिः पृथ्वीं त्रयीधर्म्मं [:] प्रवर्द्धतां ।
नन्दन्तु गोद्विजन्मान [:] प्रजा प्राप्नोतु निर्वृतिम् ॥ [49]
सम्वत्सरदशशतेषु एकादशाधिकेषु सम्वत् १०११ उत्कीर्णा चेयं रु
[पका] र ..... । श्रीं [वनायक]-
पालदेवे पालयति [वसु] धां वसुधानि [ध] ग [ता]
निर्द्वंग्ध [वै] रिं [भः ।] नमो भगवते वासुदेवाय ॥ ॥
नमः सवित्रे ।

49. KHAJURAHO STONE INSCRIPTION OF DHANGADEVA RENEWED BY JAYAVARMADEVA.

Prov. : Khajuraho, (M. P.)
Date. : V. S. 1059 (= 1001-2 A. D.),
renewal V. S 1173 (= 1115 A. D.)
Lang. : Sanskrit. **Script.** : Nāgari.
Ref. : Captain Bent. J. B. A. S. VIII pp. 159–184; Kielhorn. *Ep. Ind* Vol. I.pp. 137-147.

Text

1. ओं नमः शिवाय ॥
विष्टपविकटवटानामजायमानाय बीजभूताय ।
रुद्राय नमः पालनविलयकृते निःक्रिया[1]यापि ॥ [1]
तूर्णं घूर्णति यत्र गोत्रसि (शि) खरिण्यूहः समूहः पत-
त्यत्यावर्त्तितमूर्त्तिरार्त्तधिरुत कुर्व्वन्ककुप्कुम्भिनाम् ।
सप्ताम्भोध्यवधिप्रधूतवसुधाव (ब) न्धः कव (व) [न्धी] कृत-
स्व-

2. [र्गा] द्रिः क्षपकांडतांडवविधिः शैवः शिवायास्तु वः ॥ [2]
कस्त्वं द्वारि दिगंव (ब) रः क्षपणकः कस्मादकस्मादहो
वा (बा) ले शूलधरो धिगायुधविधिं व (ब) र्हास्यवद्याही-
ननु ।

1. Kielhorn—निष्क्रिया

मां जानीहि महेश्वरं स्फुटमिद वक्त्रेप्यभावादिति
प्रेयस्या परिहासतो विहसित शंभोः शुभायास्तु वः ॥ [3]
पशुपतिवदनच्छद्मनि कृतवसतिः पद्मसद्मनि स-

3. दा या ।
जयति विलक्षणरूपा सु (शु) भ्राभा भारती भ्रमरी ॥ [4]
गिरिशशिरसि यच्छन्हस्तमिन्दोः कलायां
मुहुरमलमृणालीग्रासगृध्नुः शिसु (शु) त्वे ।
जयति विधुतमूर्द्धोन्मालली लांबु (बु) जेन
स्मितकुपितमृडानीनाडितो नागवक्त्रः ॥ [5]
निजोपज्ञप्रज्ञाप्रसरपरिविस्फारमुकुरे
पदार्थानां पार्थः प्रतिफलति

4. येषामवितथः ।
गिरां ग्रामो येषामधरमधिशेते स्वयमयं
नमस्तेभ्यः सद्मत्रयस्तिलकितजगद्भ्यः किमपरम् ॥ [6]
करुपादौ किल केवल खमखिलं ध्वांतावनद्धं ध्रुवं
शून्यं वीक्ष्य सिसृक्षतो जगदभूद्भ्रू [द्रा] दमुद्रोनिलः ।
तत्राभूदनलोनलाजलमभूद्भ्राजादमोघाज्जले
ज्वालामालि हिरन्म (राम) य महदभूदंडं विभोर्ब्रं (ब्रं)ह्मणः ॥ [7]
तदडभांडखंडाभ्यां

5. द्यां भुवं विदधे क्रिया ।
ब्र (ब्र) ह्मा ब्र (ब्र)ह्मनिधीन् पुत्रान् मरीच्यां [त्र] मुखान्मुनीन् ॥ [8]
मध्ये तेषां प्रहततमसां मानसानां मुनीनां
श्रीमानत्रिः प्रथितमहिमा नेत्रपात्रे प्रसूनम् ।
यस्य ज्योतिः पटलजटिलं मंडलं वन्द्यमिन्दो-
श्चन्द्रात्रेयः समजनि मुनिस्तस्य पुत्रः पवित्रः ॥ [9]
दूरापास्तसमस्तसंशयविपर्यासप्रकामोज्व (ज्ज्व) ल-
ज्ञानालोकविलो-

6. कितानाखिलजगत्स्वर्गापवर्गस्थितेः ।
सर्व्वज्ञप्रतिमस्य त [स्य] कृतिनः कारुण्यपुण्यात्मनः ।
पारं गंतुमनन्तदीपमहसः को वा महिम्नां क्षमः ॥ [18]
नीरंध्रो निर [घो] निसर्गसरलः सारो [त्त] राभ्यान्तरो
निर्ग्रंथिः पृथुलाग्रभागसुभगः पर्व्वस्वखर्व्वस्थितिः ।
आमलं फलिनोप्यसेवितविषत्क्रूरारिदावाग्निना
न ग्लानिं गमितस्ततः समभवद्वृंक्षोयम-

7. त्यद्भुतः ॥ [11]
आचंद्रं चंद्रात्रेयवंस (श) जाः क्षितिभुजः क्षितिम् ।
भोक्ष्यन्त्यक्षतदोर्दंडचंडिमाभोग्निर्तेजसा ॥ [12]

ये पूर्व्वेत्र पवित्रितक्षितितलाः सद्धर्मस [र्ग] प्रियाः ।
प्राणप्रार्थनयाप्य खिन्नमनसः पर्याप्तसत्यव्रता : ।
निःसिंदूरितदुर्व्विनीतव (ब) लवन्मा (त्मा) मन्तसीमन्तिनी-
सीमान्ताः[1] पृथिवीभुजो विजयिनस्तेभ्योखिलेभ्यो नमः ॥ [13]

8. कालेनेह महावंशे प्रशंशा (सा) प्रांशुरंशुमान् ।
मुक्तामणिरिव श्रीमान्नन्नुकोभून्महीपतिः ॥ [14]
तेन विक्रमधनेन धन्विना क्रामता युधि वधाय विद्विषाम् ।
धुन्वताधनुरधिज्यमर्ज्जुनं स्मारिता दिवि विमानगामिनः ॥ [15]
तस्मादुदारकीर्त्तेरजनि जनानंद सुंदरः श्रीमान् ।
तनयो विनयनिधान वाक्पतिरिव वाक्पतिः क्षितिपः ॥ [16]
विद्यावदा-

9. तहृदयेन हृदि प्रजानामातंकशंकुमकलंकिनविक्रमेण ।
तेनापनीय नयनिर्म्मललोचनेन श (कोचिना. पृथुककुम्थ (स्थ)-
कथार्थकथाः ॥ [17]
तस्य क्षमातिलकस्य लोकतिलकः पृथ्वीपतेर्भूपतिः
स श्रीमान्विजयो जयाय जगतां जज्ञे कृतज्ञ. सुतः ।
यस्योदात्तमतेः प्रसूतिसमये धात्रा

10. महिम्नां निधेः
सानंदं सुरसुन्दरीभिरवनौ क्षिप्ताः सलाजाः श्र (स्र) जः ॥ [18]
किन्नरीभिरधिकंधरं सखीराकलय्य भुजयास्य भूभुजः ।
काकलीकलमगीयत स्फुरत्प्रोथमुत्पुलकमुज्ज्व (ज्ज्व) ल यशः ॥ [19]
विनयनतसुमित्रापत्यसंवाहिनाद्विः
प्रवरहरिचमूभिः क्रान्तपर्यन्तभूमिः ।
सुहृदुपकृति-

11. दक्षो दक्षिणाशां जिगीषुः
पुनरधित पयोधेर्व (र्व) न्धवैधुर्यमर्थः ॥ [20]
तस्मान्नृपतिमुद्रादुदपादि नरेंद्रचंद्रमाः सूनुः ।
श्रीराहिलनामा विहततमा[2] वदिता [न्यु] दयः ॥ [21]
प्रसन्ने तत्र भूपाले प्रसरचित्रभानवः ।
ना [थ] वन्तोर्थिनां वा [मा] : सरोषे द्विषदालयाः [22]
कोशपानमसिधा (वा) रयोधि-

12. तां नाभिभूतजनरत्नसंपदां ।
पक्षपातभिषुदुष्टभूभृतः प्रापुरस्य न सुहृत्सभासदः ॥ [23]
तस्मात्तीव्रप्रतापज्वलनकवलितोत्तालभूपालतूला-

---

1. Kielhorn—सीमन्ताः

2. The original had विहिततमा but altered to विहततमा.

[न्मू] लाच्छीलद्रुमाणामनणुगुणगणालंकृतेः कीर्त्तिभर्त्तुः ।
श्रीहर्षोरिहर्षज्वरहरणमणिः क्षीणनि शेषदोषः
सन्तोषाय प्रजानामज-

13. नि निजभुजाश्रान्तविभ्रान्तकीर्त्तिः ॥ [24]
य इष्ट्वैव कृपाणपाणिमकृत व्यापार भा [रं] युधि
क्रोधाक्रान्तविलोचनौ (नो) स्पलदलभ्रूभंगभीमाननम् ।
उत्साहो हृदयाद्धनुः करतला [द्भा] वो मुखात्कीर्त्तयो
दिग्भ्यः साध्वसवेपमानवपुषां नष्टाः परेषां क्रमात् ॥ [25]
तेनाच्युतेन भीमेन व (ब) लेन कृतवर्म्म-

14. णा ।
समुद्रपरिखा पृथ्वी पुरी सू (शू) रेण रक्षिता ॥ [26]
अपक्षधात्रीधररक्षणक्षमः सदैव दोषाकर संगभंगुर' ।
वहिःकृ[1]तक्रूरभुजंगसंगमस्तिरस्करोति स्म स तूर्णमर्णवम् ॥ [27]
दूरा [पा] स्तप्रवरनरगैर्दूरमुत्क्षातपत्रै-
र्दूरायातैः सपदि शिरसा [शा] सनं धारयद्भिः ।
तस्य द्वारि द्विरदमदनि:[2]स्येदपंकां-

15. किनायां
सेधा (वा) हेतोः प्रणतिरपमैराशि (मि) त भूमिपालैः ॥ [28]
वृतोऽत्र (उच्च) ला गुणाधारा महार्घा हृदयंगमा ।
हारावलीव तस्यासीत्कंछुकेति प्रियोत्तमा । (॥) [29]
वर्ण [:] स्वर्णरुचिर्विलोचनयुगं नीलं सचंद्रोपलं[3]
पाणिः शो [ण] मणिद्युतिः सचरणो दन्तच्छदो विद्रुमः ।
सद्यः सु (शु) क्ति विमुक्तमौक्तिकतल-

16. स्वच्छ [न्च (च्च) चे] तो यतः
स्त्रीरत्नं भुवनैकभूषणमभूत्तेनेयमेका सती ॥ [30]
तस्यास्तस्य स्मरणविहिताघौघविध्वंसनाया :
सत्तीर्थायाखिदशसरितः शान्तनोः पुण्यकीर्त्तेः ।
धर्म्माधारः पितरि सुतरां साधुरिद्धप्रभावो
भीष्मो प (य) द्वरसमजनि सुतः श्रीयशोवर्म्मदेवः ॥ [31]
तस्य विप्रचरणप्रणामजं

17. शैशवे शिरसिजश्रितं रजः ।
अप्यकालपलिताकृतिं दधत्संदधावधिककामनीयकं ॥ [32]
एकस्मै याचमानाय द्विजाय पलदः शिविः ।
यावदर्थिजनं प्रादात्कोटिं कोटिमसौ नृपः ॥ [33]
नंतु भूमिलितालिकेन सदसि व्यस्तासवे (ने) नासितुं

---

1. Kielhorn. बहिष्कृत. 2. Ibid. निस्यन्द. 3. Ibid. स चन्द्रोत्पलं.

गंतुं पत्रपुरःसरेण चरणैः स्थातुं च नीचैश्चि-

18. रम् ।
वक्तु जीव जयादिशेति नियमं कर्त्तुं विनीतात्मना
तस्मिन्नाजति (नि) राजकेन जयिनि त्रासादिदं सि (शि) क्षितं ॥ [34]
निःपो (त्यो) दितेंदुभुजगाधिपधाम नित्य-
मानंदि कुवलयकुसुमं गगनांगणं च ।
तेनाङ्कृतं द्वयमिदं यशशा (सा) व्यधायि
धा [त्री] तलं शि (सि) तसुधाधवलत्वचित्रम् ॥ [35]
संभवति

19. भुवि मनुष्यः सप्ताकूपारपारहश्चापि ।
न पुनरिह तस्य नृपतेर्गुणसागरपारगः कश्चित् ॥ [36]
गांधारीं भजता प्रहृष्टशकुनिस्वानप्रियां प्रेयसीं
भीष्मद्रोणवचांस्यकर्णसुख[1]दान्याकर्ण्य संमूर्च्छता ।
[नो] धर्म्मप्रभवं विरोधिनवता प्राप्यापि वंशक्षयं
[सं] प्राप्ता धृतराष्ट्रता [सु] सुह-

20. दा विद्वेषिणेत्यद्भुतम ॥ [37]
कष्टाष्टषष्टिसहस्रसूनु[2]भिरसूनुरसृज्य खातः कृत-
स्तत्पौत्रप्रमुखैः पुनस्त्रिभिरसावभोभिरापूरितः ।
वृत्तान्त सगरस्य सागरविधावाकर्ण्य तूर्णं सुधीः
स्पर्द्धावानधिकं व्यधत्त जलधेर्वैं (र्बै) एवं तडागार्णवम् ॥ [38]
रस्येदं सा (शा) रदेन्दुद्युति [ख][3] रसि (शि) खरच्छन्न (ण्ण)नक्ष [त्र]-
चक्रा-
क्ष [क्रं रक्ष] क्षमु-

21. स्मादपथ (न) यति रथं सारथिः सप्तसप्तेः ।
यत्कुंभः सा (शा) तकुम्भस्तुहिनगिरिसि (शि) रश्चुम्बि (म्ब) वि (बि)-
म्बा (म्बा) वर्कतक्कं
कुर्व्वन्नास्ते समस्तस्तुतमसुरारिपोर्व्वैश्म (श्म) वैकुण्ठमूर्त्तेः ॥ [38]
महावंस (श) समुत्पन्ना [धारि] तावनी ।
नर्म्मदेवाभवद्देवी पुष्पा तस्य महीपतेः ॥ [4 ·]
सदानसूया विहिनागमेष्यमा-
वरुधती-

22. जीवितमप्युपासिता ।
व (ब) भौ मदान्धानन्दमयन्त्यनिन्दिता

---

1. The original had सुखादा, but altered to सुखदा.
2. Originally सूनि, altered to सूनु.
3. The original had खु, but altered to ख.

मदालसाभूत्स पुनः कथंचन ॥ [41]
सा देवी नरदेवाहेवाधिपतेः स (श) चीव सच्चरित्रं (तं)।
तस्मादसूत पूतं जयंतमिव [घं] गमंगभुवम् ॥ [42]
यशोदानन्द [भावच] क्रे पूतनामा रणक्रियां
जातो वृष्णिकुले कंस रिपोः[1] च्छेत्ता नरोत्तमः ॥ [43]
तस्या [स्स–

23. मुत्थि] न क्रोधान्नृसिंहात्सखलाद्विनः।
हिरण्यकशिपुप्राणत्राणां चक्रे न केनचित् ॥ [44]
देवालोकय कोशलेश्वरमितस्तूष्णीं समाकर्ण्यतां–
मादेशः क्रथनाथ सिंहलपते नत्वा व (ब) हिः स्थीयताम्।
त्वं वि [ज्ञा] पय कुन्तलेन्द्र वदने दत्वोत्तरीयांचलम्[2]।
तस्यास्थानगतस्य

24. वेत्रिभिरिति व्यक्तं समुक्तं वचः ॥ [45]
का त्वं कांचीनृपतिवनिता का त्वमध्वाधिपत्नी
का त्वं राढापरिवृढवधूः का त्वमंगेंद्रपत्नी [।]
इत्थालापा' ममरजयिनोयस्य वैरिप्रियाणां
कारागारे सजलनयनेन्दीवराणां व (ब) भूवुः ॥ [46]
का त्वं कस्य किमर्थमत्र भवती प्राप्ता शशांकोज्व (ज्ज्व) ला
मिद्धाः

25. कीर्त्तिरहं वु (बु) धैकसुहृदः श्रीधंगपृथ्वीपतेः।
भ्रांत्वा विस्त्र (श्व) मशेषमागतवती स्फारीभवत्कौतुका
लोकालोकमहामहीध्रसि (शि) खरश्रेणिश्रियं वीक्षितुं ॥ [47]
मरकतमयं तुंगं लिंगं यदर्च्चितमैश्वरं
त्रिदशपतिना तस्माल्लब्धं (ब्धं) प्रमाद्य किरीटिना।
तदवनितलं तेनानीतं युधिष्ठिरपूजितं
जयनि

26 जगति श्रीधंगेन प्रणम्य निवेवि (शि) तं ॥ [48]
वेश्म (श्म) न्यस्म (श्म) मयस्तेन भूपालेन प्रतिष्ठितः।
द्वितीयो द्योतते देवः क्लेशपास (श) हरो हरः ॥ [49]
तेनाय म (श) रदभ्रसु (शु) भ्रभि (शि) खरः श्रीधंगपृथ्वीभुजा
प्राप्ता (प्सा) दक्षिदशप्रभोर्भगवतः सं (शं) भोः समुत्तंभितः।
यस्याभ्रंकषकालधौतकलमप्रान्तस्खलत्स्पं (स्यं) दनो
मेरोः सृं (शृं)–

27. गमतुंगमेव मनुते चिन्त्रीयमाणोरुणः ॥ [50]
भक्त्या भवस्य नूनं शिल्पिस (श) रीरेषु कृतसमावेशः।

---

1. Kielhorn रिपोश्छेत्ता. 2. Kielhorn.—चलं.

स्वयमेव विश्वकर्म्मा तोरणरचनामिमां चक्रे ॥ [51]
जयति विकटो [व] टोय हाटककोटीरनेन तुलयित्वा ।
अतुलेन तुलापुरुषाः स (श) तसो (शो) विश्राणितास्तेन ॥ [52]
षट्कर्म्मा [भि] रता[1] रताः परहिते संसु (शु)द्धवंस (श) द्वया-

28. प्रारब्धा (ब्धा) ध्वरधूमधूम्रवपुषोप्येकान्ततो निर्म्मलाः ।
तेनैते धनधान्यधेनुवसुधादानेन संमानिताः
सौधेषु स्फटिकाद्रिकूटविकटेष्वारोपिता वा (श्रा) ह्मणाः ॥ [53]
ग्र (ग्र) ह्मसु व्र (ग्र) ह्मकल्पेषु येष्वेकत्र निवासिषु ।
दक्षिणेन तुषाराद्रि कल्पग्रामोपरोभवत् ॥ [54]
रक्षित्वा क्षितिमंबु (बु) राशि (शि) रस (श) नामेतामनन्यायतिं

29 जीवित्वा स (श) रदां स (श) तं समधिकं श्रीधंगपृथ्वीपतिः ।
रुद्रं मुद्रितलोचनः स हृदये ध्यायन्ज (ज्ज) पन् जाह्नवी[2]-
कालिन्द्योः सलिले कलेवरपरित्यागादगान्निर्वृतिं ॥ [55]
धर्म्माधिकारमनुमा (शा) सति सा (शा) स्वतोत्र-
मित्रे सतां स्फुरितधामनि धर्म्मवु (बु) [द्धौ] ।
श्रीमद्यशोधरपुरोधसि वेधसीव
सिद्धिं जगाम जगतीपतिकीर्त्तिरेषा ॥ [56]
तार्क्षारिकः प्र-

30. वरसावरवंम (श) जन्मा
श्रीनंदनः कविरभूत्कविचक्रवर्त्ती ।
तस्यात्मजः समजनि श्रुतपारदृश्वा
श्रीमांस्तपोधिकव (ब) लोव (ब)लभद्रनामा ॥ [57]
सूनुः सूनृतगीगिरींद्रमहिमा भ [द्रस्य] तस्याभव-
द्भूपालैर्भुवि पूजितांघ्रिरनघः साहित्यरत्नाकरः ।
श्रीरामो रमणीयशू (सू) क्तिरचनाचातुर्यधुर्यः कृती
तेनेयं विहिता प्रशस्तिर [चना]

31. भ [द्रया] लये शलिनः [58]
न संकीर्ण्णा वर्ण्णाः क्वचिदिह न सापत्न्यकलुषाः
स्थिताः कायस्थेन प्रथितकुलशीलोज्व (ज्ज्व) लधिया ।
यशःपालेनायं विदितपदविद्येन लिखितः प्रशस्ते
विन्याश (स) : कृतयुगसमाचारश (स) दृशः ॥ [59]
विज्ञानविश्वकर्त्ता धर्म्माधारेण सूत्रधारेण ।
च्छि (छ) च्छा [भि] धेन विदधे प्राशा (सा) दः[3] प्रमथनाथस्य ॥ [60]
यावत्पृथ्वी स-

---

1. The Original had रताः रताः
2. Kielhorn, पञ्जाह्नवी
3. The original had प्रशादः.

32. पृथ्वीधरनगरनगा दत्तमुद्रा समुद्रै-
र्यावद्ब्राह्मिष्णुरुष्णद्युतिरयममृतस्यंदनः शीतरश्मि (श्मि) : ।
यावद्व्रह्म (द्व्र) ह्मांडभांडस्थितिरियमथवा स्थास्नुतां स्थाणवीयः
प्राशा (सा) दस्तावदेष व्रजतु नरपतेर्हस्तकैलासहासः ॥ [61]
लिपि [ज्ञा] नवि [धि] ज्ञेन प्राज्ञेन गुणसा (शा) लिना ।
सिंहेनेय समुत्कीर्णा सद्वर्णा रूपसा (शा) लि [नी] ॥ [62]
संवत (त्) १०५९ श्रीखर्ज्जू-

33. र वा [ह] के राजश्री [धं] गदेवराज्ये देवश्रीमरकतेश्वरस्य
प्रस (श) स्तिः सिद्धा ॥
उत्खातोच्चमहीभृतो मसृणिता मत्तद्विपतां[1] पदै-
र्द्दीर्ताः संगरसंगभं [गु] ररिपुत्रस्यप्रियाश्रूत्करैः ।
दिग्भित्तीर्ज्जयवर्म्मदेवनृपतिः कीर्त्यक्षरैर्योलिख-
त्तेनालेखि पुनः प्रशस्तिरमलैरेषाक्षरैः क्षमाभुजा ॥ [63]
विद्वद्भिर्ज्जयपालसी (शी)-

34. तकिरणोमून्यादराद्वंदितो
गौडः प्रोल्लिखदक्षराणि कुमदाकाराणि सर्प्पत्करः ।
कायस्थो जयवर्म्मदेवनृपतेरीशस्य वि (वि) [श्र] श्रुतः
साहित्यांवु (बु) धिवं (वं) धुरुद्धततमो रुन्धन्निनिंद्यद्युतिः ॥ [64]
संवत् ११७३ वैसा (शा) ख शुद्धि ३ शुक्रे ॥

50. VARANASI COPPER PLATE INSCRIPTION OF KARṆADEVA.

Prov. : Old fort, Varanasi, U. P.
Date. : Chedi Era. 793. = 1042-43 A. D.
Lang. : Sanskrit. **Script.** : Nāgarī of about 11th century. A. D.
Ref. :Kielhorn, *Ep. Ind.* Vol. II, pp. 297-310.

Text

First Plate

1. ओं [॥] ओं नमः सि (शि) वाय ॥
निगुणं व्यापकं नित्यं सि (शि) वं परमकारण (णम्) ।
भावग्राह्यं परं ज्योतिस्तस्मै सद्व्र (द्व्र) ह्मणे नमः ॥ [।]

1. Dr. Kielhorn.—द्विपाना.

यद्वेध[1]स्थितमस्य [य] प-

2. रमपि जो (ज्यो) तिस्चि (श्चि) दं सु-
(शु) प्रभम् ।
सूर्य्यास्यस्य च [भा] स्वरप्रभृतयो यस्य स्फुरंत्यूर्म्मयः [।]
सर्व्वज्ञान [म] यो व (ब) भूव भगवांस्तस्मान्मनुर्म्मानसा
यस्मात्सृष्टिरभूद [य] [गु]-

3. णवती स्त्रीपुंस्रमिता ततः । (॥) [2]
देवः श्रीकार्त्तवीर्यः क्षितिपतिरभवद्भूषण (ण) भूतधात्र्या
हेलोत्क्षिप्ताद्रिवि (बि) भ्यत्तुहिनगिरिसुतास्ले (श्ले) षसन्तोषि-
तेस (श) म् [।]
दोर्द्दण्डा-

4. काण्डसेतुप्रतिगमितमहापूररेवाप्रवाह-
व्याधौतस्य (स्य) क्षपूजागुरुजनितरुषं रावणं यो ववन्ध[2] । (॥) [3]
यस्य भ्रूभ्र (भ) [ङ्ग] भीता ददति नृपतयः[3] क्षि [ष्ट]

5 मावे प्रतिपं
आ के (कै) लास (सा) त्सहेलं हरवृषभसमुत्खातसृं (शृ) गाग्रभिन्नैः ।
आ चः[4] प्राचः समुद्रात्सुरसरिदतुलस्थूलमुक्तावलीका-
दाम्भोधेर्हृणाच्च [स्फु]-

6. रदतुलमणेः सेतुसीमन्तभाजः । (॥) [4]
तद्वन्सप्रभवा[5] नरेंद्रपतयः ख्याता [:] क्षितौ हैहया-
स्तेषामन्वय (न्व) यभूषण (ण) रिपुमनोविन्यस्ततापानलः ।
धर्म्मध्यानध-

7. नानू (नु) सधितमुखः सस्वास्स[6] [तां] सौच्च (च्य) क्र
स्प्रेयास (न्स) र्व्वगुणाङ्कितप्रभुतया श्रीमानभूत्[7] कोक्कलः । (॥) [5]
सम्यक्सा (क्शास्त्रविचारणा प्रतिदि [न] धर्म्माय योगाय च
इष्टा-

8. पूर्त्तपरोपकारकृतये यस्यार्थ सक्तो (क्ता) मतिः ॥ (।)
आनृन्या (ण्या) धिगमाय दाननिरतिः सद्वृत्त (श) पुष्टेस्तथा
ज्ञाना (न्यु) च्चासवसान्म[8]मुक्षुपदवीमंते च यः प्राप्तवान् । (॥) [6]
भोजे व-

---

1. Kielhorn यद्वेधास्थितः
2. Ibid ववन्ध Cf. (*Ep. Ind* Vol. I p. 263. Verse 9,).
3. Ibid. दधति नृपतयः क्लिष्टभावे प्रतिष्ठान्
4. Kielhorn, च 5. Ibid. तद्वंश— 6. Ibid. शश्वत्सतां
7. Ibid. श्रीमानभूत् को— 8. Ibid. वंशान्मुमुक्षुपदवी—

9. [क्षभ] राजे श्रीहर्षे (र्षे) चित्रकूटभु (भू) पाले ।
स (श) क्करगणे च रा [ज] नि यस्यासीदभयदः पाणिः । (॥) [7]
सच्चिमिवेन्द्र[1] [:] कमलामुपेन्द्रो नगेन्द्रकन्यामिव चन्द्रमौलिः ।
चन्देल्लवंसप्रभवा[2]

10 सुसिला नट्टाख्यदेवी म तु[3] पर्ज्जनैषित् ॥ [8]
उद्दामदर्प्पद्विषतो जयन्तं क (कं) दर्प्पमापि (पी) न घनस्तनीनाम्
, अजीजनत्स स्थितये जनस्य तस्यां महास (श) क्थि [रं] कु-

11. मारम् । (॥) [9]
नाम्ना प्रसिद्धो भुव (व) नत्रयेपि
प्रसिद्धपूर्व्वो (र्व्वो) धवलः स राजा ।
वोढु (ढं) धुरं यो गुरुहारहा यो
ऽन्यानृपेन्द्रान्क [हा] र चकार ॥ [10]
एकैक (कं) ददता भुजङ्गमनि-

12. सं (षं) स्त्र (स्वं) जीवित (तं) रक्षता
भक्ष्यार्थं (र्थं) गरुडाय नागपतिना न्यक्कार उन्मीलितः ।
चारित्राय ददो (दौ) जलं सुरपतिर्व्वज्छत्र [ह] त्यामृतौ
वन्द्यासा (या) भुवनत्रयेप्ययमभू [दौ]-

13. चित्त (त्य) वृत्तेः पदं ॥ [॥]
किञ्चापरेण[4] ।
होहिन्ति एत्थ व (वं) से पुरिसा एहइयगारवमहग्घा [।]
इअ हाविउण जेणं पालीण[5] परिग (ग) हो गहिओ ॥ [12]
तस्सु (स्सू) नुः ख्यात-

14. कर्म्मादिगिभकरनिभाजानु (बा) हुर्महात्मा
भूमेभ (र्भ)र्त्ता व (ब) भूव चतरिपुनृपतिर्व्वा (र्व्वा) लहर्षः सु [ज] जन्मा ।
यं सद्वृत्तानुरागानुकृतकृतय (यु) गाचारमासू (श्रि) त्य जात-
स्य-

15. क्तान्योन्योपमर्द स्थिरवसतिरपास्तारिवर्ग्गत्रि (स्ति) वर्ग्गः । (॥) [13]
धन्योत्र दास (श) रथिरेव रिपुर्दसा (शा) स्यो
यस्याभवत्किमपर समरोत्सवाय ।
भृभङ्ग [भ] प्रसकद्विषतो-

16. धिगस्मा-

---

1. Kielhorn शचीमिवेन्द्र
2. Ibid. वंशप्रभवाः सुशीलां
3. Ibid. देवीं स तु पर्य्यणैषीत्
4. Ibid. किं वा परेण
5. पाली is a synonym of दिश् (see. Ep. Ind. Vol. II P. 306 n. 87).

नात्मानमाहवरसादिति यः सुशोच[1] ॥ [14]
सत्यव्रतैकनिरतस्य युधिष्ठिरस्य
तस्यानुय (ज) : प्रथितवा (वा) हुव (ब) लो व (ब) भूव ।
दुर्योधनारिव (ब) लवि (वी) रवधे (धै) कध-

17. न्वी
पार्थोपरः कलियुगे युवराजदेवः (॥) [15]
भु (भू) भारक्षमदक्ष (क्ष्यु) तिप्र [ण] यिनीमालम्ब (म्ब) मान-
स्तनं (नुं)
कुर्व्वाणः समरेपि नाग (क) पथगानागच्छतो विद्वि [ष] : ॥ (।)
विख्या-

18. तां भुवि भूरिमार्ग्गगमनामुच्चैर्धद्वाहिनीं
यः साक्षात्परमेस्व (श्व) र [:] समभवत्सम्यक्किम (किंश)
वाराधनात् ॥ [16]
तस्मादभूल्लक्ष्मणराजदेवः
पुण्यौ (ण्यै) र्जनाना (नां)

19. जनितव्यवस्थः ।
आ (अ) वाप्य यं धर्म्ममिव क्षितीसं (शं)
चिराय लेभे जनता सुखानि ॥ [17]
यः सत्यस्य निधिः स्त्रि (श्रि) यां च सरणिः साम्ना च धाम्ना [च] यो
यो दाता च दयालु-

20. रेव च पदं कीर्त्तेश्च (श्च) नीतेश्च (श्च) यः ।
तस्यासीत्परमेष दूषणकण [:] कारुन्य (ण्य) पुण्यात्मनः
पात्रापात्रविवेचनं न यदभूत्सर्व्वस्वदानेष्वपि ॥ [18]
श्रीस (श) ङ्कर गणदेव-

21. स्ततोभवत्सकलभुवनतलतिलकः ।
सा (शा) सति वसुधां यस्मिन्पलायित (तं) क्वापि कलिनापि ॥ [19]
असौनिस्त्रिंसता[2] यत्र वक्त्रत्वं पलिनागमे [।]
रथचक्रे (घु) चारि-

22. त्वं वायो [यौ] स्वच्छन्दचारिता [॥] [20]
तस्यानुयो (जो) भु (भू) युवराजदेवः
पतिः क्षितेः क्ष [त्र] कुलप्रसु (सू) तिः ।
यस्यासिधाराजलधौत मु (मू) र्त्ते-
स्त्रि (श्रि) रं स्थिरासि (सी) च (ब) पलापि लक्ष्मि[3] [॥] [21]
अर्यि-

---

1. Kielhorn शुशोच 2. Kielhorn निस्त्रिंशता 3. Ibid. लक्ष्मी

23. मा [र्था] वधिस्त्यागः सेसं सूरतयावधिः ।[1]
यस (श) मा (सां) धर्म्मरासे (शे) स्व (श्र) नावधिर्यस्य भूपतेः (॥)[23]
श्रीसास्वनोयायत[2] यातकीर्तुः
कोकल्लदेवो वस्वधिकनाथः ।
ज (य) न्मण्ड–

24. लाग्रो रिपुमण्डलानि
पुरो दधातीति यथार्थस (श) ब्द (ब्द) : (॥) [23]
नम्र कार्मुकवत् कृत नियमितं तूणीरवत्पृष्ठतः ।
काष्ठासु क्षणमात्र [श] स्रविहितः [भ्रा] न्तरादादण्डवत् [।]

25. कृत्वा सा [ध्र] परिच्छदेन रहित सम्यक्क [रे] स्थापित–
शत्रूणामखिल कुल नरपति [श्रिश्रेष्ठ] येनासिवत्[3] (॥) [24]
कल्लनृपादवास्तसकल [क्षो] णी [प] पदं–
स्था–[4]

26. रक्षालितहारगा (गौ) रगुणभूर्गागव[5]देवाभूत् ।
यस्याजायत केवलं रणमुखे कौक्ये (क्षे) यकोग्रेसरः ।
स्तत्रैव[6] प्रतिविवि [थ] पुरभूदालाव [रं] म [न्मुख] [॥] [25]

27. अगुनेज्ञोजलोलेति ख्यात यदिह दुर्ज्जसः[7] ।
लक्ष्म्या तदधुना धौ [त] दिव्यमादाय तद्वपुः ॥ [26]
ख्यात [:] सत्यतया स धर्मतनयः[8] त्यागेन वि (वे) रोच–

28 निः
सोयेनेद्रसुर न चैतदसवस्स [त्य] गता [चे] तसि[9] ।
एकस्मिन्क्षितयं कलो समनिक[10] गांगेयदेवे नृपे
[इ] स्ता रिक्त्वित[11] [मि] व तेर–

---

1. Ibid. शौर्यं शूरजयावधिः

2. Ibid. श्रीमांस्तनोजायत जातकीर्तेः कोकल्लदेवो वसुधैकनाथः; (अगुणज्ञेति) Mir.

3. Restored stanza—

"नम्रं कार्मुकवत्कृत नियमित तूणीरवत्पृष्ठतः
काष्ठासु क्षणमात्र दृष्टविहितभ्रान्तं च दोर्दण्डवत् ।
कृत्वा साधुपरिच्छदेव रहितं सम्यक्करे स्थापित
शत्रूणामखिल कुलं नरपतिश्रेष्ठेन येनासिवत् ॥

4. Restoration by Mir.

"श्री कोकल्लनृपादवाप्तसकलक्षोणीपदः [श्रीयुतः] ।
The last three letters restored conjecturally.

5. Kielhorn.—गांगेयदेवो भवत् 6. Ibid. सरस्तत्रैव प्रतिविम्बितं पुनरभूद—

7. Ibid. अम्बुधितीय लोलेति ख्यातं यदिह दुर्यशः 8. Ibid. तनयस्त्यागेन

9. Ibid. शौर्य्येणेन्द्र सुतो न चैतदभवत्साय मत श्रोतृभिः 10. Ibid. कलौ समधिकं

11. Ibid दृष्ट्वा निश्चितमेव तैरवितथं पूर्वे यथोक्ता नृपाः

Second Plate

29. वितथं पूर्व्वे[1] ये(य)थोक्ता भू(नृ)पाः ॥ [27]
तस्यात्मजः कर्ण्ण इवावतीर्ण्णः
कर्ण्णः पृथिव्या (व्यां) प्रथे (थि) तपृ (प्र) भावः ।
यस्याभिसे (षे) कस्त्र (श्र) वणा (दृद्वि) ष-

30. द्भिर्नष्टं प्रहृष्ट द्विजमित्रवर्गैः ॥ [28]
यत्कीर्त्तिलतया दूरं प्रसरन्त्या दिने दिने ॥ (।)
ब्र (ब्र) ह्माण्डमण्डपाभोगः स्वल्पतामुपनीयते ॥ [29]
स्वय समु-

31 स्सृजन्नर्थानर्थिसार्थेष्वचिन्तितान् ।
कोपे (प्ये) ष भूषण (णं) भूमेर्जङ्गमः कल्प (त्प) पादपः ॥ [30]
स (श) क्तित्रमै (यै) कने (नि) लयस्य गुणाकरस्य
धर्म्मात्मनः

32. स्तुतिपद किमिहास्ति कि (किं) चित् ।
आसा (शा) स्यते परमिद कृतिभिः सदे (दै) व
राजन्वती वसुमती भवते (तै) व भूयात ॥ [31]
तवे (दे) वं गुणगणालंकृत-

33. स (श) रीरः [स्वप्रा] या गसमावासितश्रीमद्विजयक[टा][2]रपरमभट्टारक-
महाराजाजिराज परमेस्व (श्व) रश्रीवाम [दे] वपादानुध्यान (त)
परमभट्टा-

34. रकमहाराजाधिराजपरमेस्व (श्व) र परममाहेस्व (श्व)·
रतृ (त्रि) कलिंग्या (गा) धिपतिश्रीमत्कर्ण्णदेव [:] कुस (श)·
ली महादेवी महाराजपु [त्रा] महामं-

35. त्रि [णो] महामात्यामहासन्धिविग्रहिका महाधर्म्माधिकरणिका
महाक्षपटलिका महाकरणिका स (म) हाप्रतीहारो महासमतो (न्तो)

36 महाप्रमातारो महास्व (श्व) साधनिको महा [भा] ण्डागारिको
महाध्यक्ष एतानन्यांश्च (श्च) कीर्त्तिताकीर्त्तिता(तां)स्त्व[3]यथार्ह मानयति
वो (बो) धयति समाज्ञापयति विदित-

37. म [स्तु] भवता (तां) यथा [हपाथा] कासि [भूम्य] न्त
[र्ग] त [सु] सिग्रामः सात्र (त्र) मधूकः सगर्त्तस्थलजलोषरः सर्व्वा-
करख [नि] प्रभृतिसमुप-

38. त्तिसमेतश्च (श्च) तुराघ (घा) टसीमापर्यन्तः[4] । वेसालग्राम-
विनिर्ग्गताय कोसिकगोत्राय[5] । ओदलदे[6]वरात्रविस्वामित्रत्रि-

---

1. Read. पूर्व्वे. 2. Kielhorn. कटकात्परम्
3. Ibid. कीर्तितांश्च 4. The sign of a punctuation is superfluos.
5. Kielhorn. कौशिक- 6. Ibid. औदल देव तर्व्वइवामित्रत्रि-

39. प्रवराय वाजसनेयसा (शा) खाय। महप्रन(ण)त्रे वा [म] ननप्त्रे नारायणपुत्राय पण्डितश्रीविस्व (श्व) रूपाय। इहैव पितुः श्री–

40. मद्गाङ्गेय देवस्यसंवत्सरे[1]स्राद्धे फाल्गुनव (ब) हुलपक्ष द्वितीयायां स (श) नैस्च (श्च) रवासरे वेण्यां स्नात्वा भगवंनं (वन्तं) देवं (व) देवं[2] त्रिलोचन–

41. मस (श) नश (सं) भारप्रकल्पितपंचोपच (चा) र [प्र] पंचेन परया भक्त्या समभ्यच्चर्य्यासमस्त (श्र) द्धू (द्ध) या स्रा (श्रा) द्धं विधायोभयभोगेन सा (शा) स [न] स्वेन[3] संप्रदत्तः। अतः श्रीमत्क–

42. र्ण्णदेवपादा [:] सुसीग्रामनिवासिनः समस्तजनपदान्समादिस (शं) ति विदितमस्तु भवता (तां) यथा ग्रामोयं[4] स्माभिः सा (शा) सनस्वेन प्रदत्त इति मत्वा

43. भाग-भोग-कर–हिरण्य-दण्डादायका[5]स्योत्पत्तिप्रभृतिसमस्तराजप्र-त्यादाय (या) अस्योपन (ने) ष्या[6] इति [त] तदपत्तिकीर्षया मध्ये वातेन [।] पि न

44 गन्तव्यमिति ॥ अभ्यर्थना ॥
सर्व्वानेताभा (न्भा) विना राजपुत्रा
भू (न्भू) यो भूयो याचिते रामभद्रः।
सामान्योय (यं) धर्म्मसेतुनृ (नृ) पाणा (णां)
काले का–

45. ले पालनीयो भवद्भिः (॥) [32]
व (ब) हुभिव (र्वं) सुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्। (॥) [33]
अस्मिन्वन्से[7] द्वि [ष्मा]–

46. पि यस्वा (श्रा) न्यो नृपतिर्भवेत्।
तस्यापि हस्तलग्नोहं सा (शा) सनं न व्यक्रमेत् ॥ [34]
यानीह दत्तानि पुरा नरेन्द्रै–
र्दानानि धर्म्मार्थयस (श) स्कराणि।

47 नृमा[8]ल्यवान्नप्रतिमानि तानि
को न (ना) साधुः पुनराददीत ॥ [35]
अस्व (श्व)मेव (ध) सहस्रेण राजसु (सू) य सहतेन[9] च [।]
गवां का (को) टिप्रदानेन भूमिह–

---

1. Ibid. सवत्सरश्राद्धे– 2. Ibid. देवदेव
3. Ibid. शासनत्वेन सप्रदत्तः 4. Ibid यमस्माभिः
5. Ibid दाया करोत्पत्ति 6. Ibid नेतव्या–
7. Kielhorn. अस्मिन्वंशे द्वितीयो (?) द्विजोपि—Mir.
8. Ibid. निर्मास्य– 9. Ibid शतेन

48. र्त्ता न सु (शु) ष्यति । (॥) [36]
सुवर्णमेक (कं) गामे [कां] भूमेरप्येकमङ्गुल (लं)।
हरन्न [रक] माप्नोति यावदाहुतसप्लवं[1] ॥ [37]
संवत् ७९३ फाल्गुनवदि ९ सोमे [॥]

51. GOHARWA PLATE OF KARṆADEVA.

Prov. : Goharava Manjhanpuı Tahsil. Allahabad, U. P.
Date. : V. S. 1047.
Lang. : Sanskrit. **Script.** : Nāgarı.
Ref. : E. Hultzsche, *Ep. Ind.*, Vol. XI, pp. 139.

Text

First Plate, Second Side.

1. ओं[2] स्वस्ति ॥ ओं ब्रह्माणे[3] नमः ॥
निर्गुणं व्यापकं नित्यं शिवं पर [म] कारणं।
[भ] वग्राह्यं परं यो[4]तिस्तस्मै सद्ब्रह्माणे[5] नमः ॥ [1]
शुद्धे हृदयक्षेत्रे वल्लीमिव रोपयन्ति
2. यां सुनयः ॥
मोक्षमहाफलजननी ब्राह्मी[6] सू [क्त] मपि सा जयति ॥ [2]
क्षीरोदधेरपरिमेयसुधानिधानमाविर्बभूव[7] भवभूषणमिन्दुरेषः ।
3. अस्मादजायत बुधः[8] स किल क्षितीशमाद्य[9] पुरुरवसमाप तनूजरत्नं ॥[3]
इति महति सुधामयू[10]षवंशे नृपतिरजायत मौक्तिकायमानः ॥
4. अलभत भरतस्स चक्रवर्त्ती तृ[11]भुवनभूषणभूथमेकमेव ॥ [4]
अत्रेदि[12]तोदितकुले जगतीपतीना-
मीशः क्रमादजनि हैहयचक्रवर्त्ती [।]
य-
5. स्य प्रचण्डभुजपंजरमध्यवर्त्ती
काराग्रहे[13] धृत इव प्रसभं दशास्यः ॥ [5]
वैरिध्वान्तभिदः सहस्रकरता[14] भूपालचूडामणे-
र्यस्मादद्भुतवाहुव[15]-

---

1. Kielhorn हूतसंप्लवम 2. Expressed by a symbol. 3. Hultzsch ब्रह्मणे
4. Ibid. ज्योति- 5. Idid. सद्ब्रह्मणे 6. Ibid. ब्राह्मी
7. Ibid. र्बभूव 8. Ibid. बुधः 9. -माद्यं
10. Ibid. मयूख- 11. Ibid. त्रिभुवन- 12. Ibid. अत्रोदितो-
13. Ibid. -गृहे 14. Ibid. -करतो 15. Ibid -बाहुबन्ध

6. न्धविधुरो नक्कंधरग्रामणी[1]
हिलोल्लासितवाहुदण्डविहित (:) श्रीकंठशैलोद्धतिः
प्राग्विक्रान्तम[2]मून्यत स्वयमपि स्वमिन्द्रजालोपमं ॥ [6]
यज्ञाग्नि-
7. धूमैः परितोषितेन्द्रास्तस्मादभूवन्वहवो[3] नरेन्द्राः ।
राज्ये न येषां विररास वृष्टिर्व्विपक्षनारीनयनाम्बु[4]वाहैः ॥ [7]
वङ्गालभङ्गनिपुणः परि-
8. भूतपा [ण्ड्य] ो लाटेशलुण्ठनपटुर्जितगुर्जरेन्द्रः ।
काश्मीरवीरमुकुटार्च्चितपादपीठस्तेषु क्रमाद[5]जनि लक्ष्मणराजदेवः ॥ [8]
आसीद्यद्वि-
9. जयप्रयाणजनितव्यायामस्वेदोदयो-
न्मज्जनसैनिक[6]गात्रसिंदूरशिरः सिंदूरपूरो [रु] णः ।
त्वङ्क[7]तुङ्गतुरङ्गताडितमहाक्षोणी [भृ]-
10. द (ा) म्भोनिधिः
पूर्णो वैरिकठोरकंचदलनास्वसिंद्धुन्वपूरैरिव[8] ॥ [9]
साहित्यविद्याणल[9]नाभुजङ्गो निःशेषवात्री[10]धरणाय शेषः ।
ततः स
11. जज्ञे जगदैकवंद्यो[11] चेदीन्द्रचन्द्रो युवराजदेवः ॥ [10]
यौवनेन तनौ यस्य प्रतापेनारिमर्द्दसु[12] ।
कुलाद्रिकु [क्षे] ष्वरिभि [स्त्रि] भिस्तुल्यं पदं (।)
12. दधे ॥ [11]
भूभारक्षमधृक[13] श्रुतिप्रणयिनीमालंब्य[14]मानस्तनुं (।)
कुर्व्वाणः समेरपि नाकपथगानागच्छतो विद्विषां[15] ।
विख्यातां भुवि भूरिमार्ग्गर्ग[16]-
13. मनामुच्चैर्दधद्वाहिनीं
यः साक्षात्परमेश्वरः समभवत्सम्यक् शिवाराधनात् ॥ [12]
दिक्पर्यन्तनिखा[17]नयूपनिचयः क्ष्मापालचूडामणे-
स्त-
14. स्मादद्भुतविक्रमः क्रमवशात्कोकल्लनामाभवत् ।
चक्रे यद्विजयप्रयाणपणवः स्वर्ग्गाङ्गनास [ङ्ग] मा-
रम्भे मङ्गलतूर्यकार्यमहितक्षोणीप-

---

1. Ibid. -णीः । हेलोल्लासितबाहु-
2. Hultzsch ममन्यत 3. Ibid -न्बहवो 4. Ibid-नाम्बुवाहैः
5. Ibid -क्रमा 6. Ibid -योन्मज्जत्सैनिक गात्र सिंधुर
7. Ibid त्वङ्गतुङ्ग- 8. Ibid -कठोर कंठदलात्स्वःसिन्धुपूरैरिव
9. Ibid -ललना 10. Ibid -धात्री 11. Ibib नगदेकबंधश्चेदीन्द्र
12. Hultzsch -मूर्द्दसु 13. Ibid. =दृक् 14. Ibid -मालंबमान
15. Ibid. विद्विषः 16. Ibid. -मार्गग 17. Ibid खात-

15. तीनां भृसं[1] ॥ [13]

आसाजये[2] समरसिंधुरगंधरोषा-
द्यस्योद्यदायतकराः ककुभां करीन्द्राः [।]
पूत्कार[3]मार्तमिव खेचरनायकस्य
चक्रुः

16. कपोलमधुपध्वनिभिर्निराशाः ॥ [14]

यस्मिन्सुखैकप्रभवे प्रजानां तेजोनिधौ[4] चेतसि वर्त्तमाने ।
त [त्वे][5] परस्मिन्निव योगभाजां निता-

17. न्तमन्तस्तमसा प्रलो[6]नां ॥ [15]

आक्रामदूर्द्धं[7] ब्रह्माण्डसंघट्टस्फुटितं यशः ।
मन्ये यस्येन्दुनक्षत्रतारार्द्याकारतां गतं ॥ [16]
कारापंजरवद्ध[8]की-

18. रनृपतिर्दीप्तोज्ज्वलचर्मी[9]चयैः
तस्मात्कुन्तलभङ्गभङ्गिरसिको गाङ्गेयदेवोभवत[10] ।
येनाकारि करीन्द्रकुम्भदलनव्यापारसारात्मना

19. निर्जित्योत्कलभवधिसीन्नि[11] जयस्तम्भः स्वकीयो भुजः ॥ [17]
अगुणज्ञेति लोलेति ख्यातं यदिह दुर्यशः ।
लक्ष्मा[12]स्तदधुना धौतं दिव्यमादाय

20. तद्वपुः ॥ [18]

अतिमनोरथमर्थिजने धनं दिशति यत्तस्म कल्पतरुस्तरुः ।
रिपुयशःकुसुदा[13]करभास्करः सुतमसूत स कर्ण्णनराधि-

21. पम् ॥ [19]

आक्रान्तदक्षसामन्तप्रतापप्रसरादिव ।
चरणौ रणशौण्डस्य सोष्माणौ यस्य रेजतुः ॥ [20]
स्फुरद्भ्यां वज्रचक्राभ्यामेक [व्य]जेन ह-

22. स्तयोः ।

बभार[14] या श्रियं सा [च]क्रिन्द्रोपेन्द्रविजृम्भिनीं[15] ॥ [21]
सूद्धौ[16]द्धृतधराभारदिक्कुंजरकराय [तौ] ।
आनद्धतां[17] भुजौ यस्य हेलोद्धृतवसु[18]-

---

1. Ibid. भृश
2. Ibid. आशाजये
3. Ibid फूत्कार-
4. Hultzsch. निधौ
5. Ibid. तत्त्वे
6. Ibid प्रलीना
7. Ibid. -दूर्ध्वंब्रह्माण्ड
8. Ibid. -बद्ध
9. -चयैस्तस्मा
10. Ibid. -भवत्
11. Ibid. -मब्धिसीमनि or मब्धिसीम्नि वि-
12. Ibid. लक्ष्म्या-
13. कुमुदा-
14. Hultzsch. बभार
15. Ibid.-भिर्णां
16. Ibid मूर्द्धो-
17. Ibid आनंधेता
18. Ibid हेलोद्धृत-

23. न्धरौ ॥ [22]
त्याग [ब्य] सनिनो यस्य विपुलं शंखयोर्द्वयं ।
निधानं विधिना मन्ये द्विगुणीकृतमर्पितं ॥ [23]
उद्दण्डसुण्डाग्रविमि [स्रि] ते–

24. न पूत्का[1]रचू [र्ण्णी] कृतशीकरेण ।
मुक्तातपत्रायितमम्ब[2]रार्द्धं यस्य प्रयाणे पृतनागजानाम् ॥ [24]
नाहं नाय विपक्षगोत्रवस–

Second Plate; First Side.

25. तिर्न [त्य] क्तपूर्व्वस्थिति–
र्यस्याख्यानुमितीव चेदिर्दिनपतेर्द्विक्र[3]क्रमांक्रामत [:] ॥
प्रान्त (:) श्रान्तवरूथिनीकारिकरास्फाला–

26. वहे–
लोल्लासितकल्लोलावलिर्व्वा[4]हुदण्डमुदधिश्चक्रं सान्द्रस्वनैः ॥ [25]
यत्कुन्तप्रोतशत्रु (:) श्रुतरुधिरसुरापानमत्तप्रनृत्य–
तवेता[5]–

27. लोत्तालतालारवभरितकक्कु [पच] क्रपर्या (र्यं) न्तसीम्नि ।
अन्योन्या[6]लक्षवाचां समिति सुरभ[7]सं दत्तहस्तादिसंज्ञा–
व्यापारेणामराणां वररम–

28. णविधिः कुसमासीन्मुहूर्त्त[8] ॥ [26]
आनन्दमन्दसुमनस्सुमनोवकीर्ण्ण (:)
संग्रामरङ्गभुवि भूमिभृतां पुरस्ता[9]त ।
वीरस्य वीरचरितं ननृवे[10] कवं–

29. धै–
र्लक्ष्मीहठग्रहकठोरभुजस्य यस्य ॥ [27]
नीतेषु प्रमदाविगोगविधिना प्रागुह्यचा[11]रिव्रतं
सार्द्धं वन्धुत[12]या गृहस्थपदवीं का [र] गृहस्थापनात् [।]
वा–

30. नप्रस्थपदं वनाश्रयवशात[13] भैक्षाच्च तिक्षोः स्थि[14]तिः (।)
येनैव्वं[15] चतुराश्रमेकगुरुता स्पष्टाकृता[16] शत्रुषु ॥ [28]
यस्यार्थिव्रजवांछिताधिकफल–

---

1. Ibid. शुण्डाग्र विनिःसृतेन फूत्कार–
2. Ibid. मम्बरार्द्धं
3. Ibid. चेदिनृपतेर्द्विक्चक्र–
4. Hultzsch. –हेलोल्लसत्कल्लोलावलिबाहु
5. Ibid. –स्रत and नृत्यद्वता–
6. Ibid. –लक्ष्य
7. Ibid. सरभसं
8. Ibid. क्लप्त आसी–
9. Ibid. –स्तात्
10. Ibid. नन्तते
11. Ibid. प्रागुन्नह्य–
12. Ibid. बन्धु–
13. Hultzsch. –वशाद्
14. Ibid. भिक्षोः स्थितिं
15. Ibid. येनैवं
16. Ibdid. –श्रमैक गुरुता स्पष्टीकृता

31. प्राप्त्यै निसन्यभूः[1]
प्राक्प्रत्यग्धरणीधरान्तरस्परत[2] स्फुरद्घोषणाः ।
एते[3] निर्मितमाः [पु] रा परिनिते ब्रह्माण्डे अस्मिन कथ[4]–
सम्मा [स्य]–

32. न्ति यशान्सि[5] चेदिदिनपतेराकुलोभूद्भिरं ॥ [29]
किं तस्य कर्ण्णं [नृ] पतेर्व्वत वर्ण्णयामो
यस्य द्विजातिजनशासनताम्रपट्टैः[6] ।
उत्कीर्यमाणनिवि–

33. डाक्षरचक्रवाल–
वाचालितैर्वधिरभावमियाज[7] विश्वं ॥ [30] छ ॥
स एष[8] परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवामदेवपादानु (।)–

34. ध्यात (।) परमभट्टारकमहाराजाधिराजपरमेश्वरपर [म] माहेश्वर–
त्रिकलिङ्गाधिपतिश्रीमत्कर्ण्णदेव[9] निजभुजोपार्जितास्व[10]पतिगजप–

35. तिनरपतिराजत्रयाधिपतिः[11] श्रीमत्कर्ण्णदेवः कुशली (॥ छ ॥)
जयस्कन्धावार[12] श्रीमत्कर्ण्णतीर्थाधिवासिते महादे [वी] महाराजपुत्रो महाम–

36. न्त्री महासान्धिविग्रहिको महामात्यो महाधर्म्माधिकरणिको महाप्रतिहारो महाक्षपटलिको महाभाण्डागारिको महासामन्तो महाप्र

37. (।) मत्तवारो महाश्वसाधनिकः एतानन्यांश्च [।] कीर्त्तितान[13] यथा-स्थाननियुक्तराजपुरुषान्यथाप्रतिस्थान[14] कोशम्बपत्तयायं[15] (॥) चन्द-पहाग्रामनि–

38. वासिनो निखिलजनपदान्यथार्हं मानयति बोधयति[16] समाज्ञापयति[17] [॥] विदितमस्तु भवतां यथा ग्रामोयमस्माभिश्चतुराघाटविशुद्धः सजल–

39. स्थलः साम्र[18]मधूक [:] सगर्त्तोषरः सलोहत्रवणाकरः स्वसीर्मा[19]पर्यन्त-[:] सवनतृणयूतिगोचरपर्यन्तः (।) विदभी कौण्डिन्यगोत्रायाङ्गि–रसाम्ब[20] (।)–

40. रीषयौवनास्पत्रि[21] (:) प्रवराय वाजसनेयसाखिने[22] उपाध्यायसील्ल–पौत्राय आवसथिकमाल्हूपुत्राय पंडितश्रीशान्तिसर्म्मणे[23] ब्राह्मणाय

---

1. Ibid. निशम्यात्मभूः प्राक्– 2. Ibid.–धरान्तर रसापारात् 3. Ibid. एतन्–
4. Ibid. परिमितं ब्रह्माण्डमस्मिन्कथ 5. Ibid यशांशिचेदिनृपतेरित्याकुलो
6. Ibid, –नाम्र 7. Ibid. बधिरभावमियाय 8. Ibid. एष
9. Ibid. –देवो 10. Ibid. ताश्वपति– 11. Ibid. –पत्यः
12. Ibid. वारे 13. Hultzsech.–तान् 14. Ibid. –पुरुषा and –स्थान
15. Ibid. कौशाम्बपत्तलाया 16 Ibid. बोध– 17. Ibid. समाज्ञा–
18. Ibid. साम्र– 19. Ibid. सीमा– 20. Ibid. ––साम्ब
21. Ibid. यौवनाश्च 22. Ibid. –शाखिने 23 Ibid शर्म्मणे ब्राह्म–

41. ग्रामोयं एतेषां एवंकृत्वा[1] श्रीमत्कर्ण्णप्रकाशे व्यवहरणे सप्तमसंवत्सरे
कार्तिके मासि सुक्लपक्ष[2]कार्तिकीपौर्ण्णमास्यां तिथौ गुरुदि-

42. ने एवं संवत्सरमासपक्षतिथिवारानुक्रमेणाद्येह श्रीमतअर्घतीर्थे[3]
गंगायां स्नात्वा भगवन्तं शिवभट्टारकं समभ्यर्च्च्य मातापित्रोरा-

43. त्मनश्च पुण्ययशोभिवृद्धये चंद्रार्कक्षितिपर्यन्तं शासनत्वेन प्रदत्त इति
मत्वा यथार्थायमानभागभोगहिरण्यादिसमस्तराजप्र-(।)

44. त्यादायाः एतस्याज्ञाश्रवणविधेयीभूय दातव्याः । तदपचिकीर्षया
न केनापि (न) गन्तव्यमिति ॥ छ ॥ भवन्ति चात्र पुण्यश्लोकाः ।

45. सर्व्वानेतान् भाविनः पार्थिवेन्द्रान[4]
भूयो भूयो याचते रामभद्रः [।]
सामान्योयं धर्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः ॥ [31]
व-

46. हुभि[5]र्वसुधा भुक्ता राजभिः[6] सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ [32]
भूमि यः प्रतिगृह्णाति[7] यश्च भूमि प्रयच्छति[8]

47. उभौ तौ पुण्यकर्माणौ[9] नियतं स्वर्ग्गगातिनौ[10] ॥ [33]
षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके व (।)-

48. सेत[11] ॥ [34]
अस्मिन्वंसे[12] द्विजश्रोपि यश्चान्यो नृपतिर्भवेत[13] ।
तस्यापि करलग्नोहं शासनं न व्यति[14]क्रमेत ॥ [35]
सुवर्ण्णमेकं गामेकां भूमेरप्ये-

49. कमंगुलं ।
हरन्नरकमाप्नोति यावदाहूत[15]संप्लवं ॥ [36]
लिखितं चेदं करणिकश्री[16]सर्व्वानन्देन ।
उत्कीर्ण्णितं[17] च विद्यानन्देन ॥ मङ्गलं महाश्रीः ॥

---

1. Ibid. एवं-
2. Ibid. शुक्ल-
3. Ibid. श्रीमदर्घ-
4. Hultzsch. -वेन्द्रान्
5. Ibid. बहुभि-
6. Ibid. राजभिः
7. Ibid. गृह्णाति
8. Ibid. प्रयच्छति
9. Ibid. -कर्माणौ
10. Ibid. गामिनौ
11. Ibid. वसेत्
12. Hultzsch -न्वंशे
13. Ibid. -वेत्
14. Ibid. -मेत्
15. Ibid. भूत-
16. -श्री
17. Ibid. उत्कीर्ण

52. HARSHA STONE INSCRIPTION OF CHĀHAMĀNA VIGRAHARĀJA II

Prov. : Harsha, Jaipur, Rajasthan.
Date. : V. S. 1030 (=C. 973 A. D.);
Lang. : Sanskrit. **Script.** : Nāgari.
Ref. : Kielhorn, *Ep Ind* , Vol. II. pp. 110–30.
D. R. Bhandarkar. *Ind. Anti*, 1913. pp. 57–64.

Text

1. .. .. [य][1] ॥
सर्व्वविघ्नशम [नं सुराचितं] पूर्व्वमेव शिव [यो] स्तनूद्भवम् ।
भुक्तिमुक्तिपरमार्थसिद्धिदं तं नमामि वर [दं] ⌣ – ⌣ ⌣ ॥[2] [1]
....

2. . .....[का] कुलितमानसैः ।
स्तूयमानस्तु सद्देवैः पातु वस्त्रिपुरांतकः ॥ [2]
पादन्यासावनुद्धा नमति वसुमती शेषभोगावलग्ना
[वा (बा) हूत्क्षेपैः स [मं] – ⌣ ⌣ ⌣ ⌣ ⌣ ⌣ ⌣ – – ⌣

3. – – र्क्षचन्द्रैः ।
भिक्षावस्थं समस्तं भवति हि भुवनं यस्य नृत्ते प्रवृत्ते
स श्रीहर्षाभिधानो जयति पशुपतिर्हृत्तविश्वानुकंपः ॥ [3]
सव्ये शूलं त्रिशिखमपरे दोष्णि [भि] क्षाक [पालं]
भूषा – – ⌣ ⌣ ⌣

4. [भु] जगः कंठिका नीलकंठे ।
नेदृग्वेषस्त्रिनयन मया क्वापि दृष्टो विचित्र
इत्थं गौर्या प्रहसितहरः सस्मितः पातु युष्मान् ॥ [4]
वेगोद्भूतार्यमादिग्रहगगनतलं व्याप्नुवाना जलौघै–
र्न्यक्कुर्व्वाणा स [मु] [द्रान्]

5. क्षय [व] लितजलानूर्म्ममालासहस्रैः ।
देयाद्भ्यर्थितं वः शशधरधवला स्वर्द्धुनी चंद्रमौले–
र्मौलौ लीलां वहन्ती स्फुटविकटजटाव (ब) न्धने चीरिकायाः ॥ [5]
चंचच्चंद्रार्द्धतारं भुवननगनदीद्वी [प] सिं [धु]–

6. [प्र] पंचं
विश्वं देवासुराहिप्रमथमुनिवरैर्यक्षमर्त्यैः सनाथम् ।

---

1 Kielhorn ओं नमः शिवाय 2. K. is inclined to restore गजाननम्

यस्येच्छाशक्तिभावादसदपि सकलं जायते लीयते च
सोव्याद्वो हर्षदेवो भुवनविरचनासूत्रधारोप्रमेयः ॥ [6]
नूनं वाणाग्निदग्धस्त्रिपुरसुररिपु-
7. [र्जा] तहर्षः सहर्षै-
रिंद्राद्यैर्देवबृंदैः कृतनुतिनतिभिः पूज्यमानोत्र शैले ।
योभून्नाप्नापि हर्षो गिरिशिखरभुवोभारतानुग्रहाय
सो[1] स्ताद्वो लिंगरूपो द्विगुणितभवनश्रंद्रमौलिः शिवाय ॥ [7]
निर्यत्नेत्रा [ण्ड]-
8. [भा] ण्डानणुदहनरुचि प्लोषसंभ्रान्तसत्वं (स्वं)
प्रान्तज्वालावलीढद्रुमव (व) हलमहाधूमधूम्रायिताशम् ।
सरंभारंभ भीमस्वनमसमशरोच्छेदि यस्याशशंके
दृष्ट्वा देवैः [स्व][2] रूपं किमिय [म] समये संहृतिर्व्वो (र्ब्वो)-
भुवे [द्य ॥] [8]
9. देवः पुरधगाध्यास्ते यमभ्रंकषमुच्चकैः ।
हर्षाख्यातिः स हर्षाख्यो गिरिरेष[3] पुनातु वः ॥ [9]
शूरस्येदं श्लोकं[4] ।
गांगं नो निर्झ्झ [रांभ] : प्रवहति न शुभा नंदनोद्यानलक्ष्मीः
सद्रत्नस्वर्णशृङ्गामलविविधरुचो नैव – –
10. [स्त] पात्र ।
अन्यां धत्ते तथापि श्रियमतिशयिनीमेष शैलोद्वितीयां
साक्षाच्छंभुर्यदास्ते तदपि हि परमं कारणं रम्यतायाः ॥ [10]
अष्टमूर्त्तिर्यमध्यास्थे सिद्धयष्टकविभुः स्वयम् ।
महिमा भूधरस्यास्य परमः कोपि–ᴗ ᴗ[5] ॥ [11]
11. [एत] स्वर्ण्णण्डकांतिप्रवरतममहामण्डपाभोगभद्रं
प्रांतप्रासादमालाविरचितविकटापाण्डुपुत्त्राभिरामम् ।
मेरोः शृङ्गोपमानं सुघटितवृषसत्तोरणद्वाररम्यं
नानासद्भोगयुक्तं जयति भगवतो हर्षदेवस्य [ह]-
12. [र्म्यम्] ॥ [12]
आद्यः श्रीगूवकाख्याप्रथितनरपतिश्चाहमानान्वयोभूत्[6]
श्रीमन्नागा[7] [द्य] लोकप्रवरनृपसभालब्ध (ब्ध) वीरप्रतिष्ठः ।

---

1. K. reads स.
2. सरुपं was, perhaps, originally engraved, but seems later to have been altered to स्व०.
3. रेषा originally engraved, but altered to रेष.
4. Kielhorn. reads शूरस्यैषश्लोकः 5. K.restores विषते. 6. Kielhorn.–भूच्छ्री.
7. Originally श्रीमन्नागा[व, but व omitted subsequently. द्य is supplied by Kielhorn.

यस्य श्रीहर्षदेवे वरभवनमयी भौतली कीर्त्तिमूर्त्ति–
र्लोकेऽपि स्थिरैषा प्रतपति परमैः–

13. ⏑ – – ⏑ – [गै] : ॥ [13]

पुत्रः श्रीचंद्रराजोभवदमलयशास्तस्य तीव्रप्रतापः
सूनुस्तस्याथ भूपः प्रथम इव पुनर्गूवकाख्यः प्रतापी ।
तस्माच्छ्रीचंदनोभूत्क्षितिपतिभयदस्तोमरेशं सदर्प्पं
हत्वा रुद्रेनभूपं समर [भुवि]

14. [ब] लाद्ये [न लब्धा] जयश्रीः ॥ [14]

ततः परमतेजस्वी सदा समरजित्वरः ।
श्रीमान्वाक्पतिराजाख्यो महाराजोभवत्सुतः ॥ [15]
येनादैन्यं स्वसैन्यं कथमपि दधता वाजिवल्गा मुमुक्षु
प्रागेव त्रासितेभः सरसि क [रि[1]] रटद्भिंडिमैर्द्धि ⏑ –

15. – [जे]।

वन्द्यक्ष्माभर्त्तुराज्ञां समदमभि [व] हन्नागतोनंतपार्श्व–
क्ष्मापालस्तंत्रपालो दिशि दिशि गमितो ह्रीविषण्णः प्रसण्ण–
(न्न) : ॥ [16]

शूरस्येदं ।

लोकैर्यो हि महीतले ननु हरिश्चंद्रोपमो गीयते
त्यागैश्च [र्थ] जयेषु की [र्ति]–

16. [र] मला धर्म्मश्च यस्योज्व (ज्ज्व) लः
येनादायि हराय मंदिरकृते भक्त्या प्रभूतं वसु
श्रीमद्वाक्पतिराजसूनुरसमः श्रीसिंहराजोभवत् ॥ [17]
हैममारोपितं येन शिवस्य भवनोपरि ।
पूर्णचंद्रोपमं स्वीयं मूर्त्तं य [श] ⏑ [पिं] डक [म् ॥] [18]

17. – –[2] । तोमरनायकं सलवणं सैन्याधिपत्योद्भटं
युद्धे येन नरेश्वराः प्रश्रिदिशं निर्ज्ञा (र्ण्णा) शिता जिष्णुना ।
कारावेश्मनि भूरयश्च विधृतास्तावद्धि यावद्गृहे
तन्मुक्त्यर्थमुपागतो रघुकुले भूचक्रवर्त्ती स्वयम् ॥ [19]
श्रीमा–

18. [न्वि] ग्रहराजोभूत्तत्सुतो वासवोपमः ।
वंशलक्ष्मीर्जयश्रीश्च येनैते विधुरोद्धृते ॥ [20]
श्रीसिंहराजरहिता किल चिंतयंती
भीतेव संप्रति विभुर्ननु को ममेति ।
येनात्मवा (बा) हुयुगले चिरसन्निवासं
संधीरितेति ददता निज–

1. K suggested that it may be read as वि०.

2. Kielhorn is inclined to supply either जित्वा or हत्वा.

19. [रा] ज्यलक्ष्मीः ॥ [21]
येन दुष्टदमनेन सर्व्वतः साधिताखिलमही स्ववा (बा) हुभिः ।
लीलयैव वशवर्त्तिनी कृता किंकरीव निजपादयोस्तले [22]
यस्य चारु चरितं सतां सदा शृण्वतां जगति कीर्त्तितं जनैः ।
हृष्टिजातघनरोमकं

20. ⌣ –[1] जायते तनुरलं मुहुर्म्मुहुः ॥ [23]
मुक्ताहारैः सुतारैः प्रतरलतुरगैश्चारुवस्त्रैश्च शस्त्रैः
कर्प्पूरैः पूगपूरैर्म्मलयतरुवरैर्हेमभारैरपारैः ।
उद्यद्दानैः समानैश्चलकुलगिरिभिर्हन्तिवारैः सदारै–
र्श्चिर्य्याजैः प्रातिर – –

21. ⌣ ⌣ भिरिति भृतैः प्राभृतैर्यैः सिषेवे ॥ [24]
छत्रधारावरग्रामो द्वितीयः शंकराणकः [।]
तेनेमौ हर्षना [थाय] [भ] क्त्या दत्तौ सशासनौ ॥ [25]
श्रीमद्दुर्ल्लभराजेन योनुजेन विभूषितः [।]
लक्ष्मणेनेव काकुत्स्थो विष्णुनेव हलायुधः ॥ [26]

22. [महा] राजावली चासौ शंभुभक्तिगुणोदया ।
श्रीहर्षः कुलदेवोस्यास्तस्माद्दिव्यः कुलक्रमः ॥ [27]
अनंतगोचरे[2] श्रीमान् पण्डित औत्तरेरव (श्व) रः ।
पंचार्थ[3]लाकुलाम्नाये[4] विश्वरूपोभवद्गुरुः ॥ [28]
दीक्षाजातमलध्वन्सविस्फुरज्ज्ञा[5]–

23. [ननि] र्म्मलः ।
प्रशस्ताख्योभवच्छिष्यस्तस्य पाशुपतः कृती ॥ [29]
भा [व] रक्तो [भ] वत्तस्य शिष्यो द्विनामतोल्लटः ।
वार्गटिकान्वयोद्भूतसद्विप्रकुलसंभवः ॥ [30]
हर्षस्यासन्नतो ग्रामः प्रसिद्धो राणपल्लिका ।
सांसारिककुलाम्नायस्ततो यस्य विनि [र्गमः] ॥ [31]

24. अल्लटच्छद्मना नंदी शिवासन्नस्थितिक्रमः ।
श्रीहर्षाराधने नूनं स्वयं मर्त्यमवातरत् ॥ [32]
आजन्म ब्र (ब्र) ह्मचारी दिगमलवसनः संयतात्मा तपस्वी
श्रीहर्षाराधनैकव्यसनशुभमतिस्त्यक्तसंसारमोहः ।
आसीद्यो लब्ध (ब्ध) जन्मा भवतर [णधि] यां– ⌣

---

1. Kielhorn wants to restore टका befre जायते.
2. Better अनन्तगोचरः as an adjective of औत्तरेश्वरः.
3. पंचार्थ is usual adjective used before the names of the kings or honourable persons in the medieval inscriptions.
4. Kielhorn is inclined to restore पंचार्थलकुलाम्नायो.
5. Ibid. –ध्वस विस्फुरज्ज्ञा–

25. – [षी] सुव (ब) न्धु–
स्तेनेदं धर्म्मिवित्तैः सुघटितविकटं कारितं हर्षहर्म्यम् ॥ [33]
अस्मिंश्चंद्रांकशैले गगनपथलिहोत्तुङ्गशृङ्गेप्रमेयं
हर्म्यं श्रीहर्षनामप्रथितपशुपतेः सद्विमानो [प] मानम् ।
दृष्ट्वा भद्रोगयुक्तं व (ब) हुसुरभवनं कारितं येन
26. – –
नासाध्यं किंचिदस्ति स्फुटमिति तपसो निःस्पृहाणां यतीनाम् ॥ [34]
आसीन्नैष्ठिकरूपो यो दीप्तपाशुपतव्रतः ।
ती [व्र] वेगतपोजात पुण्यापुण्यमलक्षयः ॥ [35]
सदा शिवसमाकारस्तस्येश्वरसमुद्यतेः ।
भावद्योतोभवच्छिष्यः संदीपितगु–
27. [रुक्ष] मः ॥ [36]
गुरोराज्ञामयं प्राप्य प्रतिष्ठासोः शिवालयम् ।
यथाप्रारब्ध (ब्ध) कार्याणामंगीकृतभरोभवत् ॥ [37]
पुरस्तात्पर्व्वतस्याधस्खितयं येन कारितम् ।
सत्कूपो वाटिका दिव्या गोप्रपा घटितोपलैः ॥ [38]
सदैव वहमानेन कूपेन स्वादुवारिणा ।
वाटिकासेच–
28. ..... प्रपाभरणन्तथा ॥ [39]
सत्पुष्पैरर्च्चनं शम्भोः पयःपानं गवामपि ।
कार्यद्वयमिदं सारं दर्शितं पुण्यकांक्षिणाम् ॥ [40]
दिगंव (ब) रं जटा भस्म[1] तल्पं च विपुलं मही ।
भिक्षा वृत्तिः करः पात्त्रं यस्यैतानि परिग्रहः ॥ [41]
शिवभवनपु–
29. – – ⌣ [पा] रं यदासी
त्तदखिलमुपलौघैः पूरयित्वा गभीरम् ।
समतलसुखगम्यं प्रांगणं तेन कांतं
मसृणतरशिलाभिः कारितं वं (बं) धयित्वा ॥ [42]
वीरभ [द्र] सुतः ख्यातः सूत्रधारोत्र चंडसिव[2] ।
विश्वकर्म्मेव सर्व्वज्ञो वास्तुविद्या [म]–
30. – ⌣ – [॥] [43]
[ये] न निर्म्मितमिदं मनोहरं शंकरस्य भवनं समंडपम् ।
[स] र्व्वदेवमयचारुतोरणं स्वर्गखंडमिव वेधसा स्वयम् ॥ [44]
गंगाधरवरभवने करणिकथीरुकसुतेन भक्तेन ।
अक्रियतेयं सुगमा प्रशस्तिरिह धीरनागेन ॥ [45]

---

1. Originally भस्म altered to भस्म.

2. This word offends against metre and the grammar both.

यावच्छंभो ⌣ –

31. – ⌣ ⌣ नसुरनदीचंद्रलेखापतित्वं
यावल्लक्ष्मीर्मुरारेरुरसि विलसति द्योतते कौस्तुभं च ।
गायत्री याव [दा] स्ते सततमुपनता प्रेयसी ब्र (ब्र)ह्मणोन्ते
कैलासाकारमेतत्प्रतपतु भवनं हर्षदेवस्य तावत् ॥ [46]
अ – –

32. –[ह] तः शंभुः कथं कालस्य गोचरः ।
हर्म्यनिर्म्माणकालस्तु यथादृष्टो निव (ब) ध्यते ॥ [47]
संवत् १०१ [३] आषाढ़शुदि १३ शंभोः प्रासादसिद्धिः ॥ ❀ ॥
जातेब्दा (ब्दा) नां सहस्रे त्रिगुणनवयुते सिंहराशौ गतेर्के
शुक्ला यासीत्तृ [ती]–

33. [या] शुभकरसहिता सोमवारेण तस्याम् ।
आदिष्टः शंभुनासौ [ध्रुव] ममलपदं दित्सुना शुद्धसत्वं (स्वं)
लब्धा (ब्धा) वैदेहभावं शिवभवनमभिप्रस्थितो ह्यस्फुटोथ ॥❀॥ (॥) [48]
स्वस्ति । संवत् १०३० आषाढ़शुदि १५ निरुद्धं
यथालब्ध (ब्ध) शासना [नां] – –

34. –त्रैव लिख्यते । महाराजाधिराजश्रीसिंहराजः स्वभोगे तूनकूपकद्वादशकं सिहगोष्ठं । तथा पट्टव (ब) द्धकविषये त्रैकलककेशानकूपौ । सरःकोट्टविषये कण्हपल्लिकामेवं ग्रामांश्चतुरश्रंद्रांकशिखरोपरि···[भ]–

35. गवते श्रीहर्षदेवाय पुण्येहनि श्रीमत्पुष्करतीर्थे[1] स्नात्वा स्नपनार्च्चनविलेपनोपहारधूपदीपपर्व्वयात्रोत्सवार्थमाशशांकतपनार्ण्णवस्थितेर्यावच्छासनत्वेन प्रददौ । तथैतद्भ्राता श्रीवत्सराजः स्वभोगावाप्तजय [पु] [रविष]–

36. ये कर्हमखातग्राममदाच्छासनेन । तथा श्रीविग्रहराजेन शासनदत्तग्रामद्वयमुपरिलिखितमास्ते । तथा श्रीसिंहराजात्मजौ श्रीचंद्रराजश्रीगोविंदराजौ स्वभोगावाप्तपट्टव (ब)द्धकविषये । दर्नकशविष [ये] ·····

37. [पा] संख्येन स्वहस्तांकितशासनौ [गृ] ····· [द] के पाटकद्वयं पल्लिकाग्रामौ भक्त्या वितेरतुः । श्रीसिंहराजीयदुःसाध्यश्रीधंधुकः खट्टकूविषये स्वभुज्यमानमयूरप [द्र] ग्रामं स्वाम्यनुमतः प्रदत्तवान् । ·····

38. हिलात्मजः श्रीजयनराजः[2] स्वभुज्यमानकोल्लिकूपकग्रामं भक्त्या हर्षदेवाय शासनेन दत्तवान् । (॥) तथा समस्तश्रीभम्मह [दे] श्या शाकंभर्यां लवणकूटकं प्रति विंशोपकमेकं दत्तं । तथोत्तरापथीयहेडाविकानां [स] ·····

39. [घ] टकं प्रति द्रम्म एको दत्तः । (॥) पुण्यात्मभिर्दत्तानि देवभुज्यमानक्षेत्राणि यथा । म [द्रा] पुरिकायां पि [प्प] लवालिकाक्षेत्र निम्ब (म्ब) डिका [ग्रा] मे दर्भटिकाक्षेत्रं मरुपल्लिकायां [ग्रा] टके [त्रं] [ह] र्षे लाटक्षेत्रं ····· ··

1. Identification of पुष्कर 2. श्रीजयनीराजः altered to श्रीजयनराजः.

40. .....[क] लावणपद्रे सेक्यकक्षेत्रं तथास्त्रैव द्विहलिकानं [दि]
सोमके वृहद्धलमिति ॥
सर्व्वानेतान्भाविनो भूमिपाला-
न्भूयो भूयो याचते रामभद्रः ।
सामान्योयं धर्म्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भि [: ॥] [49]

53. UDEPUR PRAŚASTI OF THE KINGS OF MALAWA

Prov. : Udepur, Rajasthan.
Date. : V. S. 1262, Śaka S. 1147 or Kali S. 4307.
Lang. : Sanskrit **Script.** : Nāgarī of about 11th Century A. D.
Ref. : Buhler, *Ep. Ind.* I, p. 222–238.

Text

1. ओं नमः शिवाय ॥
गंगांबुसंसिक्तभुजंगमालवाले कालेन्दोरमलांकुराभा ।
यन्मूर्द्धि नम्रेहितकल्पवल्ल्या भातीव भूयै स तवास्तु शंभुः ॥ [1 ॥]
2. सानंदनंदिकरसुंदरसांद्रनांदीनादेन तुंबुरुमनोरमगानमानैः ।
[नृत्यं] त्यवस्यमनि[1] [शं] सुखासवेस्या[2] यस्याग्रतो भ-
3. वतु वः स सिवः[3] शिवाय ॥ [2 ॥]
मूर्द्धस्थिता [भ्रसरितोरु] मयेव संभो[4]-
रर्द्धांगभंगघटनाद्धनमाश्रयंती ॥
दृष्ट्वात्मनाथवसतां[5]
4. सकलांगतुष्टा
पुष्टिं नगेंद्रतनया भवतां विदध्यात् ॥ [3 ॥]
गणेशो [व] : सु [खाया] स्तु निशातः परशुः करे ।
यस्य नम्रधनावद्य-
5. कंदोच्छित्त्या इवोद्यतः ॥ [4] ॥
अस्त्युर्व्वीध्रः प्रतीच्यां हिमगिरितनयः सिद्धदंपत्यसिद्धेः
स्थानं च ज्ञानभाजामभिमत-
6. फलदो ऽर्व्वितः सो ऽर्व्बुदाख्यः[6] ।

1. Buhler –त्यवश्यम 2. Ibid. वेश्या 3. Ibid. च शिवः
4. Ibid. शभोर 5. Ibid यशता
6. अर्व्बुद is obriously a son of Himālaya in the west

विश्वामित्रो वशिष्ठादहरत[1] व [ल] तो यत्र गां तत्प्रभावा-
ज्जज्ञे वीरोग्निकुंडाद्रिपुबलनिधनं य-

7. श्वकारैक एव ॥ [5 ॥]
मारयित्वा परान्धेनुमानिन्ये स ततो मुनिः ।
उवाच परमारा [ख्यः पा] र्थिवेंद्रो भविष्यसि ॥ [6 ॥]
तदन्ववाये ऽखिलयज्ञसंधतृ-

8. सामरोदाहृतकीर्त्तिरासीत् ।
उपेंद्रराजो द्विजवर्ग्गरत्नं सौर्यार्जितोतुंगनृपत्व [मा] नः [7 ॥]
तत्सूनुरासीदरिराजकुंभिकंठीरवो

9. वीर्यवतां वरिष्ठः ।
श्रीवैरसिंह[2]श्चतुरर्णवान्तधात्र्यां जयस्तंभकृतप्रशस्तिः ॥ [8]
तस्माद्बभूव वसुधाधिपमौलिमाला-
रत्नप्रभारुचिररं-

10. जितपादपीठः ।
श्रीयकः करकृपाणजलोर्म्मिमग्न-
सत्रुव्रजो[3] विजयिनां धुरि भूमिपालः ॥ [9 ॥]
तस्मादवन्तितरुणीनय-

11. नारविन्द-
भास्वानभूत्करकृपाणमरीचिदीप्तः ।
श्रीवाकपतिः सतम[4]खानुकृतिस्तुरंगा
गंगासमुद्रसलिलानि पिवन्ति यस्य ॥ [10 ॥]

12. जातस्तस्माद्वैरिसिंहोन्यनाम्ना लोको ब्रूते [वज्रट] स्वामिनं यं ।
शत्रोर्व्वर्गं धारयासेर्ज्जिहत्य श्रीमद्धारा सूचिता येन राज्ञा ॥ [11 ॥]
तस्मा-

13. दभूदरिनरे[5]स्वरसंघसेवा[6]गर्जद्गजेंद्रवसुंदरतूर्यनादः ।
श्रीहर्षदेव इति खोट्टिगदेवलक्ष्मीं जग्राह यो युधि नगादसमप्र-

14. तापः ॥ [12 ॥]
पुत्रस्तस्य वि [भू][7] षिताखिलधराभोगो गुणैकास्पदं
सौर्याक्रान्तसमस्त[8]सत्रु विभावाधि[9]व्याग्रवित्तोदयः ।
वक्तृत्वो-

---

1. The allusion to Viśvamitras forcibly carrying away the cows of the sage Vasishtha.
2. Bühler वैरिसिंह- 3. Ibid. शत्रुव्रजो
4. Buhlar -शतमखानुकृति 5. Ibid. -नरेश्वर 6. Ibid. -सेना
7. Ibid. -विभूषिता 8. Ibid. शौर्या-
9. Ibid. -शत्रुविभवाधिन्याय्य वित्तोदयः

15. ऋकविस्वतर्ककलनप्रज्ञातशा [स्त्रा] गमः
श्रीमद्वाक्पतिराजदेव इति यः सद्भिः सदा कीर्त्यते [॥ 13 ॥]
कर्णाटलाटकेरल–
16. चोलशिरोरत्नरागिपदकमलः ।
यश्च प्रणयिगणार्थितदाता कल्पद्रुमप्रख्यः ॥ [14 ॥]
युवराजं विजित्याजौ हत्वा तद्वा–
17. हिनीपतीन् ।
खड्गमूर्द्धीकृतं[1] येन त्रिपुर्यां विजिगीषुणा ॥ [15]
तस्यानुजो निर्जितहूणराजः श्रीसिंधुराजो विजयार्जि–
18. तश्रीः ।
श्रीभोजराजोजनि येन रत्नं नरोत्तमाकम्पकृतद्वितीयं ॥ [16 ॥]
आ कैलासान्मलयगिरितो ऽस्तोदयाद्दिङ्मुखादा–
भुक्ता पृथ्वी पृथु–
19. नरपतेस्तुल्यरूपेण येन ।
उन्मूल्योर्व्वीभरगुरु [ग] णा लीलया चापयज्या[2]
क्षिप्ता दिक्षु क्षितिरपि परां प्रीतिमापादिता च ॥ [17 ॥]
साधितं विहितं दत्तं
20 ज्ञातं तद्यन्न केनचित ।
किमन्यत्कविराजस्य श्रीभोजस्य प्रशस्यते ॥ [18]
चेदीश्वरेंद्ररथ [तोग्ग] ल [भीममु] ख्या–
न्कर्णाटलाटपतिगुर्जरराट्तुरु–
21. ष्कान् ।
यद्भृत्यमात्रविजितानबलो [क्य] मौला
दोष्णां बलानि कलयंति न [योद्ध] लो [कान्] ॥ [19 ॥]
केदाररामेस्वर[3]सोमनाथ [सुं] डीरकालानलरुद्र–
22. सत्कैः [।]
सुराश्र [यै] र्व्याप्य च यः समन्ताद्यथार्थसंज्ञां जगतीं चकार ॥ [20 ॥]
तत्रादित्य प्रतापे गतवति सदनं स्वर्गिणां भग्नभक्ते–
व्याप्ता धारेव धात्री रिपुति–
23. मिरभरैर्म्मौललोकस्तदाभूत् ।
विश्रस्तांगो[4] निहत्योत्कटरिपुति [मिरभ] रं खड्गदंडा[5]सुजालै–
रन्यो भास्वानिवोद्यन्द्युतिमुदितजनात्मोद–
24. यादित्यदेवः ॥ [21 ॥]
येन धरणीवराहः परमारेणो [द्धृतो] निरायासा [त्] ।
[तस्यैतस्या भू] मेरुद्धारो वत कियन्मात्रः ॥ [22 ॥]
[कुंवान्य–] तवाजिव्रजरु–

---

1. Buhler खड्गऊर्ध्वीकृतो 2. Ibid. चापयष्टया
3. Bühler. रामेश्वर– 4. Ibid. विस्रस्तां– 5. Ibid. दण्डांशु–

54. KHALIMPUR PLATE OF DHARMPALA DEVA.

Prov. : Khalimpur. Maldah Dist., E. Bengal.
Date. : 9 th century A. D.
Lang. Sanskrit. **Script.** : Magadha variety of northern alphabet.
Ref. : Batavyal. J. A. S. B. Vol. LXIII & I p. 39 ff.
Kielhorn, *Ep. Ind.*Vol. IV pp. 243–254.

Text

First Side

1. ओं स्वस्ति [॥]
सर्व्वज्ञतां श्रियमिव स्थिरमास्थितस्य
वज्रास–
2. नस्य व (ब) हुमारकुलोपलम्भाः ।
देव्या महाकरुणया परिपा–
3. लितानि
रक्षन्तु वो दश व (ब) लानि दिशो जयन्ति ॥ [1]
श्रिय इव सुभगा–
4. याः सम्भवो वारिराशि–
श्शशधर इव भासो विश्वमाह्लादयन्त्याः ।
प्रकृतिरवनिपानां सन्ततेरुत्तमाया
अ–
5. जनि दयितविष्णुः सर्व्वविद्यावदातः ॥ [2]
आसीदासागरादुर्व्वीं गुर्व्वीभिः कीर्त्तिभिः कृती ।
मण्डयन्
6. खण्डितारातिः श्लाघ्यःश्रीवप्यटस्ततः ॥ [3]
मात्स्यन्यायमपोहितुं प्रकृतिभिर्लक्ष्म्याः करग्राहितः
श्रीगोपा–
7. ल इति क्षितीशशिरसां चूडामणिस्तत्सुतः ।
यस्यानुक्रियते सनातनयशोराशिर्दिशामाशये
श्वेतिम्ना य–
8. दि पौर्ण्णमासरजनी ज्योत्स्नातिभारश्रिया ॥ [4]
शीतांशोरिव रोहिणी हुतभुजः स्वाहेव तेजोनिधेः
शर्व्वाणी–

9. व शिवस्य गुह्यकपतेर्भद्रेव भद्रात्मजा ।
पौलोमीव पुरन्दरस्य दयिता श्रीदेइदेवीत्यभू-
द्देवीं तस्य विनो-

10. दभूर्भुरिपोर्लक्ष्मीरिव क्ष्मापतेः ॥ [5]
ताभ्यां श्रीधर्म्मपालः समजनि सुजनस्तूयमानावदानः
स्वामी भूमी-

11. पती[1]नामखिलवसुमती मण्डलं शास्यदेकः [।]
चत्वारस्तीरमज्जत्करिगणचरणन्यस्तमुद्राः समुद्रा
यात्रां य-

12. स्य क्षमन्ते न भुवनपरिखा विश्व (श्व) गाशाजिगीशोः ॥ [6]
यस्मिन्नुद्दामलीलाचलितव (ब) लभरे दिग्जयाय प्रवृत्ते
यान्त्या[2]-

13. [श्व] श्वम्भरायां चलितगिरितिरश्चीनतां तद्वशेन ।
भाराभुग्नावमज्जन्मणिविधुरशिरश्चक्रसाहायकार्थं
शेषे-

14. णोदस्तदोष्ण त्वरिततरमधो धस्तमेवानुयातम् ॥ [7]
यत्प्रस्थाने प्रचलित व (ब) लास्फालनादुल्ललद्भि-
र्धूलीपूरैः पिहि-

15. तसकलव्योमभिर्भूतधाम्याः ।
सम्प्राप्तायाः परमतनुतां चक्रवालं फणानां
मग्नोन्मीलन्मणि फणिपतेर्ला-

16. घवादुल्ललास ॥ [8]
विरुद्धविषयक्षोभाद्यस्य कोपाग्निरौर्ववत् ।
अनिर्वृति[3] प्रजज्वाल चतुरम्भोधि-वारितः ॥ [9]

17. येभूवन् पृथुरामराघवनलप्राया धरित्रीभुज-
स्तानेकत्र दिदृक्षुणेव निचितान् सर्वान् समस्वेधसा[4] ।
श्व-

18. स्ताशेषनरेन्द्रमानमहिमा श्रीधर्म्मपालः कलौ
लोलश्रीकरिणीनिव (ब) न्धन महास्तम्भः समुत्तम्भितः ॥ [10]
यासां

19. नासरिधूलीधवलदशदिशां द्रागपश्यन्नियत्तां
धत्ते मान्धातृसैन्यव्यतिकरचकितो ध्यानतन्द्रीम्महेन्द्रः ।

20. तासामप्याहवेच्छापुलकितवपुषाम्वाहिनीनांविधातुं[5]
साहाय्यं यस्य वा (बा) ह्वोर्निखिलरिपुकुलध्वंसिनोर्ना-

---

1. The original seems to have been-पतीनां. 2. Kielhorn. यान्त्या वि-
3. Kielhorn. अनिवृत्ति. 4. Ibid. समवेधसा.
5 Ibid. वपषा वाहिनीना विधातुं.

21. वकाशः ॥ [11]
भोजैर्मत्स्यैः समद्रैः कुरुयदुयवनावन्ति गन्धारकीरै-
र्भूपैर्च्यालोलमौलिप्रणति परिणतैः
22. साधु सङ्गीर्यमाणः ।
हृष्यत्पञ्चालवृद्धोद्धृतकनकमयस्वाभिषेकोदकुम्भो
दत्तः श्रीकन्यकुब्ज (ब्ज) स्सललितच-
23. लितभ्रूलतालक्ष्म येन ॥ [12]
गोपैः सीम्नि वनेचरैर्वनभुवि ग्रामोपकण्ठे जनैः
क्रीडद्भि [:] प्रतिचत्वरं शिशुगणैः
24. प्रत्यापण [म्] मानपैः ।
लीलावेश्मनि पञ्जरोदरशुकैरुद्गीतमात्मस्तवं
यस्याकर्ण्यतस्रपाविवलितानम्रं स-
25. दैवाननम् ॥ [१३]
स खलु भागीरथीपथ प्रवर्त्तमाननानाविध नौवाटकसम्पादित-
सेतुव (ब) न्धनिहितशैलशि-
26. खरश्रेणि विभ्रमात्[1] निरतिशयघनघनाघनघटाश्यामायमान-
वासरलक्ष्मीसमारब्ध (ब्ध) सन्ततजलदस-
27. मयसन्देहात्[2] उदीचीनानेकनरपतिप्राभृतीकृताप्रमेयहयवाहिनीखरखुरो-
त्खातधूलीधूसरितदि-
28. गन्तरालात् परमेश्वरसेवासमायातसमस्तजम्बू (म्बू) द्वीप-
भूपालानन्तपादातभरनमदवनेः पाटलिपु-
29. त्रसमावासितश्रीमज्जयस्कन्धावारात् परमसौगतो महाराजाधिराज-
गोपालदेवपादानुध्यातः प-
30. रमेश्वरः परमभट्टारको महाराजाधिराजः श्रीमान् धर्म्मपालदेवः कुशली ॥
श्रीपुण्ड्रवर्द्धनभु-
31. क्त्यन्तःपातिन्याघ्रतटीमण्डलसम्ब (म्ब) द्ध-
महन्ताम्रताशविश (ष) ये कौञ्जश्वभ्रनामग्रामोऽस्य च सीमा[3] पश्चि-
32. मेन गङ्गिनिका । उत्तरेण कादम्ब (म्ब) री देवकुलिका खर्ज्जूरवृक्षश्च ।
पूर्वोत्तरेण राजपुत्रदेवटकृतालिः । वी-
33. जपूरकङ्कत्वा प्रविष्टा । पूर्व्वेण विटकालिः खाटकयानिका [˙] गत्वा
प्रविष्टा । जम्बू (म्बू) यानिकामाक्रम्य जम्बू (म्बू) यानक [˙]

Second Side.

34. गता । ततो निसृत्य[4] पुण्याराम वि (बि) ल्वार्द्धश्रो (स्रो) तिका
[˙] । ततोपि निसृत्य[5] न-

---

1. Kielhorn. विभ्रमान्. 2. Ibid. सन्देहादु-
3. Originally सीमो was engraved.
4. Kielhorn-निःसृत्य. 5. Ibid. निःसृत्य.

35. लचर्म्म [टो] त्तरान्तं गता नल [च] र्म्मटात् दक्षिणेन
नामुण्डिकापि [हे]-
36. [सदूम्मि] कायाः । खण्डमुण्डमुखं खण्डमुखा वेदसवि (वि)-
ल्विका वेदवि (वि) ल्विकातो रोहितवाटिः पिण्डारविटिजोटिका सीमा
37. उ [क्त] ारजोटस्य दक्षिणान्तः[1] ग्रामवि (वि) ल्वस्य च दक्षिणान्तः[2] ।
देविकासीमा विटि । धर्म्मायोजोटिका । एवम्माढाशाम्मली नाम ग्रामः
38. [।] अस्य चोत्तरेण गङ्गिनिका सीमा ततः पूर्व्वेणार्द्धश्रो (स्रो)
तिकया आम्रयानकोलर्द्धयानिकङ्गतः त-
39. तोपि दक्षिणेन कालिकाश्वभ्रः । अतोपि निसृत्य श्रीफलि [भ] ष
[ु] कं यावत्पश्चिमेन ततोपि वि (वि) ल्वङ्गोर्द्धश्रो (स्रो) ति-
40. कया गङ्गिनिकां प्रविष्टा । पालितके सीमा दक्षिणेन काणाद्वीपिका ।
पूर्व्वेण कोण्ठिया स्रोतः [।] उत्तरेण
41. गङ्गिनिका । पश्चिमेन जेनन्दायिका । एतद्ग्रामसंपारीणपरकर्म्मकृद्वीपः[3] ।
स्थालीङ्कटविषय-
12. सम्व (म्ब) ङ्कान्नषण्डिकामण्डलान्तःपातिगोपिप्पलीग्रामस्य सीमाः ।
पूर्व्वेण[3] उद्ग्राममण्डलपश्चिमीमा । दक्षि
43. णेन जोलकः [।] पश्चिमेन वेसानिकाख्या खाटिका । उत्तरेणोद्ग्राम-
मण्डलसीमाव्यवस्थितो गोमार्गः । एषु च-
44. तुरुषु[4] ग्रामेषु सम्पगताद् सर्व्वानेव राजराजनकराजपुत्रराजामात्य-
सेनापतिविषयपतिभोगपतिषष्ठाधि-
45. कृत दण्डशक्तिदाण्डपाशिकचौरोद्धरणिकदौस्साधसाधनिकदूतखोलगमा-
गमिकाभित्वरमाण हस्त्यश्वगोमहिष्यजा-
46. विकाध्यक्ष न [ौ] काध्यक्षव (ब) लाध्यक्षतरिकशौल्किकगौल्मिक-
तदयुक्तकविनियुक्तकादिराजपादोपजीविनोन्यांश्राकीर्त्ति-
47. तान् चाटभटजातीयान्[5] यथाकालाध्यासिनो ज्येष्ठकायस्थमहामहत्तर-
दाशग्रामिकादिविषयव्यवहारिणः
48. सकरणान् पतिवासिनः क्षेत्रकरांश्च ब्रा (ब्रा) ह्मणाननापूर्व्वकं यथा-
र्हम्मानयति वो (बो) धयति समाज्ञापयति च । मतमस्तु
49. भवताम् [।] महासामन्ताधिपति श्रीनारायणवर्म्मणादूतकयुवराज-
श्रीत्रिभुवनपालमुखेन वयमेवम्विज्ञापिताः[6] यथा ऽस्मा-
50. भिर्म्मातापित्रोरात्मनश्च पुण्याभिवृद्धये शुभस्थल्यान् देवकुलङ्कारितत्त
(न्त) त्र प्रतिष्ठापितभगवन्न [ु] ज्ञनारायणभट्टारकाय तत्प्र-
51. तिपालकलाटद्विजदेवार्च्चकादिपादमूलसमेताय पूजोपस्थानादिकर्म्मणे
चतुरो ग्रामान् अत्रत्यदट्टिकातलपाटक-

---

1. Kielhorn दक्षिणान्त.
2. Ibid. कुद्वीपः.
3. Ibid. पूर्वेणोद्र-
4. Ibid-तुषु.
5. Kielhorn तांश्चाट-
6. Ibid. एवं विज्ञापिता.

52. समेतान्ददातु देव इति। ततोऽस्माभिस्तदीयविज्ञप्त्या एते[1] उपरि-
लिखितकाश्चत्वारो ग्रामास्तलपाटकहट्टिकासमेताः स्व–

53. सीमापर्यन्ताः सोद्देशाः सदशापचाराः[2] अकिञ्चित्प्रग्राह्याः परिहृतसर्व-
पीडाः[3] भूमिच्छिद्रन्यायेन चन्द्रार्कक्षितिसमकालं

54. तथैव प्रतिष्ठापिताः[4]। यतो भवद्भिस्सर्व्वैरेव भूमेर्हानफलगौरवादपहरणे
च महानरकपातादिभयरहानमिदमनुमो–

55. द्य परिपालनीयम्। प्रतिवासिभिः क्षेत्रकरैश्चाज्ञाश्रवणविधेयैर्भूत्वा समु-
चितकरपिण्डकादिसर्व्वप्रत्यायोपनयः कार्य

56. इति॥
व (ब)हुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः [।]
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्। (॥)
षष्टिम्वर्ष[5]सहस्राणि स्वर्गे मो–

57. दति भूमिदः [।]
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत्॥
स्वदत्ताम्परदत्ताम्वा[6] यो हरेत वसुन्धरा [म्] [।]
स विष्ठायांकृमिर्भूत्वा पितृ–

58. भिस्सह पच्यते॥
इति कमलदलाम्बु(म्बु)विन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितञ्च [।]
सकलमिदमुदाहृतञ्च बुध्वा न हि पुरु–

59. षैः परकीर्त्तयो विलोप्या [:]॥
तडित्तुल्या लक्ष्मी [र] तनुरपि च दीपानलसमा।
भवो दुःखैकान्तः परकृतिमकीर्त्ति [:] क्षपयताम् [।]
यशा–

60. न्स्यचन्द्रार्क [ं] नियतमवतामत्र च नृपाः
करिष्यन्ते वु (बु) द्ध्वा यदभिरुचितं किम्प्रवचनैः॥
अभिवर्द्धमानविजयराज्ये

61. सम्वत्[9] ३२ मार्गदिनानि १२॥

62. श्रीभोगटस्य पौत्रेण श्रीमत्सुभटसूनुना।
श्रीमता तातटेनेदं उत्कीर्ण्ण[10] गुणशालिना॥

---

1. Ibid.–त्यैत– 2. Ibid.–चारा. 3. Ibid. –पीडा
4. Ibid. Possibly it is an error for प्रतिपादिताः
5. Kielhorn षष्टिवर्ष– 6. Ibid–दत्तां वा. 7. Ibid बुद्ध्वा.
8. Ibid. यशांस्या– 9. Ibid. संवत्. 10. Ibid. –नेदमुत्की–

55. DEOPARA INSCRIPTION OF VIJAYASEN

Prov. : Deopara, Rajshahi, District Bengal.
Date. : The last quarter of the 11 th century A. D.
Lang. : Sanskrit. **Script.** : Nāgari.
Ref. : C. T. Metcalfe. J. A. S B. Vol XXX VI. P. & L. pp. 128 ff. 128 Kielhorn, *Ep. Ind.* Vol. I pp. 305 ff.

Text

1. ओं[1] [॥ ×] ओँ नमः शिवाय ॥
वक्षोंशुकाहरणसाध्वसकृष्टमौलि-
माल्यच्छटाहतरतालयदीपभासः ।
देव्यास्त्रपामुकुलितं मुखमिन्दुभाभि-
र्व्वीक्ष्याननानि हसितानि जयन्ति शम्भोः ॥ [1]
लक्ष्मीवल्लभ-

2. शैलजादयितयोरद्वैतलीलागृहं
प्रद्युम्नेश्वरशब्द[2] (ब्द) लाञ्छनमधिष्ठानं नमस्कुर्म्महे ।
यन्नालिङ्गनभङ्गकातरत [या] स्थित्वान्तरे कान्तयो-
र्ईर्षीभ्यां कथमप्यभिन्नतनुताशिल्पेऽन्तरायः कृतः ॥ [2]
यस्सिंहासनमीश्वर-

3. स्य कनकप्रायं जटामण्डलं
गङ्गाशीकरमञ्जरीपरिकरैर्यच्चामरप्रक्रिया ।
श्वेतोत्फुल्लफणाञ्चलः शिवशिरःसन्दानदामोरग-
न्धुत्रं यस्य जयत्यसावचरमो राजा सुधादीधितिः ॥ [3]
वंशे तस्यामरस्त्रीवि-

4. ततरतकलासाक्षिणो दाक्षिणात्य-
क्षोणीन्द्रैर्व्वीरसेनप्रभृतिभिरभितः कीर्त्तिमद्भिर्व्व (र्ब) भूवे ।
यच्चारित्रानुचिन्तापरिचयशुचयः सूक्तिमाध्वीकधाराः
पाराशर्येण विश्वश्रवणपरिसरप्रीणनाय प्रणीताः ॥ [4
तस्मिन् से-

---

1. Expressed by a symbol.

2. प्रद्युम्नेश्वर clearly means a name of the god usually called हरिहर (विष्णु-शिव) who represents the devine personalities unified in one. See M. Monnier Williams, Brahmanism and Hinduism. P. 65.

5. नान्ववाये प्रतिसुभटशतोत्सादनव्र (व्र) ह्मवादी
स व्र (व्र) ह्मक्षत्रियाणामजनि कुलशिरोदाम सामन्तसेनः ।
उद्गीयन्ते यदीयाः स्खलदुदधिजलोल्लोलशीतेषु सेतोः
कच्छान्तेष्वप्सरोभिर्दशरथतनयस्पर्द्धया युद्धगाथा

6. : ॥ [5]
यस्मिन् सङ्गरचत्वरे पटुरटत्तूर्योपहूतद्विष-
द्वर्गे येन कृपाणकालभुजगः खेलायितः पाणिना
द्वैधीभूतविपक्षकुञ्जरघटाविश्लिष्टकुम्भस्थली-
मुक्तास्थूलवराटिकापरिकरैर्व्व्याप्या-

7. सं तदद्याप्यभूत् ॥ [6]
गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् ।
गिरेर्गिरिमधिश्रितन्तरति तोयधिन्तोयधे-
र्यदीयमरिसुन्दरीसरकपृष्ठलग्नं यशः ॥ [7]
दुर्व्वृत्तानामयमरि-

8. कुलाकीर्ण्णकर्ण्णाटलक्ष्मी-
लुण्टाकानां कदनमदतनोत्तादृगेकाङ्गवीरः ।
यस्मादद्याप्यविहतवसामान्समेदः[1] सुभिक्षां
हृष्यत् पौरस्त्यजति न दिशं दक्षिणां प्रे[2] [त] भर्त्ता ॥ [8]
उद्गन्धीन्याज्यधूमैर्म्मृगशिशुरसिताखिन्न-

9. वैखानसस्त्री-
स्तन्यक्षीराणि कीरप्रकरपरिचितव्र (व्र) ह्मपारायणानि ।
येनासेव्यन्त शेषे वयसि भवभयास्कन्दिभिर्म्मस्करीन्द्रैः
पूर्णोत्सङ्गानि गङ्गापुलिनपरिसरारण्यपुण्याश्रमाणि ॥ [9]
अचरमपरमात्मज्ञानभी-

10. ष्मादमुष्माद्भिजभुजमदमत्तारातिमाराङ्गवीरः ।
अभवदनवसानोन्निद्रनिर्ण्णिक्तसद्गुणनिवहमहिम्नां
वेश्म हेमन्तसेनः ॥ [10]
मूर्द्धन्यर्द्धेन्दुचूडामणिचरणरजः सत्यवाक्कण्ठभित्तौ
शास्त्रं श्रोत्रेरि-

11. केशाः पदभुवि भुजयोः क्रूरमौर्व्वीकिणाङ्कः ।
नेपथ्यं यस्य जज्ञे सततमियदिदं रत्नपुष्पाणि हारा-
स्ताडङ्कं नूपुरत्वक्कनकवलयमप्यस्य भृत्याङ्गनानाम् ॥ [11]
यद्दोर्व्वह्निविलासलब्ध (ब्ध) गतिभिः शल्यैर्व्विदीर्णोरसां

12. वीराणां रण [ती] र्थे वैभववशादिव्यं वपुर्व्वि (र्ब्बि) भ्रताम् ।

---

1. Kielhorn-मांस- 2. यम, The protector of the Southern quarter.

संसक्तामरकामिनीस्तनतटीकाश्मीरपत्त्राङ्कितं
वक्षः प्रागिव मुग्धसिद्धमिथुनैः सातङ्कमालोकितम् ॥ [12]
प्रत्यर्थिव्ययकेलिकर्म्मणि पुरः स्मेरं मुखं वि (बि) भ्रतो-
रे-

13. तस्यैतदसेश्च कौशलमभूद्दाने द्वयोरद्भुतम् ।
शत्रोः कोपि दधे ऽवसादमपरः सख्युः प्रसादं व्यधा-
देको हारमुपाजहार सुहृदामन्यः प्रहारं द्विषाम् ॥ [13]
महाराज्ञी यस्य स्वपरनिखिलान्तः पुरवधू-

14. शिरोरत्नश्रेणीकिरणसरणिस्मेरचरणा ।
निधिः कान्ते [:] साध्वीव्रतविततनित्योज्ज्वलयशा
यशोदेवी नाम त्रिभुवनमनोज्ञाकृतिरभूत् ॥ [14]
ततस्त्रिजगदीश्वरात्समजनिष्ट देव्यास्ततो-
प्यरातिव (ब) लशातनोज्ज्व-

15. लकुमारकेलिक्रमः ।
चतुर्ज्जलधिमेखलावलयसीमविश्वम्भरा-
विशिष्टजयसान्वयो विजयसेनपृथ्वीपतिः ॥ [15]
गणयतु गणशः को भूपतींस्ताननेन
प्रतिदिनरणभाजा ये जिता वा हता वा ।
इह जगति विषे-

16. हे स्वस्य वंशस्य पूर्वः
पुरुष इति सुधांशौ केवलं राजशब्द (ब्द) : ॥ [16]
सख्यातीतकपीन्द्रसैन्यविभुना तस्यारिजेतुस्तुलां
किं रामेण वदाम पाण्डवचमूनाथेन पार्थेन वा ।
हतोः खड्गलतावतंसितभुजामात्रस्य येनार्ज्जितं
सप्ता-

17. म्भोधितटीपिनद्धवसुधाचक्रैकराज्यं फलम् ॥ [17]
एकैकेन गुणेन यैः परिणतं तेषां विवेकादृते
कश्चिद्धन्यपरश्च रक्षति सृजत्यन्यश्च कृत्स्नं जगत् ।
देवोयं तु गुणैः कृतो व (ब)हुतिथैर्द्धीमान् जघान[1] द्विषो
वृत्तस्थानपुषच्चकार च

18. रिपूच्छेदेन दिव्याः प्रजाः ॥ [18]
दत्त्वा दिव्यभुवः प्रतिक्षितिभृतामुर्व्वीमुरीकुर्व्वता
वीरासृग्लिपिलाञ्छितो ऽसिरमुना प्रागेव पत्त्रीकृतः ।
नेत्थं चेत् कथमन्यथा[2] वसुमती भोगे विवादोन्मुखी
तत्राकृष्टकृपाणधारिणि गता भ-

1. Kielhorn, -माजघान.

2. The original had कथमंन्यथा, but the sign for अनुस्वार is struk out.

19. क्ष्मं द्विषां सन्ततिः ॥ [19]
स्वं नान्यवीर[1]विजयीति गिरः कवीनां
श्रुत्वा ऽन्यथामननरूढनिगूढरोषः ।
गौडेन्द्रमद्रवदपाकृत कामरूप-
भूपं कलिङ्गमपि यस्तरसा जिगाय ॥ [20]
शूरंमन्य इवासि नान्य किमिह स्वं राघव श्लाघसे
स्प-

20. द्धौ वर्द्धन मुञ्च वीर विरतो नाद्यापि दर्प्पस्तव ।
इत्यन्योन्यमहर्न्निशप्रणयिभिः कोलाहलैः क्ष्माभुजां
यत्कारागृहयामिकैर्न्नियमितो निद्रापनोदक्षमः ॥ [21]
पाश्चात्यचक्रजयकेलिषु यस्य याव-
द्वल्गाप्रवाहमनुधावति

21. नौवितानेः ।
भग्नस्य मौलिसरिदम्भसि भस्मपङ्क-
लग्नोज्झितेव तरिरिन्दुकला चकास्ति ॥ [22]
मुक्ताः कर्प्पासवीजैर्म्मरकतशकलं शाकपत्त्रैरलाबू (बू)-
पुष्पै रूप्याणि रत्नं परिणतिभिदुरैः कुक्षिभिर्द्दाडिमानाम् ।
कुष्माण्डीवल्लरीणां वि-

22. कसितकुसुमैः काञ्चनं नागरीभिः
शिक्षयन्ते यत्प्रसादाद्ध (द्ध) हुविभवजुषां योषितः श्रोत्रियाणाम् ॥ [23]
अश्रान्तविश्राणितयज्ञयूपस्तम्भावलीं द्रागवलम्ब (म्ब) मानः ।
यस्यानुभावाद्भुवि सञ्चचार कालक्रमादेकपदोपि धर्म्मः ॥ [42]
मेरोरा-

23. हतवैरिसङ्कुलतटादाहूय यज्वामरान्
व्यत्यासं पुरवासिनामकृत यः स्वर्ग्गस्य मर्त्यस्य च ।
उत्तुङ्गैः सुरसह्यभिश्च विततैस्तल्पैश्च शेषीकृतं
चक्रे येन परस्परस्य च समं द्यावापृथिव्योर्व्वपुः ॥ [25]
दिक्शाखामूलकाण्डं गगनतलम-

24. हाम्भोधिमध्यान्तरीयं
भानोः प्राक्प्रत्यगद्रिस्थितिमिलदुदयास्तस्य मध्याह्नशैलम् ।
आलम्ब (म्ब) स्तम्भमेकं त्रिभुवनभवनस्यैकशेषं गिरीणां
स प्रद्युम्नेश्वरस्य व्यधित वसुमतीवासवः सौधमुच्चैः ॥ [26]
प्रासादंन तवामुनैव हरितामध्वा-

25. निरुद्धो मुधा
भानोद्यापि कृतोस्ति दक्षिणदिशः कोणान्तवासी मुनिः ।

---

1. नान्य and वीर were obviously proper names. See Ep. Ind. I. P. 313 note. 57 for the identification See J. B. O. R. S. 1932. P.

अन्यामुच्छ्रपथोयमृच्छतु दिशं विन्ध्योप्यसौ वर्द्धतां[1]
यावच्छक्ति तथापि नास्य पदवीं सौधस्य गाहिष्यते ॥ [27]
स्रष्टा यदि स्रक्ष्यति भूमिचक्रे सुमेरुभृत्पिण्डविध-

26. र्त्तनाभिः ।
तदा घटः स्यादुपमानमस्मिन् सुवर्ण्णकुम्भस्य तदर्पितस्य ॥ [28]
वि (वि) लेशयविलासिनीमुकुटकोटिरत्नाङ्कुर-
स्फुरत्किरणमञ्जरीच्छुरितवारिपूरं पुरः ।
चखान पुरवैरिणः स जलमग्न-

27. पौराङ्गना-
स्तनैणमदसौरभोच्चलितचञ्चरीकं सरः ॥ [29]
उच्चिन्नाणि दिगम्ब (म्ब) रस्य वसनान्यर्द्धाङ्गनास्वामिनो
रत्नालंकृतिभिर्व्विशेषितवपुःशोभा शतं सुभ्रुवः ।
पौराण्याश्च पुरीः श्मशानवसतेर्भिक्षाभु-

28. जोस्याक्षयां
लक्ष्मीं स व्यतनोद्दरिद्रभरणे सुज्ञो हि सेनान्वयः ॥ [30]
चित्रक्षौमेभचर्म्मा हृदयविनिहितस्थलहारोरगेन्द्रः
श्रीखण्डक्षोदभस्मा करमिलितमहानीलरत्नाक्षमालः ।
वेषस्तेनास्य तेने गरुडमणिलतागोन-

29. सः कातमुक्ता-
नेपथ्यन्नस्थिरिच्छासमुचितरचनः कल्पकापालिकस्य ॥ [31]
वा (बा) होः केलिभिरद्विनीयकनकच्छत्रं धरित्रीतलं
कुर्व्वाणेन न पर्यशेषि किमपि स्वेनैव तेनेहितम् ।
किन्तस्मै दिशतु प्रसन्नवरदोप्यर्द्धेन्दुमौलिः

30. परं
स्वं सायुज्यमसावपश्चिमदशाशेषे पुनर्ह्यास्यति ॥ [23]
प्रस्तोतुमस्य परितश्चरितं क्षमः स्यात्
प्राचेतसो[2] यदि पराशरनन्दनो[3] वा ।
तत्कीर्त्तिपूरसुरसिन्धुविगाहनेन
वाचः पवित्रयितुमत्र तु नः प्रयत्नः ॥ [33]
यावद्वास्तोस्पति-

---

1. The allusion is to the story of Vindhya's gradual rise in order to check the daily course of the sun. See. Supra p. 204. note. I., also See S. P. Pandits note on Raghuvaṁśa VI. 61, cf Mahābharata Vanaparva Chapter 104.

2. प्राचेतस=Son fo प्रचेतस ie. वाल्मीकि 3. पराशरनन्दन = व्यास.

31. पुरधनी भूर्भुवः स्वः पुनीते
यावच्चान्द्री कलयति कलोत्संसतां भूतभर्तुः।
यावच्चेतो गमयति सतां श्वेतिमानं त्रिवेदी
तावत्तासां रचयतु सखी तत्तदेवास्य कीर्त्तिः ॥ [34]
निर्ण्णिक्तसेन कुलभूपतिमौक्तिकाना
मग्रन्थिलग्र-

32. थनपक्ष्मलसूत्रवल्लिः।
एषा कवेः पदपदार्थविचारशुद्ध-
वु (बु) द्धेरुमापतिधरस्य कृतिः प्रशस्तिः ॥ [35]
ध [र्म्म] प्रणप्ता मनदासनप्ता वृ (बृ) हस्पतेः सूनुरिमां प्रशस्तिं [।]
चखान वारेन्द्रकशिल्पिगोष्ठीचूडामणी राणकशूलपाणिः ॥ [36]

56. NIDHANPUR COPPERPLATES OF BHASKARAVARMAN.

Prov. : Nidhanpur in Panchkhanda, Sylhet. Assam.
Date. : Seventh Century A. D.
Lang. : Sanskrit. **Script.** : Northern Brāhmi.
Ref. : Padmanāth Bhattacharya Vidyavinoda.
Ep. Ind. Vol. X, II. pp. 65–79.

Text

First Plate

1. [ओं]
प्रणम्य देवं शशिशेखरप्रियं
पिनाकिन [ं] भस्मकणैर्विभूषित [ं] [।]
विभूतये भूतिम [तां द्विज]-

2. म्मनां
करोमि भूय स्फुटवाचमु [उ] ज्वलां ॥ [1]
स्वस्ति महा-नौ-हस्त्यस्व[1]पत्तिसंपत्युपातजयशब्दान्व-

3. र्थं स्कन्धावारात् कर्ण्ण[2]सुवर्ण्णवहासकात् ॥

---

1. P. Bhattācharya–अश्वपति संपत्युपात्त जय शब्द–

2. Karṇa suvarṇa was once the capital of Śaśāṅka. Jayanāga an inhabitant of Karṇasuvarṇaka, while he was here, issued a grant which is supposed to be dated in the latter half of the sixth century A. D.

भोगीम्बरकृतपरिकरमीक्षणजितकामरूपम-

4. विमुक्तं [।]

परमेश्वरस्य रूपं निजभूतिविभूषितं जयति ॥ [2]

जयति जगदेकबन्धु[1]र्लोकहित-

5. यस्य सम्पदो हेतु [:] [।]

परहितमूर्त्तिरदृष्टः फलानुमेयस्थिति ['] धर्म्म [:] ॥ [3]

धात्रीमुच्चिक्षिप्यो-

6. रम्बुनिधे[2] कपटकोलरूपस्य [।]

चक्रभृत [:] सूनुरभूत् पार्थिववृन्दारको नरक [:] ॥ [4]

7. तस्माददृष्टनरकाम्बरकादजनिष्ट नृपतिरिन्द्रसखः [।]

भगदत्तः ख्यातजयं विजय [']

8. युधि यः समाह्वयत ॥ [5]

तस्यात्मज [:] क्षतारेर्वज्रगतिर्वज्रदत्तनामाभूत् [।]

शतम-

9. खमखण्डबल[3]गतिरतोषयद्यः सदा संख्ये ॥ [6]

वंश्येषु तस्य नृपतिषु वर्षसह-

10. स्रत्रयं पदमवाप्य [।]

यातेषु देवभूयं क्षितीश्वर [:] पुण्यवर्म्माभूत् ॥ [7]

मात्स्य [य] न्याय[4]-

11. विरहित [:] प्रकाशरत्न [:] सुतो द्वरथ[5] लघु [:] [।]

पद्मम इव हि समुद्र [:] समुद्रवर्म्माभवत् तस्य [॥ 8]

12. अविखण्डितबलवर्म्मा बलवर्म्मा[6] तस्य सूनु रजनिष्ट [।]

क्षितिपस्य दत्तदेव्या ['] सेना य-

13 स्याभ्यमित्रीया ॥ [9]

(E. I. XVIII P. 63). This finds mention also in Rohtāsagadh stone seal matrix of Mahāsāmanta Śaśānkadeva (Fleet. Gupta Inscriptions P.) For detailed geographical description see. B. C. Law. Historical geography of Ancient India P. 225 and how it came under the sway of Bhāskarvarman (see Ep. Ind. XII P. 65 into.)

1. P. Ibid -क्ष्विप्सोरम्बुनिधेः.
2. An allusion to Boar incarnation of Vishnu.
3. P. Bhaṭṭacharya-बल-
4. मात्स्यन्याय in the technical sense means disorders of anarchy when the strong oppress the weak as the large fishes eat the small ones. Here it has another meaning also, i. e. 'excesses'.
5. P. Bhaṭṭacharya. द्वैरथ- 6. Ibid.-बलवर्म्माबल-

तस्यापि रत्नवत्या ['] नृपतिः कल्याणवर्म्मनामाभूत् [।]
तनयस्तनीयसा–

14. मपि यो दोषाणामनावासः ॥ [10]
गन्धर्ववती तस्माद्गणपतिमिव दानवर्षणमजस्रं [।]

15. गणपतिमगणितगुणगणमसूत कलिहानये तनयं ॥ [11]
तन्महिषी यज्ञवती

Second Plate, First Side.

16. यज्ञवतीवारणि [:] सुतम् असूत [।]
यज्ञविधीनामास्पदमनलमिव महेन्द्रवर्म्माणं ॥ [12]
तस्मा [द]–

17. जनयदात्मजमात्मविदः सुव्रता भुव स्थितये [।]
नारायणवर्म्माणं जनकमिवाधिगतसांख्यार्थं[1] ॥ [13]

18. प्रकृतिरिव तस्य पुंसो देववती स्थिरगुणानुबन्धाय[2] [।]
षष्ठमिव महा[3]भूतंन्दधौ[4] महा–

19. भूतवर्म्माणं ॥ [14]
चन्द्रमुखस्तस्य सुतश्चन्द्र[5] इव कलाकलापरमणीयः [।]
विज्ञानव–

20. ती द्यौरिव यं सुषुवे ध्वान्तशान्तिकरं ॥ [15]
भोगवती भोगवती भूतेः स्थितवर्म्मण [स्]–

21. ततो हेतुः [।]
आसीन्नागपतेरिव भूमिभृतोनन्तभोगस्य ॥ [16]
तस्मदगाध–

22. मुर्त्ते[6]रकलितरत्नादुपोढलक्ष्मीकात् [।]
क्षि[7]रोदधेरिव नृपादकलङ्क [:]

---

1. The word 'सांख्य' is explained by श्रीधर स्वामी in his commentary on Bhagavadgītā V. 39 as follows—सम्यक् ख्यायते प्रकाश्यते वस्तुस्त्व अनयेति सख्या सम्यग्ज्ञानम्, तस्यां प्रकाश्यमानमात्मतत्त्व सांख्यम् । It seems that the Sānkhya system of philosophy is intended, for we find just immediately the reference to the progeny of the Pancha Mahābhūtas from the Prakriti and the king is likened to the sixth Mahābhūta.
2. P. Bhattachārya–बन्धाय–
3. According to the Sānkhya system of philosophy there are five महाभूत s namely, the पृथ्वी, अप्, तेजस्, वायु and the आकाश
4. P. Bhattachārya–भूतं दधौ
5. It has been corrected from चन्द्राश्च
6. P. Bhattachrya मूर्त्ते–
7. Read. क्षी

23. श्रीमृगाङ्कोभूत् ॥ [17]
उदपादि नयनदेव्या ['] सुनुस्तस्य[1] स्ववाहुधृत-
24. राज्यः [।]
देव [:] सुस्थितवर्म्मा यः ख्यातः श्रीमृगाङ्क इति ॥ [18]
प्रत्युरसं विलसन्ती [']
25. तद्धन इव या ['] मुदा हरिर्वहति [।]
सा श्रीरर्थिजनेभ्यः क्षितिरिव विश्राणिता येन ॥ [19]
26. कार्त्तयुगीव श्यामादेवी तस्मादजीजन [त्] तनयं [।]
शशिनमिव सुप्रतिष्ठित-
27. वर्म्माणमपास्तये त [म] सां [20]
यस्योन्नत्ति[3] परार्था विद्याधरचक्रवर्त्तिसेव्यस्य [।]
सग-
28. जस्य सुप्रतिष्ठितकटकस्य कुलाचलस्यैव[4] ॥ [21]
सैव श्यामादेवी तस्यानुजम-
29. कलितोदयमसूत [।]
श्रीभास्करवर्म्माणं भास्करमिव तेजसां निलयं [॥] [22]

Second Plate, Second Side.

30. एकोपि हि यः पु ['] सां हृदयेष्वभिलक्षित [:] [स्वभावेन] [।]
शुद्धेषु दर्पण [`] ष्विव वहु[5] सुप-
31. मं सन्मुखीनेषु[6] ॥ [23]
यस्यावें (वि) हतमतनुभिस्तेजोभिर्लक्ष्म नृपतिभवनेषु [।]
उद-
32. पात्रेष्विव[7] भूरिषु विलोक्यते भाकरस्येव ॥ [24]
अव्यालः स्वारोह [:] कल्पद्रुम-
33. वत्समृद्धिभूरिफल [:] [।]
च्छायापाश्रित[8]जनतापरिवेष्टितपादमूलो यः [॥] [25]
34. इत्यपि स जगदुदुय[9] कल्पनास्तमयहेतुना भगवता कमल-
सम्भवेना-
35. विकीर्णवर्णाश्रमधर्म्मप्रविभागाय निर्म्मितो भुवनपतिरिवोदयानुरक्त-
मृ (म) ण्ड-
36. लो यथायथमुचितकरनिक [र] वितरणाकुलितकलितिमर[10]सञ्चय-
37. तय [ा] प्रकाशितार्यधर्म्मालोक [:] स्वभुजवल[11]तुलितसकलसाम-

---

1. Ibid सूनुस् 2. Ibid.-वाहु.
3. P. Bhatttachārya-नतिः 4. Ibid.-स्येव
5. Ibid. वहु 6. Ibid. सम्मुखी- 7. Ibid.-पात्रेष्वि-
8. P. Bhattachārya. छायोपाश्रित- 9. Ibid-दुदय-
10. Ibid-तेमिर- 11. Ibid.-वल-

38. न्तचक्रविक्रम स्थितिविनयं[1] संस्तवोपचितभक्तिषु प्रकृतिषु
परंपारीणासु
39. निकाममुपकल्प[2]तानेकभोगीनवर्त्मा[3] समरविजितनरपतिशतवहित[4]
40. विविधनुतिवचनकुसुमरचत[5]रुचिरकीर्त्तिचित्रा[6]वतङ्सङ्कः शिविरिव[7]
परो-
41. पकारविश्राणनाभिरतसत्ववृत्तिर्यथासमयमुदितगुण[8]विधिविभाग-
42. मम्बन्ध[9]पट्टनया सुरगुरुरिवापरे[10] परैरवहितप्रभाव[:] श्रुत[11]शौर्यधैर्य-
43. शौटीर्यसुचरितैरलङ्कृतात्मवृत्तिः प्रतिपक्षसंश्रयनिराकृतैरिव विव-
44. र्जितो दोषैरचलितनिरन्तरप्रणयरसभराकृष्ट कामरुपलक्ष्मी[12]स्समा
45 पश्चिमेन गङ्गणिका[13]डुम्बरीच्छेदसम्वेद्या[14] ॥ पश्चिमेनाधुना सीमगङ्गिणिका॥
पश्चि [मो]-
46. त्तरेण कुम्भकारगर्त्तस्सैव च गङ्गणिका प्राग्भुज्यमानोत्तरेण वृहज्जाटली[15] ॥
उत्तरपू-
47. र्वेण व्यवहारिखासोकपुष्करिणी[16] सैव शुष्ककौशिका[17]चेति॥ आज्ञाशता
प्रापयिता
48. प्राप्तपञ्चमहाशब्द[18] श्रीगोपाल [:] । सीमाप्रदाता चन्द्रपुरिनायक [:]
श्रीक्षिकुण्डः
49. न्यायकरणिक जनार्दनस्वामी व्यवहारिहरदत्तकायस्थदुन्धुनाथप्रभृतय:[19]
50. शासइता[20] लेखयिता च वसुवर्ण्णभाण्डागाराधिकृतमहासामन्त
दिवाकरप्रभ [:]
51. उत्खेटयिता दत्तकारपुर्ण्णो[21] । सेक्यकार कालिया ।
षष्टिम्बर्षसहस्र[22]-
52. णि स्वर्गे मोदति भूमिदः [।]

---

1. Ibid.-विनय- 2. Ibid-लिपिता- 3. Ibid-वर्त्मा-
4. Ibid.-विहित- 5. Ibid-रचित- 6. Ibid-चित्रावतंसांकः
7. Śivi, the famous King widely known for his charity, was the son of Uśīnara, for his story (see. Mahabhārata III. 196 ff.)
8. गुण here denotes the six expedients of politics, namely, संधिविग्रह etc
9. P. Bhttachārya. -सम्बन्ध 10. Ibid.-वापरः- 11. Ibid श्रुत-
12. According to Ashtādhyāyī V. IV. 151. the suffix 'Ka' should be added to लक्ष्मी, if it is intended to be singular number. Mr. Bhattachārya is doubtful whether the rule be urged (see. Ep. Ind. XII p. 78. No. 4.)
13. P. Bhattachārya-गंगिनिकोडुम्बरी- 14. Ibid. सवेद्या.
15. Ibid वृहज्- 16. Ibid. पुष्करिणी.
17. Ibid perhaps- कौशिका is intended. 18. Ibid.-शब्दः
19. Ibid-भृतयः 20. Ibid. शासयिता 21. Ibid.-पूर्णः
22. Ibid. षष्टि वर्षसहस्राणि. It should be correctly read as षष्टि वर्षसहस्राणि.

आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् [११] [26]

53. स्वदत्तां परदत्ताम्वा[1] यो हरेत् वसुन्धरां [।]
स विष्ठायां कृमिर्भूत्वा पितृभ[2] सह पच्यते [११] [27]

54. शासनदाहादवागभिनवलिखितानि भिन्नरूपाणि [।]
तेभ्यो अक्षराणि[3] यस्मा-

55. त्तस्मा [न्] नैतानि कूटानि ॥ [28]

57. AIHOLE INSCRIPTION OF PULAKEŚIN II

Prov. : Aihole, Bijapur District,
Date. : V. S. 556 (= 499 A. D.).
Lang. : Sanskrit **Script.** : Southern Brāhmī.
Ref. : Fleet. *Ind. Ant* Vol, V. P. 47 ff, Vol. VIII P. 23J ff Arch. Surv. W. India Vol. III P. 129, Kielhorn. *Ep. Ind.* Vol. VI. pp. 1–12.

Text

1. जयति भगवान्जि (ज्रि) नेन्द्रो [वी] तज [राम] रणजन्मनो यस्य [।]
ज्ञानसमुद्रान्तर्ग [त] मखिलजगदन्तरीपमिव । (॥) [1]
तदनु चिरमपरि [मे] यश्चलुक्य[4]कुलविपुलजलनिधिर्जयति ॥
पृथिवीमौलिललाम्नां य×प्रभव×पुरुषरत्नाम् ॥ [2]
शूरे विदुषि च विभजन्दानम्मानञ्च युगपदेकत्र ॥ (।)

2. अविहितयाथासं [ख्][5] य [ो] [ज] यति च सत्याश्रयस्सुचिरम् ॥ [3]

---

1. Ibid.–दत्ता वा. 2. Ibid. पितृभिः 3. Ibid. तेभ्योक्षराणि.

4. This word is variously spelt in the epigraphs. For spellings see Ind. Ant. 1919 p. 112. For the origin of the name Chālukya see Vikramānkadevacharita I, 31–56 and Ant. XII 196.

5. This refers to Pāṇinis Sūtra यथासख्यमनुदेशः (Ashtādhyāyi 1–3–10) meaning "correspondency of numbers" i. e. when things are mentioned in a particular order, they are to be again referred to in the same order. As रविकीर्ति here, so भारवि in the Kirātārjunīya XIII, 19 clearly refers to the immediately preceding rule of Ashtāthyāyi तस्यलोपः and Kālidāsa in his Raghuvaṁśa XII, 56. alludes to the rule स्थानि वदा देशोनल्विधौ (1–1–56). यथा सख्यम् is a figure of speech also defined by Dandin as Follows :

उद्दिष्टानां पदार्थानामुद्देशो यथाक्रमम् ।
यथा संख्यमिति प्रोक्त सख्यानां इत्यपि ॥ काव्यादर्श ११–२८३

पृथिवीवल्लभशब्दो येषामन्वर्थताञ्चिरञ्जातः[1] [।]
तद्वंशेषु जिगीषुषु तेषु बहुष्वप्यतीतेषु [4]
नाना हेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्र [ं] रणे ।

3. लक्ष्मीर्भावितचापलापि च कृता शौर्य्येण येनात्मसा–
श्रा (द्रा) जासीज्जयसिंह[2]वल्लभ इति ख्यातश्चलुक्यान्वयः ॥ [5]
तदात्मजोभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः [।]
अमानुषत्वं किल यस्य लोकाः[3]स्सुप्तस्य जानाति वपुरप्रकर्षात् [॥ 6]
तस्याभवत्तनूजः पोलेकेशि (शी) य [:] श्रितेन्दुकान्ति[4]रपि [।]

4. श्रीवल्लभोप्ययासीद्वातापिपुरी[5]वधूवरताम् ॥ [7]
यत्त्रिवर्ग्ग[6]पदवीमलं क्षितौ नानुगन्तुमधुनापि राजकम् [।]
भूश्च येन हयमेधयाजिना प्रापितावभृथमज्जना बभौ [॥ 8]
नलमौर्य्यकदम्बकालरात्रिः[7]स्तनयस्तस्य बभूम (व) कीर्त्तिवर्म्मा [।]
परदारनिवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्री–

5. यानुकृष्टा ॥ [9]
रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्न(ग्ण)मशेषतः [।]
नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम् [॥ 10]
तस्मिन्सुरेश्वरविभूतिगताभिलाषे
राजाभवत्तदनुजः किल मङ्गल [ं] शः [।]
यः पूर्व्वपश्चिमसमुद्रतटोषिताश्व–
सेनारजःपटविनिर्म्मितदिग्वितानः [॥ 11]
स्फुरन्मयूखैरसिदीपिकाशतैः (तै °)

6. व्युदस्य मातङ्ग तमिस्रसञ्चयम् [।]
अवाप्तवान्यो रणरङ्गमन्दिरे
कटच्छुरिश्रीललनापरिग्रहम् ॥ [12]
पुनरपि च जिघृक्षोस्सैन्यमाक्रान्तसालम्[8]
रुचिरबहुपताकं रेवतीद्वीपमाशु [।]
सपदि महदुदन्यत्तोयसंक्रान्तबिम्बम्[9]

---

1. Kielhorn चिरंयातः. 2. Ibid. सिंह 3. Ibid. लोकस
4. इन्दुकान्ति means "moon-like beauty" Some scholars take this word to mean the place where Pulakeśin migrated (Dubreuil. Anc. Deccan p. III).
5. It can be identified with modern Bādāmi in the Bijapur district. The place is said to have got its name as Agastya destroyed here the demon-brothers Vātāpi and Itvala (see Ind. Ant. VIII. p. 238).
6. त्रिवर्ग (धर्म, अर्थ and काम). 7. Read त्रिस्तनय°°°
8. Kielhorn. सालं 9. Ibid बिंबं

वर (रु) णबलमिवाभूदागतं यस्य वाचा ॥ [13]
तस्याग्रजस्य तनये नहुषानुभागे (वे)
लक्ष्म्या किलाभि[1]–
7. लषिते पोल [ं] केशिनाम्नि [।]
सासूयमात्मनि भवन्तमतऽपितृव्यम्
ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ [॥ 14]
स यदुपचित [म] न्त्रोत्साहशक्तिप्रयोग[2]–
क्षपितबलविशेषो मङ्गलेशस्समन्तात् [।]
स्वतनयगतराज्यारम्भयत्नेन सार्द्धं
निजमतनु च राज्यञ्जीवितञ्चोज्झति स्म ॥ [15]
तावत्तच्छ [र] त्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं
8. यस्यासह्यप्रतापद्युतिततिभिरिवाक्रान्तमासीत्प्रभातम् [।]
नृत्यद्विद्युत्पताकैरऽप्रजविनि मरुति क्षुण्णप [°] य्यान्तभागै–
र्गर्ज्जद्भिर्व्वारिवासै (है) रलिकुलमलिनं व्योम यातं कदा वा ॥ [16]
लब्ध [ध्व] । कालं भुवमुपगते जेतुमाप्तायिकाख्ये
गोविन्दे च द्विरदनिकरैरुत्तराम्भैमरथ्याः [।]
यस्यानीकैर्युधि भयरसज्ञात्वमेकऽप्रयात–
स्तत्रावाप्तम्फलमुपकृतस्या–
9. परेणापि सद्यः । (॥) [17]
वरदातुङ्गतरङ्गरङ्गविलसद्धंसावलीमेखलां
वनवासीमवमृद्नतस्सुरपुरप्रस्प [र्द्धि] र्द्धनीं सम्पदा [।]
महता यस्य बलार्ण्णवेन परितस्सञ्छादितोर्व्वीतलं ।
स्थलदुर्ग्गञ्जलदुर्ग्गतामिव गतं तत्तत्क्षणे पश्यताम् [॥ 18]
गङ्गालुपेन्द्रा व्यसनानि सप्त[3]
हित्वा पुरोपार्जितसम्पदोपि [।]
यस्यानुभावोपनतास्सदास–
न्ना–
10. सन्न सेवामृतपानशौण्डः[4] [॥ 19]

---

1. This suggests that he was preferred by the people to Mangleśa and his son (Fleet. Ind. Ant. 1899).
2. Regal power is under three elements प्रभुशक्ति, मंत्रशक्ति and उत्साह-शक्ति (powers of sovereign position, good counsil and energy). Scholars mean that Pulakeśin was devoid of प्रभुशक्ति and could only possess the other two.
3. The seven vices are as follows :
द्यूतं मांसं सुरा वेश्या खेटचौर्यं पराङ्गना ।
महापापानि सप्तैव व्यसनानि त्यजेद्बुधः ॥
4. Kielhorn शौन्डाः

कोङ्कणेषु यदादिष्ट चण्डदण्डाम्बुवीचिभिः [।]
उदस्तास्तरसा मौर्य्यपल्वलाम्बुसमृद्धयः । (॥) [20]
अपरजलधेर्ल्लक्ष्मी ['] यस्मिन्पुरीम्पुरभित्प्रभे[1]
मदगजघटाकारैर्ज्ञावां शतैरवमृद्नति [।]
जलदपटलानीकाकि (की) र्ण्णन्नवोत्पलमेचक-
अलनिधिरिव व्योम व्योम्नस्स-

11. मोभवदम्बुभिः (धिः) [॥ 21]
प्रतापापनता यस्य लाटमालवगूर्ज्जराः[2] [।]
दण्डोपनतसामन्तचर्य्या च [।] र्य्या इवाभवन् ॥ [22]
अपरिमितविभूतिस्फीतसामन्तसेना-
मुकुटमणिमयूखाक्रान्तपादारविन्दः [।]
युधि पतितगज (जे) न्द्रानीकवी (वी) भत्सभूतो
भयविगलितहर्षो येन चाकारि हर्षः ॥ [23]
भुवमुरुभिरनीकैश्शा-

12. सतो यस्य रेवो (वा)-
विविधपुलिनशोभावन्ध्य विन्ध्योपकण्ठ [:] [।]
अधिकतरमराजत्स्वेन तेजोमहिम्ना
शिखरिभिरिभवर्य्या (र्य्यो) व [८] र्मणां स्पर्द्धयेव[3] [॥ 24]
विधिवदुपचिताभिश्शक्तिभिश्शक्रकल्प-
स्तिसृभिरपि गुणौघैस्वैश्च माहाकुलाद्यैः[4] [।]
अगमदधिपतित्वं यो महाराष्ट्रकाणां

---

1. पुरभिद् literally means the destroyer of पुर i. e. Śiva and recalls his demolishing त्रिपुर. 'Destroyer of the cities' is also an epithet of Indra which recalls his exploits in the Veda (Rg. X–89–7) and his epithet पुरन्दर.

2. Later people of Lāta. Some scholars locate them in the Southern Gujrat including Khandesha, situated between the rivres Mahi and Tāpti. Buhler holds it as lying between the rivers Mahi nnd Kim. It comprised the collectcorates of Surat, Broach, Kheda and parts of Broach. (N. L. Dey. Geographical Dictionary गुर्जर– This was an early Gurjara family ruling in the Broach district. They were probably a branch of the Gurjaras of Mandor in Rajasthan (See. Proce. of First Orienteal. Conf. Vol. I P. OXXVII)

3. Dr. Keilhorn finds in this verse a reference to the story of Vindhya and Agastya.

4. According to Pāṇini (IV–I–141) महाकुल means a noble family but here used as an abstract noun.

नवनवतिसहस्रग्रामभाजां त्रयाणां [॥ 25]
गृहिणां स्व

13. स्वगुणैस्त्रिवर्ग्गतुङ्गा विहितान्यक्षितिपालमानभङ्गा [:] [।]
अभवन्नुपजातभीतिलिङ्गा यदनीकेन सको [स] लाः कलिङ्गा [: ॥ 26]
पिष्टं पिष्टपुरं येन जातं दुर्ग्गमदुर्ग्गम–
स्त्रिन्नं यस्य कलेर्वृत्तम् जातं दुर्ग्गमदुर्ग्गमम् । (॥) [27]
सन्नद्धवारणघटास्थगितान्तरालम्
नानायुधक्षतनरक्षतजाङ्गरागम् [।]
आसीज्जलं यदवमर्द्दितमभ्रगर्भं
कौनालम[1]–

14. म्बरमिवोा [ज] त सान्ध्यरागम् ॥ [28]
उद्भूतामलचाव (म) रध्वज शतच्छ [त्] त्रान्धकारैर्ब्व (र्ब्व) लैः
शौर्य्योत्साहरसोद्धतारिमथनैर्म्मौल (ला) दिभिष्षड्विधैः [।]
आक्रान्तात्मबलोन्नतिम्बलरजस्सञ्छन्न काञ्चीपुरः (र)
प्राकारान्तरितप्रतापमकरोद्यः पल्लवानाम्पतिम् ॥ [29]
कावेरी[2] हृतशफरीविलोलनेत्रा
चोलानां सपदि जयोद्यतस्य यस्य [।]
प्रश्च्योतन्मदगजसे–

15. तुरुद्धनीरा
संस्पर्शं परिहरति स्म रत्नराशेः (॥) [30]
चोलकेरल पाण्ड्यानाम्[3] योभूत्तत्र महर्द्धये [।]
पल्लवानीकनीहार तुहिनेतरदीधितिः ॥ [31]
उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समस्ता दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराद्धय देवद्विजान् [।]
वातापीन्नगरीम्प्रविश्य नगरीमेकामिवोर्व्वि (र्व्वीं) मिमाम्[4]
चक्रक्षीरधी (धि) नीलनीरपरिखां

16. सत्याश्रये शासति ॥ [32]

---

1. Kunāla lake which is identified with modern Kolleru lake, south of Pithapuram between the rivers Godāvari and Krishnā.

2. An important river of South India which flows through Mysore and Trichinopoly districts. Its name is said to be derived from the muni Kāvera whose daughter Kāveri was (See Ep. Ind. XI 339; also Bhandarkar Commemosation Volume P. 246). According to the Puranic tradition Kāveri is said to be born of Brahmā. Hindus regard it as Dakshinā Gangā.

3 Kielhorn पाण्ड्यानाम्. 4. Ibid, इमां.

त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः[1] [।]
सप्ताब्दशतयुक्तेषु श (ग) तेष्वब्देषु पञ्चसु [॥ 33]
पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च [।]
समासु समतीतासु शकानामपि भूभुजाम् ॥ [34]
तस्याम्बुधित्रयनिवारितशासनस्य

17. सत्याश्रयस्य परमाप्तवता प्रसादं [।]
शैलञ्जिनेन्द्रभवनम्भवनम्महिम्ना–
निर्म्मापितम्मतिमता रविकीर्त्तिनेदम् ॥ [35]
प्रशस्तेर्व्वसतेश्चास्याः[2] जिनस्य त्रिजगद्गुरो[3]–
× कर्त्ता कारयिता चापि रविकीर्त्ति × कृती स्वयम् ॥ [36]
येनायोजि नवेश्मस्थिरमर्त्थविधौ विवेकिना जिनवेश्म [।]
स विजयतां रविकीर्त्ति × कविता–

18. श्रितकालिदासभारविकीर्त्तिः । (॥) [37] ❀
मूलवल्लिवेल्मलितकवाड [म] ञनूर्ग्गङ्गवूर्पुलिगेरे–
गण्डवग्राम (मा) इति अस्य भुक्ति [: ।] गिरि (रे) [स्त]–
टात्पश्चिम [।] भिगत निमूवारिर्य्याव [त्] महापथान्तपुरस्य
सि (सी) मा उत्तरतः दक्षिणतो

19. .....ग .. ..न ❀

58. SANJAN COPPER PLATES OF AMOGHAVARSHA I

Prov. : Sanjān, Thāna district, Bombay.
Date. : Śaka samvat 793 (= 871 A. D.).
Lang. : Sanskrit. **Script.**: Brāhmī.
Ref. : D.R. Bhandarkar, *Ep. Ind.* Vol. XVIII. pp. 235–257.

---

1. The era of Bharata war. This is the same as Kaliyuga era, also known as Yudhisthira era (South Indian Inscription No. 1317). Sometimes it was used in the inscriptions (See. Ind. Ant. XIV. 290), known to have begun in 3102 B. C. on February 18. The poet hints at this era in the following lines by the expression कलौ काले.
2. Kielhorn : स्था. 3. Ibid–गुरोः.

Text

First Plate

1. ओं[1] [॥] स वो व्याद्वेधसा धाम यन्नाभिकमलं कृतं।
हरश्च यस्य कान्तेन्दुकलया कमलं कृतं ॥ [1]
अनन्तभोगस्थितिरत्र पातु वः
प्रतापशीलप्रभवोदयाचलः [।]

2. शुण्ट्र[2]कूटोच्छ्रितवंशपूर्व्वजः
स वीरनारायण एव यो विभुः । [2]
तदीय वीर्य्यायतयादवान्वये
क्रमेण वार्द्धाविव रत्नसंचयः [।]
वभूव[3] गोविन्द महीप्रतिर्भुवः[4]

3. प्रसाधनो[5] पृच्छकराजनः[6] ॥ [3]
वभार[7] यः कौस्तुभरत्नविस्फुर-
द्बृभस्तिविस्तीर्णमुरस्थलं ततः [।]
प्रभातभानुप्रभवप्रभाततं
हिरण्मयं मेरुरिवाभितस्तटं ॥ [4]
मनांसि

4. यत्रासमयानि[8] सन्ततं
वचांसि यत्कीर्त्तिविकीर्त्तनान्यपि ।
शिरांसि यत्पादनतानि वैरिणां
यशांसि यत्तेजसि नेशुरन्यतः ॥ [5]
धनुस्समुत्सारितभूभृता मही
प्रसारिता

5. येन पृथु प्रभाविना ।
महौजसा वैरितमो निराकृतं
प्रतापशीलेन स कर्क्करा[ट्] प्रभुः ॥ [6]
इन्द्रराजस्ततोगृह्णात्[9] यश्चालुक्यनृपात्मजां [।]
राक्षसेन विवाहेन रणे खे-

6. टकमण्डपे ॥ [7]
ततोभवद्दन्तिघटाभिमर्द्दनो हिमाचलादास्थितसेतुसीमतः [।]
खलीकृतोद्वृत्तमहीपमण्डलः कुलाग्रणीर्यो भुवि दन्तिदुर्ग्गरा[ट्] ॥ [8]
हिरण्य-

---

1. Expressed by a symbol. 2. D. R. Bhandarker. सुराष्ट्र
3. Ibid. बभूव 4. Ibid. महीपतिर्भुवः 5. Ibid. प्रसाधनः
6. Ibid. राजनन्दनः 7. Ibid. बभार 8. Ibid. यत्रास
9. D. R. Bhandarkar. गृह्णाद्यश्चा

7. गर्भं राजन्यैरुज्जयन्यां[1] यदासितं [।]
प्रतिहारीकृतं येन गुर्जरेशादिराजकम् ॥ [9]
स्वयंवरीभूतरणांगणे ततस्स निर्व्यपेक्षं शुभतुंगवल्लभः [।]
चकर्ष चालुक्यकुलश्री[2]–

8. यं वलाद्विलोल[3]पालिध्वजमालभारिणां[4] ॥ [10]
अयोध्यसिंघासन[5]चामरोर्जितस्सितातपत्रोप्रतिपत्तराज्यभाक् [।]
अकालवर्षो हतभूपराजको बभूव राज–

9. रिषि[6]रशेषपुण्यकृत् ॥ [11]
ततः प्रभूतवर्षोभूद्धारावर्षस्ततश्शरै[7]–
र्द्धारावर्षायितं येन संग्रामभुवि भूभुजा ॥ [12]
युद्धेषु यस्य करवालनिकृत्तशत्रु–
मूर्द्धाङ्कवोष्णरुचिरासवपान–

10. मत्तः[8] ।
आकण्ठपूर्णजठरः परितृप्तमृत्यु–
रुद्गारयन्निव स काहलधीरनादः ॥ [13]
गङ्गायमुनयोर्म्मध्ये राज्ञो गौडस्य नश्यतः [।]
लक्ष्मीलीलारविन्दानि श्वेतच्छत्त्राणि यो हरेत्[9] ॥ [14]

11. व्याप्ता विश्वम्भरान्तं शशिकरधवला यस्य कीर्त्तिः समन्तात् ।
प्रेंखच्छंका[10]लिमुक्ताफलशतशफरानेकफेनोर्म्मिरूपैः ।
पारावारान्यतीरोत्तरणमविरलं कुर्व्वतीव प्रयाता
स्व[11]–

12. र्गं गीर्व्वाणहारद्विरद सुरसरिद्धौत्त[12]राङ्गच्छलेन ॥ [15]
प्राप्तो राज्याभिषेक निरुपमतनयो य[13] स्वसामन्तवर्ग्गा–
स्त्वेषां[14] पदेषु प्रकटमनुनयै[15] स्थापयिष्यानश–

13. षाम्[16] ।
पित्रा यूय[17] समाना इति गिरमरणीन्मन्त्रिवर्ग्गं[18] त्रिवर्गो–
द्युक्तः कृत्येषु दक्षः क्षितिमवति यदोन्मोक्षयन्बद्धगंगं[19] ॥ [16]
दुष्टांस्तावत्स्वभृत्यां[20] झटिति विघ–

---

1. D. R. Bhandarker. यिन्यां 2. Ibid. श्रियं
3. Ibid. बला– 4. Ibid. भारिणीं
5. Ibid. सिंहासन 6. Ibid. राजर्षि– 7. Ibid. इशरैः । धारा–
8. D. R. Bhandarkar. पानमत·, 9. Ibid. हरत
10. Ibid. च्छृङ्खालि 11. Ibid. स्वर्गो 12. Ibid. –सरिद्भार्त
13. Ibid. यः 14. Ibid. वर्गान्स्वेषां 15. Ibid. नयैः
16. Ibid. स्थापयिष्यन्नशेषान् 17. Ibid. –यूय 18 Ibid. –वर्गं
19. Ibid. –न्बद्ध– 20. Ibid. स्वभृत्याञ्

14. टिता[1] स्थापितान्येशपार्शा[2]
युद्धे युद्ध्वा स वध्वा विषमतरमहोत्तानिवोग्रान्समग्रां[3] [।]
मुक्त्वा सार्द्रान्तरात्मा विकृतिपरिणतौ वाडवाग्निं समुद्रः
क्षोभो नाभूद्विपक्षान-

15. पि पुनरिव तां[4] भूभृतो यो बभार[5] ॥ [17]
उपगतविकृतिः कृतप्रगंगो यदुदितदण्डपलायनोद्यवन्धा-
ध्यपगत[6]पदशृंखलः खलोयस्सनिगलवन्ध[7]गलः
कृतस्स येन ॥ [18]

16. श्रीमान्धाता विधातु[8] प्रतिनिधिरपरो राष्ट्रकूटान्वयश्री-
सारा[9]न्सारामरम्यप्रविततनगरग्रामरामाभिरामा-
मुर्व्वी[10]मुग्वश्वराणां मकु-
टमकरिकाश्लिष्टपादारविन्दः

17. पारावारोरुवारिस्फुटरवरशनां पातुमु[11]द्युयतो यः ॥ [19]
नवजलधरवीरध्वानगम्भीरभेरीरववधिरित[12] विश्वाशान्तरा-
लो रिपुणां[13] [।]

18. पटुरवपदढक्काकाहलोत्ताल्तूर्यत्रिभुवनधवलस्योद्योगकालस्य कालः॥[20]
भूभृन्मूर्द्धि[14] सुनीतपादविशरः[15] पुण्योदयस्तेजसा
कान्ताशे-

19. षदिगन्तर×प्रतिपदं प्राप्तप्रतापोन्नतिः [।]
भूयो योप्यनुर[16]न्तामण्डलयुत (:) × पद्माकरानन्दितो
मार्त्तण्ड[17] स्वयमुत्तरा[18]यणगत स्तेजोनिधिर्दुस्सहः ॥ [21]
स नाग-

20. भटचन्द्[19] गुप्तनृपयोर्यशौर्यं[20]
रणेस्व[21]हार्यमपहार्य धैर्यं विकलानयोन्मीलयत्[22] [।]
यशोर्जनपरो नृपान्स्वभुवि शालिसस्यानिव (।)
पुन×पुनरतिष्टि[23]-

---

1. Ibid. विघटितान् 2. Ibid. पार्शान् 3. Ibid. समग्रान्
4. Ibid. तान् 5. Ibid. बभार
6. D. R. Bhandarkar य-धात् । व्यपगतः, but as suggested by Dr. H. Śastri the original correctly reads द्व्यपगतः
7. Ibid. बन्ध 8. Ibid. विधातुः 9. Ibid. सारा सारा-
10. Ibid. -मिरामाम् । उर्व्वी- 11. Ibid. पातुमभ्यु- 12. Ibid. बधिरित-
13. Ibid. रिपूणां- 14. Ibid. न्मूर्ध्नि 15. Ibid. -विसरः
16. Ibid. प्यनुरक्त- 17. Ibid. मार्त्तण्डः 18. Ibid. -मुत्तरा-
19. Ibid.चन्द्र but as Dr.H.Śastri pointed out that the original has चन्द्र.
20. Ibid. -र्यशौर्यं 21 Ibid. रणेष्वहार्य-
22. Ibid. धैर्यविकलानधोन्मूलयत् 23 Ibid -रतिष्ठि-

21. पस्त्वपद एव चान्यानपि । [22]
हिमवत्पर्व्वतनिर्झराम्बु[1] तुरगैः वीतराच[2] गङ्गजै[3]–

Second Plate, First Side.

22. दूर्ध्वनितं मज्जनतूर्यकैर्द्विगुणितं भूयोपि तत्कन्दरे [।]
स्वयमेवोपनतौ च यस्य महतस्तौ धर्म्मचक्रायुधौ (।)
हिमवान्कीर्त्तिसरुपतामुपगतस्त–

23. स्कीर्त्तिनारायणः ॥ [23]
तत[4] प्रतिनिवृत्य[5] तत्प्रकृतभृत्यकर्म्मेत्ययः[6]:
प्रतापमिव नर्म्मदातटमनुप्रयातश्पुनः [।]
सकोशलकलिङ्गवेगि[7]डहलौड्रक [।]–

24. न्मालवां[8]
विलभ्य निजसेवकै[9] स्वयमबूभुज[10]द्विक्रमः ॥ [24]
प्रत्यावृत्तः प्रातिराज्यं विधेयं कृत्वा रेवामुत्तरं[11] विन्ध्यपादे [।]
कुर्व्वन्धर्म्मान्कीर्त्तनैः पुण्य [वृ] न्दैरभ्यष्टात्तान्सो[12]–

25. चितां राजधानी[13] ॥ [25]
मण्डलेशमहाराजसर्व्वस्व[14] यदभूद्ध्रुवः ।
महाराजसर्व्व[15]स्वामी भावी तस्य सुतोजनि ॥ [26]
यज्जन्मकाले दैवज्ञैरादिष्ट (ष्टं) विषहो भुवं [।]
भोक्तेति हि–

26 मवत्सतुपर्यान्ताम्बुधि[16]मेखलां [॥ 27]
योद्धारो मोघवर्षेण बद्धा ये व[17] युधि द्विषः [।]
मुक्ता ये विकृतास्तेषां भस्मतश्शृंखलोद्धृतिः ॥ [28]
ततश्प्रभूतवर्षस्सम्स्वसंपूर्णम–

27. नोरथः [।]
जगतुंगस्स[18] मेरुर्व्वा भूभृतामुपरि स्थितः ॥ [29]
उद [ति] ष्ठदवष्टम्भं भंक्तुं द्रविलभूभृतां [।]

---

1. D. R. Bhandarkar. –अम्बु– 2. Ibid. पीतश्च
3. Ibid. गाङ्गं गज 4. Ibid. ततः 5. Ibid. –प्रकृति– 6. Ibid. –त्यय
7. Ibid. वंग. Can it not be वेंगी of the Allahābad pillar inscription of Samudragupta (Fleet. C, I. I. III P. 1.) This also occurs in V-33 of this inscription.
8. Ibid न्मालवान् 9. Ibid. –सैवकैः 10. Ibid. मबूभुजद्वि–
11. Ibid. –मुत्तरां 12. Ibid. –रध्यष्टात्तां स्वो–
13. Ibid. राजधानीं 14. Ibid. मण्डलेशो महाराज शर्व्वः स्वो
15. Ibid. महाराज शर्व्वः 16. Ibid. स्सेतुपर्यन्ताम्बुधि 17. Ibid. बद्धा ये च
18. D. R. Bhandarkar. जगतुङ्ग

स जागरणचिन्तास्थमन्त्रणभ्रान्त चेतसां ॥ [30]
प्रस्थानेन हि के-

28. वलं प्रचलति स्वच्छादिताच्छादिता
धात्रो विक्रमसाधनैस्सकलुषं विद्वेषिणां द्वेषिणां [।]
लक्ष्मीरप्युरसो लतेव पवनप्रायासिता यासिता
धूलिर्ब्भैव दिशो-

29. गमद्रिपुयशस्सन्तानकं तानकं [॥ 31]
त्रस्यत्केरलपाण्ड्यचौलिकनृपस्संपल्लवंपल्लवं
प्रम्लानिं गमयन्कलिंगमगधप्रायासको यासकः [।]
गर्ज्जद्गुर्ज्जरमौशौ[1]

30. शौर्यविलयो लंकारयन्नुद्योग[2]स्तदनिन्द्यशासनमतस्सद्विक्रमो विक्रमः॥[32]
निकृतिविकृतगंगाशृङ्खलोवद्धनिष्ठा[3]-
मृतिमयुरनुकूला मण्डलेशा[4] स्वभृ-

31. त्या [।]
विरजसम[5]हितेनुर्यस्य वाह्यालिभूमिं
परिवृति[6] विधृत्या वेंगिनाथा दयोपि ॥ [33]
राजामात्यवराविव स्वहितकार्यालस्यनष्टौ हटा-
द्दण्डेनैव नि-

32. यस्य मूकवधिरावानीय हेलापुरे [।]
लंकातच्छिल[7] तत्प्रभुप्रतिकृती का (ण्ची) [ञ्ची] मुपेतौततः[8]
कीर्त्तिस्तम्भनिभौ[9] शिवायतनके येनेह संस्थापितौ[10] ॥ [34]
या-

33. स्या[11] कीर्त्तिस्त्रिलोक्या[12]श्निजभुवनभरं भर्त्तुमासीत्समर्थः
पुत्रश्चास्माकमेकस्स्फलमिति कृतं जन्म[13] धर्म्मैरनेकैः [।]
किं कर्त्तु[14] स्थेंय[15]मस्मिन्निति विम-

34. लयशःपुण्यशोपान[16]मार्ग्गः
स्वर्ग्गप्रोत्तुंगसौध[17] प्रतिरदनुपमः[18] कीर्त्तिस्रे(मे)वानुयात्तः (तः) ॥[35]
वन्धूनां[19] वन्धु[20]राणामुचितनिजकुले पूर्व्वजानां प्रजानां

---

1. Ibid. मौलि 2. Ibid. लकारयन्कारयन्नुद्योगै- 3. Ibid. शृंखलावद्ध-
4. Ibid. मण्डलेशाः 5. Ibid. -मभितेनु- 6. Ibid परिवृतिमनु-
7. D. R Bhandarkar reads, ल ातःकिल 8. Ibid. -मुपेते
9. Ibid. -निभे 10. Ibid. संस्थापिते 11. Ibid. व्याप्ता
12. Ibid. स्त्रिलोकीं निज 13. Ibid. जन्म 14. Ibid. -कर्त्तुं
15. Ibid. -स्थेय- 16. Ibid. -सोपान- 17. Ibid. सौधं
18. Ibid यद् 19. Ibid. बन्धूनां
20. Ibid. बन्धुराणां But Dr. H. Sastri pointed out that the original has जानाम्प्रजानाम्

जाता–

35. नां वल्लभानां भुवनभरितसत्कीर्त्तिमूर्त्तिस्थितां[1] [।]
त्रातुं कीर्त्ति[2] सलोकां कलिकलुषमथो हंतुमंतो रिपूणां
श्रीमान्सिंहासनस्थो बुधनुत[3]चरितोमोघव–

36. र्ष प्रशस्ति[4] ॥ [36]
त्रातु[5] नम्रान्विजेतुं रणशिरसि परान्प्राथकेभ्य[6]–
× प्र (।) दातुं निर्व्वोढुं रूढिसत्यं धरणिपरिवृढो नेदृशोन्यः[7] [।]
इत्थं प्रोत्थाय सार्थं पृथुरवपद–

37. दक्षादिमन्द्रप्रघोषो
यस्योन्द्रस्येव[8] नित्यं ध्वनति कलिमलध्वन्सिनो[9] मन्दिराग्रे ॥ [37]
दृष्ट्वा तन्नवराज्यमूर्जि [त] बृह[10]द्धर्म्मप्रभावं नृपं
भूय[11] षोडशराज्य–

38. वत्कृतयुग×प्रारम्भ[12]हृस्याकुलः [।]
नश्यन्नन्तरनुप्रविश्य विषमो माथामयोसौ कलिः
सामन्तान्सचिवन्स्ववान्धव[13]जनानक्षोभयत्स्वीकृताम्[14] ॥ [38]

39. शठमत्रं[15] प्रविधाय स्फूट[16]शपथैरोशस्वतंत्रा[17] स्वयं
विनिहत्योचितयुक्तकारिपुरुषान्सर्व्वे स्वयंग्राहिणः [।]
परयोषिदुहिता[18] स्वसेति न पु–

40. नर्भेद×पशूनामिव
प्रभुरेवं कलिकाल[19]मित्यवसितं सद्वृत्तमुधृत्तः[20] ॥ [39]
विततमहिमधाम्नि व्योम्नि संहृत्य धाम्ना
मितवति महतीन्द्रोर्म्मण्ड–

41. लं ताराकाश्च[21] [।]
उदयमहिमभाजो भ्राजितास्तप्रतापे
विरतवति विजिह्माश्चोर्जितास्तावदेव (:) ॥ [40]
गुरुबुध[22]मनुयातस्सार्थ[23]पातालमल्ला–

42. दुदयगिरिमहिम्नो रट्टमार्त्तण्डदेवः ।
पुनरुदयमुपेत्यो[24]धृत्ततेजस्विचक्रं

---

1. Ibid. –मूर्तिस्थितानाम् 2. Ibid. कीर्त्ति 3. Ibid. बुध–
4. Ibid. वर्षः प्रशास्ति 5. Ibid. त्रातुं 6. Ibid. प्रार्थकेभ्यः
7. D. R. Bhandarkar wants to supply समर्थः
8. Ibid. यस्ये 9. Ibid. –ध्वंसिनो
10. D. R. Bhandarkar –बृह– 11. Ibid. भूयः 12. Ibid. –युगप्रारम्भ
13. Ibid. –न्सचिवान्स्ववान्धव– 14. Ibid. स्वीकृतान् 15. Ibid. मन्त्रं
16. Ibid. कूट– 17. Ibid. स्वतंत्राः 18. Ibid. –षिद्दुहि–
19. Ibid. –कालहस्य– 20. Read. उद्धृतः 21. Ibid. तारकाश्च
22. Ibid. –बुध– 23. Ibid. स्सौर्थं 24. Ibid. –त्योहृत्त–

प्रतिहतमथ कृत्वा लोकमेकः पुनाति ॥ [41]
राजात्मा मनएव तस्य

43. सचिवस्सामन्तचक्रं पुन–
स्तनीत्येन्द्रिय[1]वर्गं एष विधिवद्वागादयस्सेवकाः [।]
देहस्थानमधिष्ठित[2] स्वविषयं भोक्तु[3] स्वतन्त्रः क्षम–
स्त–

Second Plate, Second Side.

44. स्मन्भोक्तरि[4] सन्निपातविवशे सर्व्वेपि नश्यन्ति ते ॥ [42]
दोषानौषधवद्धनाननिलवत्शुष्के[5]न्धेनान्यग्निवत्
ध्वान्तं भानुवदात्मपूर्व्वज–

45. समाम्नायागतान्द्रोहकान् [।]
संतापा[6]न्विनिहत्य यः कलिमलं धाम्याहि सम्प्रान्ततः (।)
कीर्त्या चन्द्रिक एव[7] चन्द्रधवलच्छत्रश्रिया

46. भ्राजितः ॥ [43]
यण्डा[8]भिहतोत्तरोरिव फलं मुक्ताफलं मण्डलात् (।)
यातं[9] शूकरयूथवद्रहनतस्तन्मन्दिरं हास्तिकं ।
यत्कोपोग्र–

47. दवाग्निद्रग्धतनवः प्राप्ता बिभूति पने[10] (।)
तप्तादोपनतप्रसादतनवः प्राप्तो[11] विभूतिम्पर[12] ॥ [44]
यस्याज्ञां परचक्रि[13] स्रजमिवाजस्रं शि–

48. रोभिर्व्वह–
न्त्यादिग्दन्तिघटावलीमुखपटः कीर्त्तिप्रतानस्ततः[14] । (।)
यत्रस्थ[15] स्वकरप्रतापमहिमा कस्यापि दूरस्थितः (।)
तेजक्रान्त[16]समस्तभूभृदि–

49. न एवासौ न कस्योपरि ॥ [45]
यद्वारे[17] परमण्डलाधिपतयो दौवारिकैर्व्वारिकै–
रास्थानावसरं प्रतीक्ष्य वहि[18]रप्यध्यासिता यासिता ।
गाणिक्यं वरलब्धौ[19]–

1. D. R. Bhandarkar. –स्तन्नीत्येन्द्रिय– 2. Ibid. –ष्ठितः
3. Ibid. भोक्तुं 4. Ibid. –स्मिन्भोक्तरि– 5. Ibid. –च्छुष्केन्ध–
6. Ibid. संतापाद्विनि– 7. Ibid. चन्द्रिकयेव 8. Ibid. –यद्दण्डाभिहतात्तरो–
9. Ibid. –लाद्यातं 10. Ibid. परे
11. Ibid. प्राप्ता, Dr. H. Sastri pointed out that the original reads प्राप्ता.
12. Ibid. –म्परे 13. Ibid. चक्रिणः 14. Ibid. –रिसतः
15. Ibid. यत्रस्थः 16. Ibid. तेजःक्रान्त–
17. Dr. Bhndarkar reads यद्द्वारे 18. Ibid. वहि– 19. Ibid. वररब्ध–

50. क्तिकचितं तद्धास्तिकं हास्तिकं (।)
नादास्याम[1] यदीति[2] यत्र निजकं पश्यन्ति नश्यन्ति च ॥ [46]
सर्प्पं पातुमसौ[3] ददौ [4]निजतनुं जीमूतकेतोस्सुतः (।)
श्येनायाथ शिविः[5] क–

51. पोतपरिरक्षार्थं दधीचोर्त्थिने ।
तेप्येकैकमतर्प्पयन्किल महालक्ष्म्यै स्वावा[6]मांगुलिं
लोकोपद्रवशान्तये स्म दिशति श्रीवीरनारायणः ॥ [47]
हत्वा भ्रातर–

52. मेव राज्यमहरद्देवीं च दीनस्ततो
लक्षं कोटिमलेखयन्किल[7] कलौ दाता स गुप्तान्वयः [।]
येनात्याजि तनु[8] स्वराज्यमसकृद्वाह्यार्थकैः[9] का कथा
ह्री–

53. सस्योन्नतिराष्ट्रकूठ[10]तिलको दातेति कीर्त्यावपि[11] ॥ [48]
स्वभुजभुजसनि[12]खिंशोग्रदंष्ट्राग्रदष्ट,
प्रवल[13] (वल) रिपुसमूहे मोघवर्षे मधीशे[14] । (।)
न दध–

54. तिपदमीतिव्याधिदुष्कालकाले[15]
हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु । [। 49]
चतुस्समुद्रपर्यान्तः[16] समुद्र[16a] यत्प्रसाधितं [।]
भग्ना समस्तभूपालमुद्रा ग–

55. रुडमुद्रया ॥ [50]
राजन्द्वास्ते[17] वन्दनीस्तु[18] पूर्व्वे येषान्धर्म्मा[19]ऽपालानी[20]योस्मदादैः[21][।]
ध्वस्ता दुष्टा वर्त्तमानास्सधर्म्मं[22]प्रार्थ्या ये ते भाविनः[23]पार्थिवेन्द्राः[24][॥51]
भुक्त[25] कें–

56. श्चिक्रमेणा[26]परेभ्यो दत्तं चान्यैस्यक्तमेवापरैर्व्यत् [।]

---

1. Ibid. नादास्यामो but he admits that it spoils the metre.
2. Ibid. यदेसि 3. Ibid. –मसौ 4. Ibid. ददौ 5. Ibid. शिविः
6. Ibid. स्ववामां– 7. Ibid. –लेखयत्किल 8. Ibid. तनुः
9. Ibid. - द्वाह्या– 10. Ibid. हीस्तस्योन्न and कूट 11. Ibid. कीर्त्यामपि
12. Ibid. –भुजगनि– 13. Ibid. –पबल–
14. Ibid. - महीशे 15. Ibid. –काला–
16. D. R. Bhandarkar पर्यन्तं 16a. Ibid. –स्वमुद्रं 17. Ibid. राजेन्द्रा–
18. Ibid. वन्दनीया– 19. Ibid. येषां धर्म्म– 20. Ibid. पालनी
21. Ibid. दाधैः 22. Ibid. स्वधर्म्मं 23. Ibid. भावि–
24. Ibid. पार्थि– 25. Ibid. –भुक्तं 26. Ibid. श्चिद्विक–

कस्थानित्ये[1] तत्र राज्य[2]महद्भिःकीर्य्या[3] धर्म्मः केवलं पालनीयं[4] ॥ [52]
तेनेदमनिलविधुचञ्चलमवलो[5]–

57. कय जीवितमसारं । (।)
क्षितिदानपरमपुण्यं प्रवर्त्तितो ब्रह्मदायोयं ॥ [53]
स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीजगतुंगदेव[6]
पादानुध्यातपर–

58. मभट्टारकमहाराजाधिराजपरमेश्वरश्रीपृथ्वीवल्लभ
श्रीमदमोघवर्षश्रीवल्लभनरेन्द्रदेवः कुशली सर्व्वानेव यथासम्बन्ध्य[7]मान-
कान्राष्ट्रपतिविषयपति–

59. ग्रामकूटयुक्तकनियुक्ताधिकारिकमहत्तरादी[8]
समादिशत्यस्तु (॥) वस्संविदितं यथा मान्यखेटराजधान्यात[9]स्थितेन
मया मातापित्रोरात्मन (क) श्चैहिकामु–

60. त्रिक पुण्ययशोभिवृद्धये ॥७॥
करहडविनिर्गतभरद्वाःमाग्निवेश्यानां आंगिरस पारुहस्पत्यानां[10] भार-
द्वाना जेसब्रह्मचारिणे[11] साविकूवारक–

61. महतपौत्राय[12] । गोलसडगमिपुत्राय[13] । नरसिघदीक्षित:[14] । पुनरपि
तस्मै[15] विषयविनिर्गता[16] । तस्मै[17] गोत्रे च भट्टपौत्राय । गोविन्दभट्ट–

62. पुत्राय । रच्छदित्यक्रमद्दतः[18] । तस्मि[19] देपे । वह्वृमुखसब्रह्म[20]चारिणे
दावडिगहियसहासपौत्राय । विष्णुभट्ट (।) पुत्राय । तिविक्रम[21]–

63. षडंगमिः[22] पुनरपि तस्मिं[23] देषे वच्छगोत्रसब्रह्मचारिणे[24] । हरिभट्ट-
पौत्राय । गोवादित्यभट्टपुत्राय । केसवगहियसाहासः[25] ।

Third Plate.

64. चतुकाःनां[26] वह्वृचसखानां[27] । पवं चतुकः[28] ब्राह्मणानां ग्रामो दत्तः

---

1. Ibid. कास्था– 2. Ibid. राज्ये 3. Ibid. कीर्त्यै
4. Ibid. –नीयः 5. Ibid. विधुचञ्चल– 6. Ibid. जगत्तुंग–
7. Ibid. –राम्बध्य– 8. Ibid. महत्तरादीन् 9. Ibid. –धान्यवस्थितेन
10. Ibid. भरद्वाजाग्निवेश्यांगिरसबार्हस्पत्याना 11. Ibid. द्वाजगोत्र सब्रह्म
12. D. R. Bhandarkar. –क्रमवित– 13. Ibid. –षडंगवित्–
14. Ibid. नरसिंह दीक्षितस्य 15. Ibid. –न्द्विषय– 16. Ibid. –विनिर्गताय
17. Ibid. तस्मिन् 18. Ibid. क्रमविदे 19. Ibid. तस्मिन्देशे
20. Ibid. –ब्रह्म– 21. Ibid. त्रि०– 22. Ibid. –गविदे
23. Ibid. तस्मिन्देशे 24. Ibid. वत्स and ब्रह्म 25. Ibid. केशव and साहासाय
